CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 804

Title Kālanirṇaya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

*Shastri Dinmanishankar Pustak-Bhandara*

No.: 804 Subject: Dharmaśāstra

Title: Kālanirṇaya.

Author: Mādhavācārya Scribe: Raghunātha Bhaṭṭa.

Date of the work: — Date of the Ms.: V.S. 1932

Place of the work: — Place of the Ms.: —

Size: 10.2" by 4.4" Extent: 129 foll.

Language: Sanskrit Script: Devanāgarī

Remarks:

कालमाधवपत्र १२६

श्रीगणेशाय नमः॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे॥ यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं॥ सोहं प्राप्य
विवेकतीर्थपदवीमाम्नायतीर्थे परं मज्जन्सज्जनसंगतीर्थनिपुणः सद्वृत्ततीर्थं श्रयन्॥ लब्ध्वामाकलयन्प्रभावलहरीं श्रीभा
रतीतीर्थतो विद्यातीर्थमुपाश्रयन्हृदि भजे श्रीकंठमव्याहतं॥ सत्यैकव्रतपालको द्विगुणधीस्त्र्यर्थश्चतुर्वेदितापंचस्कंधपत
तीषडन्वयदृक्सप्तांगसर्वंसहः॥ अष्टव्याप्तिकलाधरो नवनिधिः पुष्यद्दशात्मस्वयःस्मार्तोच्छ्रायधुरंधरो विजयते श्रीरुक्म
णीस्मापतिः॥ व्याख्याय माधवाचार्यैर्धर्मान्पाराशरानथ॥ तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः॥ व्याख्यानामिह
तनुभृतां जाह्नवीतीर्थमेकं विद्यातीर्थं प्रजति विमलं सद्विवेकोदयानां॥ सर्वेषां तत्प्रथमसुखदं भारतीतीर्थमाकुर्वन्नावो
न्मे विपुलमनसो निर्णये शक्तिरस्ति॥ अथोनुक्रम्यते श्लोकैरखिलो निर्णिनीषितः॥ तावत्तेवानुतिष्ठासुर्निःसंदेहं प्रव
र्त्ततां॥ ततो मीमांसुचित्तस्य समाधानाय तत्पुनः॥ विवरिष्ये यथान्यायं श्रुतिस्मृतिवचोबलात्॥ पंचप्रकरणान्यत्र तेष्वपो राम १
द्धातवत्सरौ॥ प्रतिपद्धिष्टतिथयो नक्षत्रादिरिति क्रमः॥ उपोद्धाते कालसत्वं तस्य निर्णययोग्यता॥ ईश्वरो नित्यकालो ला
क्षिंतनीयः सकर्मसु॥ अन्ये कालेष्वमुख्यत्वमुक्तमेतत्त्रयं॥ अथोपनामासाश्च पक्षः प्रकरणांतरे॥ अब्दः पंचवि
नथानतत्रयां १ धेष्वांद्रोत्र तादौ तिलकादिके॥ सुजन्मादिव्रते सौरो गोसत्रादिषु सावनः॥ त्रयोप्यार्वार्यसेवांदो विकल्पनेन निजेच्छया॥

आयुर्दायेतु नाक्षत्रो वार्हस्पत्योधिवत्सरः। चांद्राणां प्रभवादीनां पंचके पंचके युगे। संपरीदान्विदित्येन क्षद्द पूर्वोस्त्ववत्सराः तिको
यवो वस्त्रधान्येरजतं देयमत्र तु। उग्ये कर्मणि चाब्दानेवस्तोऽपनेदक्षिणोत्तरे। वसंताद्यृतवो द्वेधा चांद्राः सौराश्च चांद्रकाः। चै
वै २ त्राद्या अथ मीनाद्या मेषाद्या वा विवस्वतः। तेषामाधानादयस्तद्दक्षिणमूर्तिबलप्रजने। मासास्तु सावनः सौरश्चांद्रो नाक्षत्र
इत्यमी। दर्शांतः पूर्णिमांतो वा चांद्रो सौरो वैश्यविप्रयोः। सौरो राज्ञः सावनस्तु यज्ञे ज्योतिर्विदपरः। माघादिमासभेदेषु ति सि॰ ४
लदानादयः स्मृताः। चांद्रोधिमासोसंक्रांतः सोंतर्भवति चोत्तरे। असंक्रांतावेकवर्षे द्वौ चेत्संसर्प आदिमः। क्षयमासो
द्विसंक्रांतिः सचांहस्पतिसंज्ञितः। चयस्त्याज्या विवाहादौ संसर्पाहस्पती उभौ। शुद्धौ श्रौते तथा स्मार्ते मलमासोवि
विच्यते। काम्यारंभं तत्समाप्तिं मलमासे विवर्जयेत्। आरब्धं मलमासात्प्राक्कृच्छ्रचांद्रादिकं तु यत्। तत्समाप्यं सावनस्य
मासस्यानतिलंघनात्। प्रारंभस्य समाप्तेश्च मध्ये स्यान्मलिम्लुचः। प्रवृत्तमखिलं काम्यं तदानुष्ठेयमेव तत्। आकारी
र्यादिरुयत्काम्यं तस्यारंभसमापने। कार्ये कालविलंबस्य प्रतीक्षा यात्र संभवात्। अनन्यगति कं नित्यममग्निहोत्रा
दि न त्यजेत्सौ अगति ग्रहणस्नानं जाते ष्टिर्गतिसंयुता। द्वयं नैमित्तिकं तस्य व्यवस्थिता। शुद्धमासमृता नोस्यामा

=गत्यंतर सुतं नित्यं सोमयागादि वर्जयेत्॥१ श्रे २ =स्यानित्यव१

लिने प्रथमाह्निकं॥ मलमासस्थमतानांतु मले स्यादाह्निकोत्तरं॥ दैवे मुख्यः शुक्लपक्षः कृष्णः पित्र्ये विशिष्यते॥ तृतीये तु प्रकर
णे वर्णिता प्रतिपत्तिथिः॥ प्रतिपन्नाम विज्ञेया चंद्रस्य प्रथमा कला॥ शुक्लपक्षे विशेषेण चंद्रः कृष्णपक्षे विनिस्सरेत्॥ शुद्धा विद्धा तथा
शुद्धा हीनातिथ्यान्यथाहि नि॥ उदये सर्वयातिथ्या विद्धा ते त्रिमुहूर्तकैः॥ सायं तु त्रिरयात दुन्न्यून्यान्न विद्धते॥ वेध्या पित्रिमु
हूर्तैर्विन न्यूनावेधमर्हति॥ शुद्धायां नास्ति संदेहो दैवे पित्र्ये च कर्मणि॥ उपवासश्चैकभक्तं नक्तं चायाचितं व्रतं॥ दानं च षड्विधं
दैवं क्रमादत्र विविच्यते॥ एकोद्दिष्टं पार्वणं च पित्र्यं द्विविधमीर्यते॥ शुक्लपक्षे दर्शविद्धा कृष्णे विद्धा द्वितीयया॥ उपोष्या
प्रतिपच्छुक्ले मुख्या स्यादापराह्णिकी॥ तदभावे तु सायाह्नव्यापिनी परिगृह्यतां॥ प्रातः संगव मध्याह्नापराह्णाः सायमित्यसौ॥
तत्राह्नः पंचधा भागो मुख्यो द्व्यादि भागतः॥ अभावे पि प्रतिपदः संकल्पः प्रातरिष्यते॥ तिथिस्त्रियामतो धर्वाक्ते त्रिथ्यंते
पारणं भवेत्॥ अन्यथा पारणं प्रातरन्यतिथ्युपवासवत्॥ बल्फत्तवें च सर्वेषु रुपवासवदाचरेत्॥ मुख्या तिथ्यंतराये
तु तिथिर्दोषापि गृह्यतां॥ शुद्धाधिकाप्येकाशापि सर्वा संमर्ति संभवा॥ गृहीतव्या चैकभक्ते मध्याह्नव्यापिनी तिथिः॥
परे द्युरेव सर्वेद्युरेव व्याप्तिर्दिनद्वये॥ नोभयत्रोभयत्रांशे साम्ये वैषम्यमित्यभी॥ षड्रूपत्वात्तेषु चैकैके व्याप्तौ सोत्र २
गृह्यतां॥ दिनद्वयेपि तद्याप्त्यभावे व्याप्तौ चैकदेशतः॥ समव्याप्तौ च सर्वेवि वैषम्ये त्वधिके ष्यतां॥ अन्यांगस्यैकभक्तस्य

कालस्त्वंगप्यनुसारतः॥ उपवासप्रतिनिधेस्तिथिः स्यादुपवासवत्॥ प्रदोषव्यापिनी नक्ते तिथिर्व्याप्तिर्दिनद्वये॥
अव्याप्तिर्वाथ वांशेन व्याप्तिः स्यात्सर्वथोत्तरा॥ सौरनक्ते तु सा त्वाह्नव्यापिनी न प्रदोषगा॥ अयाचिते तु तिथयः स्वी
कार्या उपवासवत्॥ सोदयत्रिमुहूर्ता या कुर्याद्दानं व्रतानि च॥ उभयत्र तथात्वे तु सर्वेद्युस्तदनुष्ठितिः॥ पूर
च॰दी॰ ज्ञेव तथात्वं तु चेत्पूर्वा ग्राह्या तिथिर्द्वये॥ तिथेः साम्ये च गृह्यतां तिथिरुत्तरा॥ अस्पष्टे चैकदेशस्य व्याप्तौ
पूर्वैव गृह्यतां॥ एकोद्दिष्टे तु मध्याह्नयुक्ता स्यादेकभक्तवत्॥ एकदेशे समव्याप्तौ द्वये पूर्वान्यथोत्तरा॥
कुतपाद्यपराह्णांतव्याप्तिः पार्वणिके उत्तमा॥ तदभावे पराह्णस्य व्यापिका गृह्यतां तिथिः॥ द्वये पूर्वोत्तराह्न्वो व्याप्तिश्चे
दपयाह्नयोः॥ न ग्राह्या तिथिगो वृद्धिह्रास याद्वृद्धितिथेस्तको॥ साम्ये तु क्षये तिथेर्ग्राह्या परविद्धैव सर्वदा॥ न स्पष्ट
त्यपराह्ने चेत्पूर्वा स्यात्कुतपो द्वथा॥ वैषम्ये चैकदेशस्य व्याप्तौ ग्राह्या महत्त्वतः॥ साम्ये न चेत्तु द्वये पूर्वापम
स्याह्नहिसाम्ययोः॥ हृद्धिसाम्यक्षयाद्यास्तु तिथिगा नो हि गाउ ह॥ द्वितीयाया स्तुपर्वोत्तास्तु त्र्ये प्रकरणे दि
ताः संवारणीयः सामान्यतिथिषु प्रतिप— यः क्वचित्क्वचिद्विशेषोऽस्ति सोऽयमत्राभिधीयते॥ पूर्वेद्युर
स्ती प्रातः परेद्युस्त्रिमुहूर्तगा॥ सा द्वितीया परोपोष्या पूर्वविद्धा ततोन्यथा॥ रंभाख्ती या पूर्वा स्यादु

न्नरास्याद्रतांतरे॥ परेह्नि नास्ति चेत्पूर्वविद्धाप्युक्तव्रतांतरे॥ मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे॥ शुद्धाधिकायामप्ये
वं गणयोगप्रशंसनात्॥ चतुर्थी तु परा पोष्या गणनाथव्रतस्य तु॥ मध्याह्नव्यापिनी पूर्वा स्यात्तद्वन्नागचतुर्थ्यपि॥ परेह्नि केव
लमध्याह्नव्याप्तौ विघ्नस्य सोत्तरा॥ अन्यथा पूर्वविद्धैव मातृयोगप्रशस्तितः॥ पूर्वेद्युः केवलं तद्व्याप्तौ पूर्वा सर्पप्रियातिथिः॥ नो चेत्स
र्पस्य पंचम्या योगात्तं तं प्रशस्यते॥ गौर्याः शुद्धा तु याप्युक्ता नागविद्धा निषिध्यते॥ सर्वत्र पंचमी पूर्वा ग्राह्या स्कंदव्रते प
रा॥ नागविद्धा स्कंदषष्ठी सा निषिद्धा व्रतांतरे॥ तत्स्यात्स्याभावे तु नागविद्धापि गृह्यतां॥ विना द्वादशनाडीभिर्नागवेधो न
ऽद्दोषकृत्॥ सप्तमी पूर्वविद्धैव व्रतेषु निखिलेष्वपि॥ अनाचेत्पूर्वविद्धायाः परविद्धापि गृह्यतां॥ व्रतमात्रेष्टमी तत्सा
पूर्वा कृष्णाष्टमी परा॥ दूर्वाष्टमी च शुक्लापि पूर्वविद्धा विधीयते॥ पक्षद्वयेप्युत्तरस्कुकुंनिवशाक्तिमहोत्सवे॥ ज्येष्ठर्क्षयो
गे पूर्वैव ग्राह्या ज्येष्ठाव्रते तिथिः॥ मध्याह्नादूर्ध्वमर्क्षं चेत्परेद्युः सा प्रशस्यते॥ ज्येष्ठर्क्षभानुवाराभ्यां युक्ताष्टम्यतिदुर्लभा॥ ज
यंताख्यं व्रतं भिन्नं स्त्सा जन्माष्टमीव्रतात्॥ शुद्धा च सप्तमीविद्धेत्येवं जन्माष्टमी द्विधा॥ सप्तमी चेन्निशीथात्प्राक्विद्धा शु
द्धा तु अन्यथा भवेत्॥ शुद्धायां नास्ति संदेहो विद्धा वत्रि विधेष्यते॥ निशीथयोगः पूर्वेद्युः परेद्युर्वा द्वयोरुत॥ पूर्वैव प्र ३
निपक्षे परे वोत्तरपक्षयोः॥ अष्टमी रोहिणीयुक्ता जयंती सा चतुर्विधा॥ शुद्धा शुद्धाधिके त्येवं विद्धा विद्धाधिके ति चाशु

वाधिकार्ण

द्धायामपि विद्धायां न संभाव्योत्तरा तिथिः॥ शुद्धाधिकायां योगः स्यादेकस्मिन्वा दिनद्वये॥ नैकयोगेस्ति संदेहो द्वियोगे प्रथमं
दिनं॥ सदा निशीथे पश्चाद्वेत्कत्तमो मध्यमोथमः॥ योगस्त्रिधापि पूर्वेद्युः संपूर्णत्वादुपोषणं॥ विद्धाधिकायामप्येकदिनयोगे स
गृह्यतां॥ द्वयोर्योगास्त्रिधा भिन्नो निशीथे वृत्तिभेदतः॥ तद्वृत्तिर्दिन एकस्मिन्नुभयोर्नोभयोरिति॥ एकस्मिंश्चेत्तद्दिनं स्यात्तत्स्योर
न्ययोः परं॥ बुधे सोमे जयंती चेद्वारे सातिफलप्रदा॥ तिथ्यंतयोर्द्वयोरंतेंतमं पारणं भवेत्॥ एकस्यांते मध्यमं स्यादुत्सवांते धम
स्मृतं॥ यस्मिन्वर्षे जयंत्याख्यो योगो जन्माष्टमी तदा॥ अंतर्भूता जयंत्यां स्यात्तद्योगप्रशस्तितः॥ नवमी पूर्वविद्धैव पक्षयोरु
भयोरपि॥ मध्याह्ने रामनवमी पुनर्वसुसमन्विता॥ पयाद्यानेवाष्टमीयुक्ता सनत्तनापि वेष्टवेः॥ कल्पापूर्वेति राष्ट्रकास्ताम
वं व्यवस्थिता॥ जयंतीव्रतवन्नित्यं काम्यं चैकादशीव्रतं॥ अरुणोदयवेधोत्र वोधः सूर्योदये तथा॥ उक्तौ द्वादशमीवेधौ
वेधश्च स्मार्तयोः क्रमात्॥ कलाकाष्ठादिवेधोपि ग्राह्यो वैष्णवैः सदा॥ वैखानसाद्यागमोक्तं दशंपापासोहि वेधः वि त्रिमुहूर्तेन
द्धा त्यान्यवैष्णवेन शुद्धा याधिक्यसंभवा॥ एकादशी द्वादशी चेत्युज्यतां दिनं॥ पूर्वया शुद्धे नूनं स्यादिति वैष्णव
द्वादशी२ निर्णयः॥ एकादशी चेत्युभयं वर्धते यदा॥ तदा पूर्वदिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनं॥ एकादशी द्वादशी चेत्युभयं मात्र
हद्रो गृहियत्योर्थव स्थितिः॥ उपोष्या यतिं गृहिभिः पूर्वा यतिभिरुत्तरा तिथिः॥ द्वादशीमात्रहद्दो तु शुद्धावि

द्वैव्यवस्थितेः॥ उद्धा प्रवेत्ति राविद्धा स्मार्तनिर्णयई दृशः॥ अथवले नयुता चेत्स्याद्द्वादशी सा हि वैष्णवैः। स्मार्तैश्चोपोषणीया स्या
त्यजेदेकादशीं तदा॥ उपवासव्रतादन्यव्रते सार्धमुहूर्तकैः। सप्तभिर्दशमीविद्धामेकामेकादशीं त्यजेत्॥ द्वादशी पूर्वविद्धैव व्र
ते कुर्निखिलेष्वपि। उक्ता त्रयोदशी पूर्वा परा च प्रात्र योदशी॥ अलाभे सापि पूर्वैव पूर्वानंगत्रयोदशी। याम्युक्ता गत्यंते पूर्वाग्र
स्यतां सापराह्णिकी॥ चतुर्दश्यष्टतत्रास्त्युक्ता पूर्वान्तस्मा चतुर्दशी। उदये हि मुहूर्तापि ग्राह्या स्यानंतव्रते तिथिः॥ उक्ताधिरात्रिकु
ता स्यात् ब्रैत्रश्रावणमासयोः॥ उक्ता सा वापि पूर्वैव यदि स्यादपराह्णिकी। प्रदोषे वा निशीथे वा द्वयोर्वा यात्रि सा भवेत्॥ त्रि
वरात्रिव्रते तत्र द्वयोः सत्वात्प्रशस्यते। तदभावे निशीथैकव्याप्तापि परिगृह्यताम्॥ तस्याश्चासंभवे ग्राह्या प्रदोषव्यापिनी तिथिः॥
तिथ्यंते पारणं यामत्रयादर्वाक्समापने॥ अन्यथा पारणं प्रातरन्यतिथ्युपवासवत्॥ रवेर्विद्धैव सावित्री व्रते पंचदशी तिथिः॥
ना ज्योष्णदशाभूतेन स्यसमुच्छेत्तस्य परेऽहनि॥ व्रतांतरालिसर्वालिपरेऽहन्येव सर्वदा॥ श्राद्धेपराह्णकालीनो दर्शः श्राद्धिकव
त्मतः॥ दिनद्वयेऽप्येकदेशे व्याप्तौ व्याप्तौ महच्च तत्। तुल्यत्वे चैकदेशे च क्षये पूर्वैव निर्णयः॥ तत्तव्याप्तो द्वयोरव्याप्तौ तत्र स्तिथिच
द्धितः॥ साग्न्यनग्निव्यवस्था स्यान्नेस्याच्चेदपराह्णगः॥ पूर्वैकः साग्निकः कार्यः परे तु निरग्निकः। पर्वप्रतिपदोः सं
धिर्मध्याह्नेवा ततः पुरा॥ अन्वाधानं पूर्वदिने यागः संधिदिने भवेत्॥ ऊर्ध्वं मध्याह्नतः संधावन्वाधानं तु तद्दिने॥ इष्टिं

परदिने कुर्यादन्ये वाजसनेयिनः॥ यस्त्वा वाजसनेयी स्यात्तस्य संधिदिनात्परा॥ न चाप्यन्याप्तितः किंतु सदा संधिदिने हि सा॥ सं
धिश्चेत्संगवादूर्ध्वं प्राकृपर्यावर्तनाद्रवेः। सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिः। दृष्टिः प्रतिपदो यास्तिततद्द्वे प
र्वाणि क्षिपेत्। तयस्याद्ध्वं तथा क्षिप्त्वा संधिर्निश्चीयतां सदा। बौधायनमते दर्शश्राद्धे वेहि विशिष्यते। द्वितीयाश्रि
मुहूर्तोचेत्यतिपद्यापराह्णिकी। अन्वाधाने चतुर्दश्यां दर्शे स्वल्पेपि वर्तते यदा दर्शश्राद्धं तदा कार्यमिति बौधायनो
दितां दृष्ट्यादिविकृतिः सर्वा पर्वण्येवेति निर्णयः। पंचमेतु प्रकरणे पूर्वार्द्धं भाति निर्णयः। उत्तरार्द्धे कालभेदात्कर्म
भेदोपदेशनां। यस्मिन्नस्तमियाद्भानुस्तन्नक्षत्रमुपोषणे। मुख्यं तस्यासंभवे तु गृहीतव्यं निशीथयुक्। उपवासेषु
संस्थातद्दिनं नैकभक्तयोः। उदये त्रिमुहूर्तस्पर्शं नक्तं चैकभक्तनयोः। दिनद्वये तथा त्वेतु पूर्वस्याद्भूल व त्वतः। श्रव
णेत्तरं ग्राह्यमुपाकरणकर्मणि। पित्र्ये तु तिथिवत्सर्वान्नक्षत्रस्य विनिर्णयः। पूर्वः स्यादुपवासादावुत्तरो व्रत
दानयोः। योगः श्राद्धकर्मकालव्यापकः परिगृह्यताम्। करणं यद्दिने तत्तु याहोरात्रौ यदा तदा दिनद्वये कभक्ता प्या
मुपवासः प्रसिध्यति। वारेषु संख्याभावाद् हीनेप्यं यथा स्थितं। आसन्ननाडीः सं कालेः पुण्याः स्नानादिकर्मसु
वरेषु कर्कटे पूर्वा मकरे विंशतिः परा। वर्तमाने तुला मेषे नाडयस्तूभयतो दश। वृषभादौ स्थिरे पुण्याः प्राक्पश्चा

रपि षोडश॥ मिथुनादौ द्विस्वभावे उत्तराः षष्टिनाडिकाः॥ ग्रहः संक्रमणे रात्रावनुष्ठाननिषेधतः॥ उक्तो कालो
व्यवस्थाप्योत द्वलात्सर्वपश्चिमो॥ रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः॥ अर्द्धरात्रादधस्तस्मिन्मध्या
ह्नस्योपरि क्रिया॥ ऊर्द्ध्वं संक्रमणे चोर्द्ध्वमुदयात्प्रहरद्वयं॥ पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः॥ प्राहुर्दिन
द्वयं पुण्यं मुक्त्वा मकरकर्कटौ॥ कर्कटे मकरे रात्रावप्यावारादनु तिष्ठति॥ पूर्णिमा प्रतिपत्संधौ राहुः सं
पूर्णमण्डलं॥ ग्रसते चंद्रमर्कं च पर्वप्रतिपदंतरे॥ ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते॥ मुच्यमाने भवे
द्दानं मुक्ते स्नानं विधीयते॥ सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयं॥ चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्वि
ना॥ सायाह्ने तु पराग्रे तु नापराह्ने भुक्तिं चरेत्॥ अपराह्ने न मध्याह्ने मध्याह्ने न तु संगवे॥ भुंजीत संगवे
चेद्ग्रस्येन्न पूर्वं भुजिमाचरेत्॥ ग्रस्तोदये विधेः पूर्वं नाहर्भोजनमाचरेत्॥ ग्रस्तावेवास्तमानं तु रवींद्व
प्राकृतो यदि॥ तयोः परेद्युरुदये स्नात्वाभ्यवहरेन्नरः॥ नयोरुध्यादितो वर्ज्यं दिनानां नवकं ध्रुवं॥ मंग ५
लेषु समस्तेषु ग्रहणे चंद्रसूर्ययोः॥ द्वारभ्यादि स्तृतीयां हि तोचेयद्दं दुग्रहे स्मृतः॥ एकादश्यादि

नी२

कः सौरे च चतुर्थ्यंतः प्रकीर्तितः॥ खंडग्रहे तयोः प्रोक्तमुभयत्र दिनद्वयं॥ नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु च॥ उपाकर्मणि चो
त्सर्गे ग्रहवेधो न विद्यते॥ इदं सांनियमं न्याये विवरीतुमिहोद्यमः॥ तमेव निर्णये शास्त्रन्यायाभ्यां कर्तुमुद्यमः॥ ननु नायमुद्यमः
सफलः॥ कालस्य गगनकुसुमायमानत्वात्॥ तत्र तत्त्वपरमरहस्यमभिज्ञानानः कपिलमहामुनिस्तत्त्वानि निर्विवेक्तुकामः कालमु
पेक्ष्यान्यान्येव पंचविंशतितत्त्वानि विविवेच॥ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त॥ षोडशकश्च विकारो न प्रकृति
र्न विकृतिः पुरुष इति॥ न चैतेष्वेव तत्त्वेषु कालस्यांतर्भावो मुनिना विवक्षित इति शंकनीयं॥ यदभिमतस्य कालस्य यथोक्तपंचविंशति
तत्त्वानां च परस्परमत्यंतविलक्षणत्वात्॥ तथा हि॥ चिरक्षिप्रादिव्यवहारस्यासाधारणो हेतुः ईकाल इति यदभिमतं कालसत्वं॥
तत्त्वानां त्वन्याद्दशानि लक्षणानि॥ सत्त्वरजस्तमोगुणानां साम्यावस्था मूलप्रकृतिः॥ महदहंकारपंचतन्मात्राख्यानां सप्तानां प्रकृ
तिविकृतीनां मध्ये ऽध्यवसायहेतुर्महत्तत्त्वं॥ अभिमानहेतुरहंकारः॥ शब्दस्पर्शरूपरसगंधात्मकानि पंचतन्मात्राणि॥ पृथिव्या
दिर्थ्वे च महाभूतानामेकादशेंद्रियाणां च षोडशविकाराणां लक्षणानि प्रसिद्धानि॥ अप्रकृतिविकृतिः पुरुषश्चिदात्मकः॥ नैते
षु लक्षणेषूक्ततत्त्वेषु कालस्यांतर्भावः संभाव्यते॥ नापि षड्विंशतत्त्वांतरं मुनिरनुमन्यते॥ कथं तर्हि मुनिप्रणीतानि तत्त्वान्याध्यामि
संगृह्णान ईश्वरस्तस्मो बहिःकरणांतःकरणे विविंचन् कालं व्यवहार॥ सांप्रतकालं वार्थे त्रिकालमभ्यंतरं करणं इति॥ परप्र
सिद्ध्या परोबोधनीय इति न्यायेनायं व्यवहारो नक्तस्य सिद्धांताभिप्रायेणेति वदामः॥ अत एवैतद्वचनं व्याचक्षाणा वाचस्पतिमि

आस्तां च कौमुद्यामेव माधुर न कालस्य वैशेषिकाभिमतस्यैकोनातीतादिभेदप्रवर्तयितृ महतीति तस्मादयं येरूपाधिभेदैरतीतानागतादि
भेदभावं प्रतिपद्यते संकेतएवोधयोव्यवहारहेतवः स्तमन्तर्गडुना कालेनेति सांख्याचार्यास्तस्मान्न कालरूपतत्त्वांतराभ्युपगम इति।।
अथोच्यते भूतकालो वर्तमानकालो भविष्यत्काल इति एवं त्रिष्वपि भूतादिष्वनुगतः कालप्रत्यय एकमनुगतं कालतत्त्वमंतरेणानुपप
न्न इति। तन्न।। पदार्थप्रत्ययवदुपपत्तेः।। यथा भवन्मते द्रव्यपदार्थो गुणपदार्थ इति षट्सु भावेषु चतुर्षु भावेषु अनुगतपदार्थ
प्रत्ययः पदार्थांतरमंतरेणाप्युपपन्नस्तथा कालप्रत्ययः कुतो नोपपद्यते तस्मान्नित्यं च कालं निरवच्छिन्नं हानेयमुद्यमः प्रेक्षा
वच्छिरोमणेर्माधवाचार्यस्य न कथंचिदप्युपपन्न इत्येवं प्राप्ते ब्रूमः। अयुक्तमतस्थैतस्यैवं निरूढकालतत्त्वेयः प्रद्वेषः स कस्य हे
तोरिति वक्तव्यं। कपिलमहामुनिना निरस्तत्वात्। किंवा सांख्यशास्त्रप्रणीतेष्वतत्त्वेष्वसंगृहीतत्वात्। उत लक्षणप्रमाणाभावाद्वा होस्वि
त्प्रमाणाभावात्।। अथवाप्रयोजनाभावात्। अथ तत्त्वगतपंचविंशतिसंख्याभ्यासपाटवेन वासिता* प्रद्वेषाद्यात्।। न प्रथम
कालनिराकरणस्य तस्य मुनिना प्रणीतस्यानुपलंभात्।। न द्वितीयः।। अतिप्रसंगात्।। ऋग्वेदादिप्रोक्तानां ज्योतिष्टोमादीनामा
युर्वेदधनुर्वेदगांधर्वप्रोक्तानामौषधशास्त्रस्वरादीनां चाग्रहीतत्वेन तेष्वपि त्वत्तः प्रद्वेषः केन वार्येत।। अथ पक्षे यो विशिष्यासं
गृहेपि सुखदुःखमोहात्मकत्वेन गुणत्रयांतर्भावादस्त्येवार्थात्संग्रह इत्युच्येत। तर्हि कालस्याप्यसौ न दंडवारित इति बुद्धि
समाधत्स्व।। कालस्य गुणत्रयपरिणामत्वे सावयवत्वमनित्यत्वं च घटादेरिव प्रसज्येतेति चेत्।। नित्यनिरवयवकाल ६

तत्त्वाभिनिवेशवतो वैशेषिकादेः पतत्वयं वज्रपातः शिरसि। वेदवादिनां तु न कापि क्षतिः।। कालस्योत्पत्तिसावयवत्वयोः प्रत्यक्षश्रु
तावुपलभ्यमानत्वात्।। तैत्तिरीयशाखायां नारायणीये कालोत्पत्तिराम्नायते।। सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।। कला मुहूर्ताः
काष्ठाश्चाहोरात्राश्च सर्वशः।। अर्धमासा मासा ऋतवः संवत्सरश्च कल्पंतामिति।। तस्यामेव शाखायामारुणकेतुकचयनप्रश्ने
सावयवत्वं श्रूयते।। उक्तो वेषो वासांसि च कालावयवानामितः प्रतीच्येषिति।। इतोस्मादनुवाकात्प्रतीच्येष्वस्तनेष्वनुवाकेषु काला
वयवानामृतूनां ध्यानवेषडक्तः वस्त्राणि चोक्तानीत्यर्थः।। नित्यत्वनिरवयवत्वाभिधायिनो वैशेषिकादिशास्त्रस्याप्रमाणतादेवता
इति वक्तव्ये सति क्षणिकनित्यतायामंतर्धानशक्त्युपेतयस्तराक्षसादिवत्तत्स्पर्शयोग्यावयवशून्यतायां च तात्पर्यं वर्णनीयं।। एवं च सति
विरोधाधिकरणन्यायोत्रानुगृहीतो भवति।। तस्य च न्यायस्य संग्राहकावेतौ श्लोकौ।। औदुंबरीं येष्टनीयास्सर्वेत्येषास्मृतिर्मि
तिः।। अमितिर्वेति संदेहे मितिः स्यादष्टकादिवत्।। औदुंबरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षवेदतः।। विरोधान्मूलवेदस्यानुमानाद
मानतेति।। अयमर्थः।। अध्वरे महावेद्यां सदो नामकस्य मंडपस्य मध्ये काचिदुदुंबरशाखा स्तंभत्वेन निखाता भवति तामुद्दिश्य
वस्त्रवेष्टनं स्मर्यते औदुंबरी सर्वा वेष्टयितव्येति। तत्र संशयः एषा स्मृतिः प्रमाणं न वेति। तत्र पूर्वाधिकरणेऽष्टकाः कर्त
व्या इति स्मृतेर्मूलवेदानुमापकत्वेन प्रामाण्यमुक्तं तेनैव न्यायेन सर्ववेष्टनस्मृतिः प्रमाणमिति पूर्वः पक्षः।। औदुंबरीं
स्पृष्ट्वोद्गायेति प्रत्यक्षश्रुतोस्य रोधो विधीयते।। न चासौ सर्ववेष्टने सत्युपपद्यते।। तथा च सर्ववेष्टनस्मृतिमूलभू

तद्वेदानुमानस्य प्रत्यक्षश्रुतिविरुद्धस्य कालात्ययापदिष्टत्वेन निर्मूलत्वेऽनन्यगतिरत्र प्रमाणमिति सिद्धान्त
इति॥ अथ मन्यसे महता तपसा शिवमाराध्य तत्प्रसादलब्धसर्वज्ञत्वपदः कणादमुनिर्वेदतात्पर्यं सम्य
ग्वेत्तीति वेदस्यैवमंदमतिप्रतीतादर्थादर्थान्तरं नेतव्यमिति। एवमपि यस्य प्रसादादियं सर्वज्ञता भगवन्त
स एव शिवो मुख्यः सर्वज्ञ इति तन्मतानुसारेण कणादमतस्यैवान्यथानयनम संततमुचितं। शिवो हि
सर्वेष्वागमेषु षड्त्रिंशत्तत्त्वानि शिवशक्ति निरूपयन् कालनेत्यस्योत्पत्तिमंगीचकार॥ निखिलशैवागमसारमार्याभिः संग्र
हानो भोजराजः षट्त्रिंशत्तत्त्वानि शिवशक्तिसदाशिवेश्वरविद्याख्यानि निर्दिश्येतराणि निर्दिष्टा माया कार्यं चोक्ता सर्वं क्रमे
ण कालं निरदिक्षत्॥ पुंसो जगत्कर्तृत्वेन मायातस्तत्त्वपंचकं भवति॥ कालो नियतिश्च तथा कला च विद्या च रागश्चेति॥ तानि
मायासहितान्येकादश तत्त्वानि सांख्यप्रसिद्धपंचविंशतितत्त्वानि चोद्दिश्य पक्रमेणैव विवृण्वन्निदमाह॥ नानाविधशक्तिमय
साजनयति कालतत्त्वमेवादौ॥ भाविभवद्भूतमयं कलयति दं जगदेष कालोऽत इति॥ तत्र टीकाकार एवं व्याचख्यौ॥ नन्वेष का ८
लो नित्यो नैयायिकादिभिरभ्युपगतः अत आह भाविभवद्भूतमयमिति॥ भूतादिरूपेण त्रिविधत्वादेवैतन्नुत्वे सत्यनेक
त्वेनास्यानित्यत्वं सिद्धमिति भावः॥ केन कार्येणास्य सिद्धिरत आह कलयति जगदेष कालोऽत इति॥ चिरक्षिप्रादिप्रत्य

योपाधिद्वारेण कलयत्याक्षिपतीत्यर्थ इति॥ इत्थं प्रत्यक्षश्रुतिसहकृतैरागमैः कणादशास्त्रस्य बाधे सत्यक्तरणीमीमांसागतदितीपाध्या
यप्रथमाधिकरणन्यायोप्यनुगृह्यते॥ तस्य च न्यायस्य संग्राहकौ श्लोकौ॥ सांख्यस्मृत्यास्ति संकोचो न वा वेदसमन्वये। धर्मे वेदः सा
वकाशोऽतः संकोचो नवकाशया। प्रत्यक्षश्रुतिमूलाभिर्मन्वादिस्मृतिभिः स्मृतिः। अमूला कापिली बाध्या न संकोचो नयालत इति। अय
मर्थः। ब्रह्मा घण्वेदादिभिरग्निहोत्रादिर्धर्मो ब्रह्मणो जगत्कर्तृत्वं च प्रतीयते। सांख्यस्मृत्यादिस्तु प्रधानस्य जगत्कारणत्वं प्रतिपा
दयति। तत्र तया स्मृत्या वेदस्य संकोचोऽस्ति न वेति संशये स्मृतेर्जगत्कारणमंतरेण निरवकाशत्वात्। प्राबल्यं वेदस्य तु धर्मे
प्रतिपाद्यत्वाद्दौर्बल्यं ततः स्मृत्यनुसारेण वेदः संकुचित इति पूर्वः पक्षः। प्रत्यक्षश्रुतिभिर्बह्वीभिरनुगृहीता वाह्या मन्वा
दिस्मृतयो ब्राह्मणः कारणतामावदंति। सांख्यस्मृतिस्तु स्वकामूलहीना चेति दुर्बलत्वात् सैव बाध्यातो नास्ति वेदस्य संकोच
इति सिद्धांतः॥ अथ तार्किकत्वाभिमान यस्त्वेह गृहीतः स न्यायवशस्त्वं ब्रूषे भूतादीनामौपाधिकानां कालविशेषाणामेवोत्पत्ति
र्न तु निरुपाधिकमुख्यकालस्येति। तर्हि कूपरिकान्वेषणाय प्रवृत्तश्चिंतामणिमलभत इत्यस्य वासिष्ठरामायणप्रोक्तस्या
भाणकस्य त्वमेव विषयो भूः यतः साधर्म्यवैधर्म्यज्ञानाय द्रव्याण्यन्विष्यन्परब्रह्मतत्त्वमवागमः। व्यवहारहेतुभूतो
भूतादिकालविशेषाणामाधारः स्वयं व्यवहारातीतो नित्यो निरवयवो मुख्यः कालो यः स परमात्मैव। तथा च

ध्वतराश्चामनंति॥ कालकलोगुलीसर्वविषइति॥ आत्मानित्यत्वानित्यत्वसावयवत्वनिरवयवत्वचिंता सर्वथाप्यस्तिसांख्यतंत्रेप्या
र्थिकः कालस्यसंग्रहः॥ साचात्तंग्रहणाधवस्क ज्योतिष्टोमादिवत्सर्वतिपुरुषविवेकानुपयोगात् तदुत्यवगंतव्यं। द्वितीयचतुर्थप
क्षौ तु भवतो वैशेषिकशास्त्रपरिचयगंधोपि नास्तीति प्रकरणस्य नः। वैशेषिकग्रंथेषु सर्वेष्वपि कालप्रकरणे तद्लक्षणस्य तत्साध
कानुमानस्य च श्रयं चिंतितत्वात्॥ प्रमाणांतराणि तु कालसाधकानि कैश्चिदेवोपन्यस्तानि॥ तथा च तैत्तिरीया आरुणकेतुके मंत्रमाम
नंति॥ स्मृतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयं। एतैरादित्यमंडलं सर्वैरेव विधास्यतिइति। तत्र स्मृतिरनुमेयश्रुतिमूलं मन्वादिशा
स्त्रं। प्रत्यक्षं श्रोत्रग्राह्योऽहनिशो वेदाख्यो चरराशिर्योगिप्रत्यक्षो वा उपनिषदाभिमतं साक्षिप्रत्यक्षं वा। ऐतिह्यमितिहास
पुराणादिकं ज्योतिःशास्त्रस्याप्यत्रांतर्भावो द्रष्टव्यः॥ अनुमीयते स्वमूलभूतं स्मृतिवाक्यमनेनेत्यनुमानः त्रिस्त्वा
रः॥ तस्य च स्मृत्यनुमापकत्वमाचार्यैर्विस्पष्टमभिहितं॥ आचाराद्धि स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनमिति। तदेवं स्मृ
त्यादीनां चतुष्टयं संपन्नं। एतैश्चतुर्भिः सर्वैरप्यादित्यमंडलं प्रमीयत इति मंत्रस्यार्थः॥ ननु स्मृत्यादीनि मंडले साधक
त्वेनात्रोपन्यस्तानि न तु कालसाधकत्वेनेति चेत्॥ मैवं॥ मंडलस्य सर्वजनीनप्रत्यक्षसिद्धत्वेन तत्र स्मृत्याद्यनुपयोगा
त्॥ कालविवक्षयैवात्र कालनिर्वाहके मंडले तान्युपन्यस्तानि। तथा च मंडलद्वारा कालस्तैः प्रमीयते। कालविवक्षा चोत्तर
मंत्रे प्रतिस्फुटा॥ तत्रानंतरो मंत्र एवमाम्नायते॥ सूर्यो मरीचिमादत्ते सर्वस्माद्भुवनादधि। तस्याः पाकविशेषेण स्मृतं



कालविशेषणमिति॥ तस्यायमर्थः॥ भुवनगतं सर्वमन्नजातमधिकृत्य रसवीर्यविपाकादिभिस्तत्र तदनुग्रहसमर्थं मरीचिं सू
र्यः स्वीकरोति॥ तत्कृतेन च तया कविभेदेन निमेषादिभिः परार्धपर्यंतः कालविभेदोस्माभिरवगतो भवतीति। कालप्रतिपा
दकानि च स्मृत्यादीन्युदाहरामः॥ तत्र मनुः॥ कालं कालविभक्तिं चेति सृष्टिप्रकरणे कालं व्यवजहार। याज्ञवल्क्योपि। आ
द्यः कालः प्रकीर्तितादृति॥ एवमन्यास्वपि स्मृतिषूदाहार्यं। श्रुतिष्वपि। स तं यश्चैष प्रीविचिनोति काल इति बह्वृचाः॥ अहमेव
कालो नाहं कालस्येति तैत्तिरीयाः॥ कायसंध्या ऊर्ध्वसंध्यायाः काल इति सामगाः॥ योगशास्त्रेपि॥ संयमविशेषाभ्यासेन ध्या
नसमाधित्रयरूपायोगिनोतीतादिकालं प्रत्यक्षतः पश्यंतीत्यभिहितं॥ तथा च पातंजलं सूत्रं। परिणामत्रयसंयमादती
तानागतज्ञानमिति॥ साक्षिप्रत्यक्षमप्यहमस्मिन्काले निवसामीत्यनुभवैतत्तावत्सर्वजनीनः॥ न च वासौ बाह्येंद्रियहीनतः
कालस्य रूपादिहीनत्वात्। नापि मानसः। तार्किकैस्तदनंगीकारात्॥ नाप्यनुमानादिजन्यः। अपरोक्षप्रत्ययत्वात्। अतः
सामग्र्यभावेप्यपरोक्षत्वं नात्मसाक्षिप्रत्यक्षमेतदित्यौपनिषदा मन्यंते॥ इतिहासोपि॥ महाभारते पठ्यते॥ प्रहरौ घटि
कानष्टो प्रहरौ घटिकाधिकौ। स कालः कल्परूपो हि पाति नृणां दत्ते मत्त्यभूमिति॥ पुराणेपि॥ अनादिरेष भगवान्कालो
नंतोतरः पर इति॥ ज्योतिःशास्त्रे पौर्णमासाख्ये काले आह्निके तुकसंज्ञकानि स्वस्वकालोचितानि देवविशेषेभ्यः क्षीरद
ध्यादिसमर्पणादिकान्धर्मविशेषान् भानुवारादिकालविशेषे समाचरंति। तदेवमनेकप्रमाणप्रमिते कालेप्रा

माणाभावरूपश्चतुर्थः पक्षः कथमाश्रीयते॥ नापि प्रयोजनाभावादिति पंचमः पक्षो युज्यते॥ तार्किकैस्तावत्सर्वोत्पत्तिमन्निमित्त
कारणत्वमनुघोषितं। लोके च तस्योपयोगः कालविशेषस्य कृषीबलादिभिर्व्यवह्रियते॥ शास्त्रे वेदप्रामाण्यपक्षे प्रयोगो ज्योतिःशा
स्त्रप्रसिद्धः। श्रौतस्मार्तकर्मोपयोगस्तु प्रदर्शयिष्यते॥ तस्मा[illegible] षष्ठः पक्षः परिशिष्यते॥ तथा च
पापात्मनः स्वस्य बुध्यपराधं पुण्यात्मनि माधवाचार्ये समारोपयन् कृपावान्निश्चयानंदोसि॥ तदेवं कालस्य प्रत्याख्यातुमश
क्यत्वात्तन्निर्णयोद्यमः सफल इति सुस्थितं॥ ननु कतरः कालोऽत्र निर्णीयते किं केवलकाल उत कालकालः॥ ननु किमित्य
प्रसिद्धमाख्याभीषयसि॥ न भीषयाम्यहं किंत्वस्त्येव कलयितव्यभेदात्कालद्वैविध्यं। येन प्राणिदेहादयोऽतीतवर्तमानादिरू
पेण कलयितव्याः स केवलः। स एव तत्त्वप्रकाशवचनेन पूर्वकृदाहृतः॥ कलयति जगदेष काल इति॥ तादृशः कालोप्युत्पत्ति
स्थितिविनाशकारिणा येन कलयितव्यः स कालकाल इति॥ स च वासिष्ठरामायणे दर्शितः। कालोपि कल्प्यते येनेति। श्रुति
श्च भवति॥ स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबंध
हेतुरिति॥ कूर्मपुराणेपि। अनादिरेष भगवान्कालोऽनंतोऽजरः परः॥ सर्वगत्वात्स्वतंत्रत्वात्सर्वात्मत्वान्महेश्वरः। ब्रह्मा
णो बहवो रुद्रा अन्ये नारायणादयः॥ एको हि भगवानीशः कालः कविरिति स्मृतः। ब्रह्मनारायणेशानां त्रयाणां प्रसंतो
लयः। प्रोच्यते कालयोगेन पुनरेव च संभवः। परं ब्रह्म च भूतानि वासुदेवोपि शंकरः। कालेनैव च सृज्यंते स एव ग्रसते पु

८

नः। तस्मात्कालात्मकं विश्वं स एव परमेश्वर इति॥ विष्णुधर्मोत्तरेपि॥ अनादिनिधनः कालो रुद्रः संकर्षणः स्मृतः॥ कलनात्सर्वभू
तानां स कालः परिकीर्तितः॥ कर्षणात्सर्वभूतानां स तु संकर्षणः स्मृतः॥ सर्वभूतशमित्वाच्च स तु रुद्रः प्रकीर्तितः। अनादिनिध
नत्वेन स महान्परमेश्वर इति। ज्योतिःशास्त्रेपि॥ भूतानामंतकृत्कालः कालोऽन्यः कलनात्मक इति॥ तत्रैवं सति द्वयोर्मध्ये का
लकालोऽत्र तावन्न निर्णेतव्यः॥ तस्य धर्मानुष्ठानेऽहेयत्वात्॥ अनुपादेयत्वाच्च। यस्त्वितरो मासपक्षतिथ्यादिरूपः सोपि ज्यो
तिःशास्त्र एव सम्यङ्निर्णीत इति चेत्तन्न। अनया कालनिर्णयप्रवृत्त्येति श्रान्ते क्रमः। उभयमप्यत्र निर्णेतव्यं॥ कालकालस्य जगदी
श्वरस्य सर्वारंभेष्वनुस्मर्तव्यत्वात्॥ अत एव शिष्टाः पुण्याहवाचनादावीश्वरमनुस्मरंति॥ सर्वेषु कालेषु समस्तदेशेष्वशे
षकार्येषु तथेश्वरेश्वरः॥ सर्वैः स्वरूपैर्भगवाननादिर्ममास्तु मांगल्यविवृद्धये हरिः॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रि
यादिषु॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमिति॥ मासादिरूपभेदस्य तु स्वरूपेण विशारदत्त्वेपि श्रौतस्मार्तकर्मवि
शेषेण सह कालस्यांगांगिभावो निर्णेतव्यः॥ यद्यप्यसौ हेमाद्रिप्रभृतिषु ग्रंथेषु निर्णीतस्तथाप्यनेकत्र विप्रकीर्णस्यैकत्र संग
हार्थमत्र यत्नः क्रियते॥ तदेवं विवक्षितग्रंथस्य कालरूपो विषयः संग्रहरूपं प्रयोजनं चास्तीति ग्रंथः प्रारभ्यते॥ नित्योऽ
न्यश्च कालो द्वेधा तयोराद्यः परेश्वरः। सोवाङ्मनसगम्योपि देही भक्तानुकंपयेति॥ नित्यकालस्य परमेश्वरत्वे प्रमाणं पूर्वमेवो
पन्यस्तं॥ परमेश्वरस्य चावाङ्मनसगोचरत्वे सर्वे वेदांतास्तदनुसारि स्मृतिपुराणानि तत्त्वविदनुभवश्च प्रमाणं॥ भक्ता
नुग्राहिमूर्तिस्वीकारश्च तलवकाराख्ये सामवेदशाखाविशेषे कस्यांचिदाख्यायिकायामाम्नायते॥ तस्यां चाख्यापि

कायामेवमुक्तं। अग्निवाय्विन्द्रादयो देवा ईश्वरानुगृहीताः सर्वत्र विजयमानाः स्वकीयमेवेतत्सामर्थ्यमिति मन्यमानं तं
तान्बोधयितुमेवास्मिन्सगन्धं परमेव ब्रह्म सगुण्यां च स्तुगम्यां कांचिन्मूर्तिं धारयित्वा प्रादुर्बभूव॥ तया सह संवादं कृत्वापि राज
सचित्ता वह्निवाय्वादयस्तत्वेनैव बुबुधाते। इन्द्रस्तु सात्विकचित्तो बुबुध इति। वासिष्ठरामायणेपि शुक्रोपाख्याने शुक्रेणेन्द्र
मवलोक्य तत्वेन तारंगुः कृच्छ्रेमारयितारं कालं शरणमुपेतः। तदानीं कालोनुग्रहीतुमीदृशोनुरूपेण विर्बभूवेतिपद्यते॥ अ
थाकलितकल्पोसौ कालः कवलितप्रजः। अधिज्योतिकमास्थाय वपुर्मुनिमुपाययौ॥ खड्गधारा धरः श्रीमान्कुंडलीकव
चान्वितः॥ कृतुषट्कमयोदारवक्त्रमहत्समन्वितः॥ मासद्वादशकोद्दामनुजद्वादशकोत्कटः॥ स्वाकारसमयावष्टब्धः ततः किंकर
सेनया॥ सततेत्यप्रणम्यादौ कुपितं तं महामुनिं॥ कल्पक्षुब्धगंभीरं सांत्वपूर्वमुवाच ह॥ त्वमत्येतं तपावित्रवयं नियतिपाल
काः॥ तेन संपूज्यसे ह्यस्य साधो नेतरये छया॥ मा तपः च पया बुद्धे कल्पकोलमहानलैः। योनदग्धोस्मि मे तस्य किं च शापेन
धक्ष्यसि॥ संसारावलयो ग्रस्तानि गीर्णानि रुद्रकोटयः॥ भुक्तानि विष्णुवृंदानि केनशक्तावयं मुने॥ भोक्तारो हि वयं ब्रह्मन्भोज्यं नो
युष्मदादयः॥ स्वयं नियतिरेषा हि नावयोरेतदीहितमिति॥ नन्वेवमुक्तानुज्ञिद्यत्यालता मूर्तिरीदृश्येवेति कश्चिन्नियमो नेति॥ १०
सर्वात्मकस्य परमेश्वरस्य भक्तचित्तेप्रियायाः सर्वस्या अपि मूर्तेः स्वकीयत्वात्॥ अत एव भगवद्गीतायां॥ यो यो यां यां त
नुं भक्तः श्रद्धयार्चितुमिच्छति॥ तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं॥ स तया श्रद्धया युक्तस्तस्याराधनमीह



ते। लभते च ततः कामान्मयैव विहितान्हितानिति॥ विष्णुरुद्रादिचेतनमूर्तिवदचेतनमूर्तयोपि तत्तत्फलविशेषाभिरीश्वरत्वे
नोपास्याः॥ तदेतदृग्वेदे समाम्नायते॥ एतं ह्येव बहवृचा महत्युक्थे मीमांसंत एतमग्नावध्वर्यव एतं महाव्रते छंदोगा एतमस्या
मेतं दिव्येतं वायावेतमाकाश एतमप्स्वेतमोषधीष्वेतं चंद्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्विति॥ वाजसनेयिनोपि मंडलब्राह्मणे तमेत
मग्निरित्यध्वर्यव उपासतइत्यारभ्य पठंति॥ विषमिति सर्पाः सर्प इति सर्पविदऊर्गिति देवा रयिरिति मनुष्या मायेत्यसुराः स्वधेति
पितरो देवजन इति देवजनविदो रूपमिति गंधर्वा गंध इत्यप्सरसस्तं यथा यथोपासते तदेव भवतीति॥ तैत्तिरीयाश्च पठंति क्षे
म इति वाचि योगक्षेम इति प्राणापानयोरित्यादि परब्रह्मण्यारोपितं यथा व्यक्तरूपमस्ति तेन सर्वेणाप्युपासनाय परमेश्वरो
रूपवान्भवतीति हिरण्मयाधिकरणे मनोमयाधिकरणयोः प्रपंचितं॥ एवं च सति योग्यायत्यायत्क कर्मारभते स तदा तत्के
र्मण्युक्तं कालात्मकस्येश्वरस्य मूर्तिमिष्टदेवतारूपेणानुस्मरेत्॥ अत एव मंत्रशास्त्रेषु नानाविधानि ध्यानान्युपदिष्टा
नि॥ लोकेप्याविष्णुदासगोपालं सर्वेपि जना एकैकां देवतां स्वेच्छया भजंतीति॥ तदेतद्भगवानाह॥ यजंते सात्विका देवान्यक्षर
क्षांसि राजसाः॥ प्रेतान्भूतगणांश्चान्ये यजंते तामसा जना॥ तस्मादारभ्यमाणकर्मफलप्रदो निजेष्टदेवतारूपो नित्यः का
लः कर्मारंभेषु अनुस्मर्तव्य इति सिद्धं॥ ॥अथ जन्यकालं निरूपयामः॥ ॥ ननु कालस्य जन्यत्वे सति कथं प्रलये कालव्य
व्यवहारः॥ प्रलयकालः प्रजयोतीतः प्रलयो भावीति। कालनित्यत्ववादिनस्तवापि समो दोषः। नित्यस्य कालस्य तपन

परिमांशाद्युपाधिभिः परिच्छेदे सत्येतावान् कालः इति कालेयत्तावर्णयितव्या न च प्रलये तदुपाधयः संति अतस्तत्र कथं
यणादिकेन ॥ अन्यथादीर्घादीनाङ्कारा प्रलयकाले इयत्तानिर्णयः ॥ अथ सत्कार्यवादाभ्युपगमे नोपाधयोपि
वासनारूपेण संति कालेपि तद्दितिस्समानो ॥ न चैतावता नित्यत्वप्राप्तिः उपाधिषु तदनङ्गीकारात् ॥ अथ मन्यसे इयत्तारहिते
पि प्रलयकाले सृष्टिकालेयत्तावासनावशादियत्ताव्यवह्रियते तत्रोपाध्यायत्वादिदृष्टान्तः । यथा कश्चिन्माणवकादिस्त्रि
द्वर्षवयस्कादध्येतुमुपक्रम्य संवत्सरमधीत्यास्मदुपाध्याय एकत्रिंशद्वर्षवयस्क इत्यध्ययनरहितेप्यतीते वयस्युपाध्या
यत्वं व्यवहरति इदं इयत्ताव्यवहारः । एवं तर्ह्यनेन न्यायेन कालरहिते प्रलये कालव्यवहारः किं न स्यात् ॥ कालरहितं प्रलयादिकं
वस्त्वस्तीति मांडूक्यादिश्रुतयोभ्युपगच्छन्ति ॥ तथा च श्रूयते यच्चान्यत्त्रिकालातीतं तदप्योंकार एवेति ॥ आभाकराश्चाह
र्वस्य कालत्रयासंस्पृष्टां कांचिदवस्थामाहुः ॥ तस्मात्कालः सुखेन ज्ञायतां । स च सामान्यविशेषाभ्यां द्विविधः ॥ तस्याद्यो भये
त्येश्वराख्या कालान्निर्यत्यविं दुत्पत्तिमनुराह ॥ कालं कालविभक्तिं च नक्षत्राणि ग्रहांस्तथा । सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन्नि
माः प्रजा इति ॥ तत्राद्यः सामान्यकालः सविशेषेष्वनुगतत्वात्तदपेक्षयानित्यो ग्रहगत्यादिभिरनुमेयोऽनुत्पत्तिनिमित्तकार ११
णमिति तार्किकज्योतिषिकादयः प्रतिपेदिरे ॥ तत्र ज्योतिषिका आहुः ॥ अभवविरतिमध्यज्ञानबन्ध्यानितान्तं विदितपरम
तत्त्वायत्र ते योगिनोपि ॥ तमहमिह निमित्तं विश्वजन्मात्ययानामनुमितमभिवन्दे भग्रहैः कालमीशं ॥ युगवर्षमास

दिवसाः समं प्रवृत्तत्वाच्च चैत्रशुक्लादौ ॥ कालोयमनाद्यन्तो ग्रहभैरनुमीयते स्तेनइति ॥ कालविशेषेषु संवत्सरः प्रधानभूतः । अन्ये सर्वे गुण
भूताः । तथा चारुणकेतुके समाम्नायते ॥ नदीव प्रभवात्काचिदक्षय्यात्स्यन्दते यथा । तां नद्योभिसमायान्ति सोरुः सती न निवर्तते । एवं
नानासमुत्थाना कालाः संवत्सरं श्रिताः ॥ अणुशश्च महशश्च सर्वे समवयन्ति तं ॥ स तैः सर्वैः समाविष्ट ऊरुः सन्न निवर्तत इति ॥ भि२
अयमर्थः । भागीरथीगोदावर्यादिका नदी वायं कालः अतश्चिद्दविनाशादुत्पत्तिस्थानादुत्पद्यते तच्चोत्पत्तिस्थानं सांख्यो ह्यत्र हेतिवी
शेषागमो ह्यायावाह्यति स्फुरत्स्फुरितनित्यकालात्मकईश्वरो वा भविष्यति । यथा तां गंगादिकां नदीमन्या अल्पनद्योभितः प्रविश
न्ति सा च प्रविष्टैर्नदीतैरेः सह विस्तीर्णा प्रवहन्त्यवारा सती न कदाचिद्विशुष्यति ॥ एवं नानाविधरूपैः समुत्पन्नाः कालभेदाः संवत्स
राख्यं प्रधानं कालमाश्रिताः । तत्र निमेषाद्या अयनपर्यन्ताः कालभेदाः संवत्सरादर्वाक् युगाद्याः परार्धपर्यन्ताः संवत्सरान्तर्गताः
ते सर्वे तं संवत्सरं सम्यक् प्रविशन्ति अणूनामवयवत्वेन प्रवेशः । महतां तु संवत्सरावृत्तिनिष्पाद्यानां मध्ये सः संवत्सर इति तत्र
प्रवेशोभिधीयते ॥ तथा च वेदांगे ज्योतिषग्रंथे पठ्यते । पंचसंवत्सरमयं युगाध्यक्षं प्रजापतिं । दिनर्त्वयनमासांगं प्रणम्य शिर
साक्षित इति । स च संवत्सरस्तैरणुभिर्महद्भिः सर्वैः समाविष्टोतिदीर्घस्सन्नास्मिञ्जगति नोच्छिद्यत इति । नन्वल्पत्वं निमे
षपर्यवसितं महत्त्वं च परार्धे तथा च तयोरन्यतरस्य प्राधान्यमुचितं तत्र कथं संवत्सरस्य प्राधान्यमिति चेत् ॥ ईश्वरेण
प्रथमं सृष्टत्वादिति ब्रूमः ॥ तथा च वाजसनेयिनः समामनन्ति सो कामयत द्वितीयो मे आत्मा जायेतेति स मनसा वा [redacted]
ति

च्चामिथुनं समभवत्तद्घेऽत आसीत् स संवत्सरोभवदिति॥ तस्मात्संवत्सरः प्रधानं॥ अत एव वयं संवत्सरमारभ्य कालविशेषं
निर्णयामः॥ तत्र संवत्सरोयनमृतुर्मासः पक्षस्तिथिर्नक्षत्रमित्येवंविधाः कर्मकालाः। यद्यपि पुराणेषु मत्स्यमार्कंडेयादीनां यु
गकल्पादिपरिमितं स्मर्यते तथापि शतसंवत्सरायुषो मनुष्यानेवाधिकृत्य धर्मशास्त्रप्रवृत्तेर्न युगादिनिर्णयोत्रोपयु
क्तः॥ मनुष्याधिकारत्वं चास्माभिः पराशरस्मृतिव्याख्याने मनुष्याणां हितं धर्ममित्यस्मिन्वचने प्रपंचितं॥ ये तु कलौ प
चविंशे ये दिव्यादयो मनुष्यधर्मास्तेष्वपि न युगादिकं निर्णेतव्यं॥ संदेहाभावात्॥ न च शतायुषामधिकारे कथं संवत्सरसत्रश्रु सहस्र५
तिरिति शंकनीयं॥ तत्र संवत्सरशब्दो दिवसपर इति षष्ठाध्यायस्य सप्तमपादे निर्णीतत्वात्॥ ये च संवत्सरा हस्रिसाध्या अनं
तव्रतादयस्तेष्वपि न संवत्सरादधिकः कश्चित्कालो निर्णेतव्योस्त्यतः संवत्सरमारभ्यार्वाच एव निर्णेतव्याः कर्मांगकालाः। न च का
लस्य कर्मांगत्वे विवदितव्यं॥ सायं जुहोति प्रातर्जुहोतीति वाक्येषु सप्तमीतेस्तत्र कर्मणस्तावद्यत्रार्वाविषयत्वात्प्राधान्यम
भ्युपगंतव्यं तेषां च कालस्य गुणत्वेनान्वयः परिशिष्यते॥ अत एव गर्गः॥ तिथिनक्षत्रवारादि साधनं पुण्यपापयोः॥ १२
प्रधानगुणभावेन स्वातंत्र्येण न ते क्षमा इति॥ तस्मादंगभूतेषु निर्णेयेषु कालेष्ववयवित्वेन संवत्सरस्याभ्यर्हितत्वा
दल्पवक्तव्यतया सूचीकटाहन्यायानुसाराच्च स एवादौ निर्णीयत इति स्थितं॥ ॥इति माधवीये उपोद्घातप्रकरणं॥



संवत्सरो नाम अयनाद्यवयवयुक्तोवयवी कालविशेषः॥ सम्यग्वसंत्यस्मिन्नयनर्तुमासादय इति व्युत्पत्तेः॥ स च द्वादश
मासात्मकः॥ द्वादश मासाः संवत्सर इति श्रुतेः॥ मासानां तु चांद्रसावनसौराख्येन दिवसभेदेन चांद्रादित्रैविध्यं वक्ष्यते॥ मास
त्रैविध्येन संवत्सरस्त्रिविधः॥ तदुक्तं ब्रह्मसिद्धांते॥ चांद्रसावनसौराणां मासानां तु प्रभेदतः। चांद्रसावनसौराख्यास्त्रयः
संवत्सरा अपीति॥ तत्र चांद्रः संवत्सरश्चैत्रशुक्लप्रतिपदादिः फाल्गुनदर्शांतः। सौरस्तु मेषादिमीनांतः॥ सावनः षष्ट्यु
त्तरशततत्र्याहोरात्रात्मकः। ते च त्रयः संवत्सराः केषुचित्कर्मसु व्यवतिष्ठंते केषु विकल्प्यंते। तद्यथा भविष्योत्तरपुराणे सं
वत्सरसाध्यं तिलकव्रतं पठ्यते॥ वसंते किंशुकाशोकशोभिते प्रतिपत्तिथिः। शुक्ला तस्यां प्रकुर्वीत स्नानं नियममास्थितः।
ललाटपट्टे तिलकं कार्यं चंदनपंकजं॥ ततः प्रभृत्यनुदिनं तिलकालंकृतं मुखं। धार्यं संवत्सरं यावच्छशिनेव नभस्तल
मिति॥ तत्र संवत्सरश्चांद्रोवगंतव्यः। शुक्लपक्षप्रतिपत्तिथ्योस्तल्लिंगत्वात्॥ न हि शुक्लेतरस्य पक्षौ प्रतिपदादितिथयश्च
सौरसावनमासोपजीवने न प्रवृत्ताः। यत्तु नव वर्षाणि पंच चेत्यादिसंवत्सरस्यानंतव्रतादौ गृहीतं स्मर्यते तत्रापि चांद्र
एव संवत्सरः। शुक्लपक्षे चतुर्दश्यामित्यादिलिंगात्॥ न चैवं चैत्रप्रतिपदुपक्रमामावास्यांतश्चांद्रो वा शंकनीयः। तदुपक्रमस्य संवत्सरस्य
सृष्ट्युपक्रमत्वादत एव ब्रह्मपुराणे लिखितं॥ चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेहनि। शुक्लपक्षे समग्रं तु तदा सूर्योदये सति।
प्रवर्त्तयामास तदा कालस्य गणनामपि॥ ग्रहान्नागानृतून्मासान्वत्सरान्वत्सराधिपानिति॥ चांद्रसावनसौरेष्वेषु

त्प्रवृत्तिनिमित्तान्युच्यंते॥ चंद्रकलावृद्धिक्षयप्रयुक्तप्रतिपदादितिथीनां षष्ट्यधिकशतत्रयेण निष्पन्नोयः स चांद्रः॥ द्वादशराशि
षु सूर्यसंक्रमणैर्निष्पन्नोयः स सौरः। सवनशब्दोहोरात्रोपलक्षकः। सोमयागे सवनत्रयस्याहोरात्रसंपाद्यत्वात्॥ तैश्च सवनैः षष्ट्य
धिकशतत्रयसंख्याकैः संपन्नोयः स सावनः॥ एवं च सति वर्त्तमानभाद्रशुक्लचतुर्दशीमारभ्यागामिभाद्रशुक्लचतुर्दश्याः प्राची
ने तिथिसमुदाये चांद्रसंवत्सरत्वमविरुद्धं॥ यच्च निरूढपशुबंधप्रकरणे श्रूयते। तेन संवत्सरे संवत्सरे यजेतेति॥ प
शुना संवत्सरो नातीयादिति च तत्रापि चांद्र एव द्रष्टव्यः॥ सर्वानूलोकानूपशुबंधयाज्यभिजयतीति न यच्चमाणोमावास्यायां
पौर्णमास्यां वेति कल्पसूत्रकारैश्चांद्रतिथौ तदनुष्ठानविधानात्॥ सो एकः संवत्सरः कृजन्मा वाग्निचनादावुपयुज्यते। तच्च
व्रतं विष्णुधर्मोत्तरे स्मर्यते। भगवन्कर्मणा केन तिर्यग्योनौ न जायते॥ म्लेच्छदेशे च पुरुषस्तन्ममाचक्ष्व वै मुने। मार्कंडे
य उवाच॥ मेषसंक्रमणे भानोः सोपवासो नरोत्तम॥ पूजयेद्भार्गवं देवं शक्त्या यथाविधि इत्यारभ्य मीनसंक्रमणे मा
त्स्यं शत्रु देवं च पूजयेदित्यनेन ग्रंथेन व्रतं विधायांते तदुपसंहृतं। एवं चाव्रतं वत्सरमेतदिष्टं म्लेच्छेषु तिर्यक्षु न चापि जन्मे
ति। तथा चांद्रपुराणे धान्यदानव्रतं पठ्यते॥ अथातः संप्रवक्ष्यामि धान्यव्रतमनुत्तमं॥ अयने विषुवे चैव [illegible]त्या १२
वि चन्दनादिना व्रतं विधायैवमुपसंहृतं। एवं संवत्सरे पूर्णे [illegible]यदि धापनक्रियामिति। सावनस्य स[illegible]त्रादा
वुपयोगः। न[illegible] विष्णुधर्मोत्तरे। सत्राण्युपास्यान्यथ सावनेन लोकांश्च यत्स्याद्व्यवहारकर्मेति॥ गोस

सत्रं वै संवत्सरो य एवं विद्वांसः संवत्सरमुपयंति ऋध्नुवंत्येवेति श्रुतौ गवामयनस्य सत्रस्य संवत्सरनामत्वव्यवहारा
त्संवत्सरकालस्तदंगमिति प्रतीयते तत्र सावनो गृहीतव्यः। चांद्रसौरयोर्मानयोस्तदनुष्ठानासंभवात्॥ तथाहि। अहोरा
त्रसाध्य एकः सोमयागो वेदे ह्यहःशब्देनाभिधीयते। तादृशानामह्नां विशेषाणां गणः षडहः स द्विविधः॥ अभिप्लवः पृष्ठ्यश्चे
ति॥ तत्र चत्वारोभिप्लवाः षडहाः एकः पृष्ठ्यः षडह इति षडहपंचकेन एको मासः संपद्यते॥ तादृशैर्द्वादशभिर्मासैः सा
ध्यः संवत्सरसत्रं। तथा च सावनेनैव तत्सिद्धिः। चांद्रस्य षड्भिरहोरात्रैर्न्यूनत्वात् सौरस्य सपादैः पंचभिरहोरात्रैरधिकत्वा
त्॥ ननु संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्निति माघमासगतायामष्टम्यां चांद्रतिथौ सत्राय दीक्षा श्रूयते तत
श्चांद्रेणैव संवत्सरेण भवितव्यमिति चेत् मैवं। उक्तस्य दीक्षाकालस्य पूर्वपक्षरूपत्वात्॥ तन्निराकरणं श्रूयते। आर्त्तं वा एते संवत्स
रस्याभिदीक्षंते य एकाष्टकायां दीक्षंत इति। व्यस्तं वा एते संवत्सरस्याभिदीक्षंते य एकाष्टकायां दीक्षंत इति
ननु पक्षांतरमपि चांद्रतिथिमेवोपजीव्य श्रूयते। फाल्गुनीपौर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्य यत्फा
ल्गुनीपौर्णमासीति। न तस्यापि निराकृतत्वात्। तस्यैकैव निर्येति हि निराकृतं। एकैव निर्या एक
एव दोष इत्यर्थः। ननु सिद्धांते ष्येवं श्रूयते। चित्रापूर्णमासे दीक्षेरन्मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्ण

मासोत्सृष्टएव संवत्सरमारभ्य दीक्षंते तस्य न काचन निर्या भवति चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन्नित्येषामेकाष्टकायां क्रयः संप
द्यत इति। वाक्यमस्त्येवमंगीकृत्य दीक्षोपक्रमे चांद्रतिथ्युपजीवनं तथापि तीर्थकर्मणि सावनग्रहणे को बाधः। न चास्ति बाधः
तैः पूर्वपक्षे कृत्यासंपद्यत इति सुत्यारव्ये प्रधानकर्मणि चांद्रस्य कृत्स्नपक्षस्योपजीवनात्॥ उपजीव्यमानां नामक्षत्रः पक्षस्तथा
पि यथोक्तप्रकारेणोत्सृष्टत्वस्य प्रधानकर्मणः सावनमितैरेवाहोभिर्निर्वाहात्तस एवात्र ग्राह्य इति। अयनेष्वप्युत्सर्गिणामय
नि कुंडपायिनामयने तुरायणादौ चयोजनीयः। तेषां गोसत्रविशेषत्वात् यत्र तु चांद्रादिनियामकं नास्ति तत्रेच्छिको वि
कल्पः। तथाहि पिप्पलादशाखायामाथर्वणिक भारद्वाजादीनां षण्णां मुनीनां विद्याधिकारसिद्ध्ये गुरुणा पिप्पलादेनादि
ष्टं संवत्सरं वासमामनंति। भूय एव तपसा ब्रह्मचर्येण श्रद्धया वा संवत्सरं वत्स्यथ यथाकामं प्रश्नान्पृच्छतेति॥ बह्वृचास्त्वेतमेवा
र्थं व्यतिरेकमुखेनामनंति॥ नाएतां संहितां नानैते वासिने प्रब्रूयान्नासंवत्सरवासिन इति। तैत्तिरीयाश्चारुणकेतुकमग्निं
चेष्यमाणस्य दीक्षावरणस्नानादिरूपं व्रतमामनंति॥ संवत्सरमेतद्व्रतं चरेदिति। एवंविधेषु प्रदेशेषु नियामकाभावाच्चां
द्रादिनामधेयानामन्यतमदिच्छया ग्रहीतव्यः। ननु संवत्सरस्य चांद्रसौरसावनभेदेन त्रैविध्यमेवांगीकृत्य तत्तद्रूपविनियोगा
वुक्तौ। तत्र त्रैविध्यनियमो युक्तः। अन्ययोरपि नाक्षत्रबार्हस्पत्ययोर्द्विविधयोः संवत्सरयोर्विद्यमानत्वात्॥ तथात्या
युर्वेदविदः पठंति॥ सौरबार्हस्पत्यसावनशशधरनाक्षत्रिकाः क्रमेणाब्दाः। मातुलपाताललुलविमलवरांगानि



×पातालनराः श्चैक षष्ठ्युत्तरशतत्रयं श्रुते। तावद्दिवसपरिमितः कालो बृहस्पतेः संवत्सर ×२

श्च वत्सराः पंचेति॥ अस्यायमर्थः। गणकप्रसिद्ध्या अक्षरसंख्यया मातुलशब्दः पंचषष्ट्यधिकशतत्रयमाचष्टे॥ तावद्दिवसपरिमि
तः कालः सौरः संवत्सरः। अकुलशब्दः षष्ट्यधिकशतत्रयमाह॥ तावद्दिवसपरिमितः सावनः संवत्सरः। विमलशब्दः चतुः
पंचाशदधिकशतत्रयमाचष्टे॥ तावद्दिवसपरिमितश्चांद्रः संवत्सरः। वरांगशब्दश्च त्रिंशदधिकशतत्रयमाह। तावद्दिवस
परिमितो नाक्षत्रिकः संवत्सर इति। एवं तर्हि स्फुटसंवत्सरः पंचविधः। तत्र नाक्षत्रिकस्य ज्योतिःशास्त्रप्रसिद्धेराय्युदायादावुप
योगो द्रष्टव्यः। बार्हस्पत्यस्तु सिंहबृहस्पत्यादिविशेषमुपजीव्य गोदावर्यादिस्नानादौ विनियुक्तः। अनेन बार्हस्पत्यमाने
न कदाचिदधिसंवत्सरो निष्पद्यते। तदुक्तमुत्तरसौरे॥ गुरोर्मध्यमसंक्रांतिहीनो यश्चांद्रवत्सरः। अधिसंवत्सरस्तस्मि
न्कारयेन्न सवत्रयं॥ वर्जनीयः प्रयत्नेन प्रतिष्ठासर्वनाग्निनां॥ स्फुटसंक्रांतिहीनश्चेत्केप्यकुरधिमासं वदिति॥ मध्य
मगणया गुरोः संक्रांतिर्यस्मिंश्चांद्रवत्सरे न विद्यते सोऽयमधिसंवत्सरः। तत्र बृहस्पतिसवादिकं न कार्यं। स्फुटगणन
या बृहस्पतिसंक्रांतिरहितोयश्चांद्रो वत्सरस्तस्मिन्नधिमासवत्काम्यादिकं वर्ज्यमिति केचिन्महर्षयो मन्यंते॥ अथ
चांद्रस्यावांतरभेदा उच्यंते॥ संवत्सरः परिवत्सरः इदावत्सरोऽनुवत्सरः इद्वत्सरश्चेत्येते पंच भेदाः। तदेतत्सामान्या
कारेण वत्सरादिपंचविधत्वं सावित्रचयनगताग्निप्रशंसकमंत्रे पठ्यते। संवत्सरोसि परिवत्सरोसीदावत्सरोसीद्वत्स
सि वत्सरोसि॥ इद्वत्सरोऽनुवत्सर इत्यर्थः। अत एवकात्मस्पि ब्राह्मणे तदधिष्ठातृदेवतारूपत्वेनैवं स्तूयते। अग्निर्वा

वसंवत्सरः आदित्यः परिवत्सरः चंद्रमा इदावत्सरः वायुरनुवत्सरः महेश्वर इद्वत्सर इति ॥ अन्यत्रापि ॥ संवत्सरः प्रथमो द्वि-
तीयः परिवत्सरः । इदावत्सरस्तृतीयश्चतुर्थश्चानुवत्सरः इद्वत्सरः पंचमस्तत्र तत्संघो युगसंज्ञक इति ॥ एतेषां पंचानां विनियो-
गो विष्णुधर्मोत्तरे पठ्यते ॥ संवत्सरे तु स्नानं तिलदानं महाफलं ॥ परिपूर्वे तथा दानं यवानां द्विजसत्तम ॥ इदापूर्वे च वस्त्रा-
णां धान्यानां चानुपूर्वके ॥ इत्पूर्वे रजतस्यापि दानं प्रोक्तं महाफलमिति ॥ तथा तदधिष्ठातृदेवताभृङ्गारूपो व्रतविशेषः पठ्यते ।
संवत्सरः स्मृतो वह्निस्तथार्कः परिवत्सरः । इदापूर्वस्तथा सोमो ह्यनुपूर्वः प्रजापतिः । इत्पूर्व विश्वस्तथा प्रोक्तो देवदेवो महेश्वरः । तेषां
मंडलविन्यासः प्राग्वदेव विधीयते ॥ प्राग्वत्स्यात्पूजनं कार्यं होमः कार्यो यथाविधीति ॥ प्रभवमारभ्य षष्ट्यां तेषु षष्टिवर्षेषु द्वा-
दश पंचकानि ॥ तत्रैकस्मिन्वर्षपंचके क्रमेण संवत्सरादयो भवंति तदेतत्सर्वं ज्योतिःशास्त्रादवगंतव्यं ॥ ॥ इति संवत्सरनिर्णयः ॥
॥ ॥ अथायनं ॥ ॥ अयते यात्यनेन नक्षत्रयेण सूर्यो दक्षिणाशामुत्तराशां चेति नक्षत्रयमयनं ॥ तथा च वाजसनेयिनः पं-
चाग्निविद्यायां दक्षिणोत्तरमार्गयोः समामनंति । यान्षण्मासान्दक्षिणादित्य एति यान्षण्मासानुदङादित्य एतीति ।
तथा छंदोगा अप्यधीयते । यान्षट् दक्षिणैति मासांस्तान्यान्षडुदङ्ङेति मासांस्तानिति ॥ तैत्तिरीया अनुग्रहब्राह्मणे पठं- २५
ति । तस्मादादित्यः षण्मासान्दक्षिणेनैति षडुत्तरेणेति । एवं चादित्यगतिमुपजीव्यायननिष्पत्तेः सौरमेवैतत् ॥ अतएव विष्णु-
रोमेति तर

धर्मोत्तरे । सौरमानमधिकृत्योक्तं ॥ नक्षत्रयं चायनं स्यादिति ॥ केचित्तु चांद्रमानेनायनद्वयमभ्युपगच्छंति ॥ मार्गमासादि-
के त्रिभिस्त्रिभिः कल्पितः कालः षण्मासात्मक उत्तरायणं । ज्येष्ठमासादिके दक्षिणायनमिति ॥ तत्र प्रमाणं ज्योतिःशास्त्रा-
दौ मृग्यं श्रौतस्मार्तकर्मानुष्ठाने तु मकरकर्कटसंक्रांत्यादिक एवायनद्वयकाल इति यथोक्तश्रुतिस्मृतिभ्यामवगंतव्यं ॥ उत्तराय-
णस्य यागकर्मांगत्वं काण्वा अधीयते । उदगयन आपूर्यमाणपक्षस्य पुण्याहे द्वादशाहमुपसद्भूत्वे स्यादि ॥ चौलादीना-
मुत्तरायणकर्तव्यता गृह्यस्मृतिषु प्रसिद्धा ॥ सत्यव्रतश्च देवताप्रतिष्ठादीनामुत्तरायणदक्षिणायनयोर्विधिनिषेधावाह ॥ देव-
तारामवाप्यादि प्रतिष्ठेदङ्मुखे रवौ । दक्षिणामुखे कुर्वन्न तत्फलमवाप्नुयादिति ॥ उग्रदेवतानां प्रतिष्ठा दक्षिणायनेऽपि कर्तव्या ॥ तथा
वैखानससंहितायामुक्तं ॥ मातृभैरववाराहनारसिंहत्रिविक्रमाः । महिषासुरहंत्री च स्थाप्या वै दक्षिणायन इति ॥ एवं विष्णुध-
र्मोत्तराभिहितानुपदद्वयव्रतादीन्ययनकर्तव्यान्युदाहार्याणि ॥ ॥ इत्ययननिर्णयः ॥ ॥ अथर्तवः ॥ ऋतुशब्दः ऋगतावित्यस्मा-
द्धातोर्निष्पन्नः । इयर्ति गच्छति आवर्तते पुष्पादिकासाधारणलिंगमिति वसंतादिकालविशेष ऋतुः ॥ स च षड्विधः ॥ षडृ-
तवः इति श्रुतेः ॥ यत्तु द्वादश मासाः पंचर्तव इति श्रुतं तत्र हेमंतशिशिरयोरेकीकरणं विवक्षितं ॥ याजमाने तु पंचप्रयाजानुमं-
त्रणमंत्रेषु हेमंतशिशिरयोरेकस्मिन्मंत्रे एकेनैव पदेनैकीकरणोक्तेः । तथाहि । वसंतमृतूनां प्रीणामि । ग्रीष्ममृतूनां प्री-
शा६

से२ ११२

णामि॥ वर्षामृतूनां प्रीणामि॥ शरदमृतूनां प्रीणामीति चतुर्णां प्रयाजानां पृथक्पृथगनुमंत्रणमंत्राणां नाम्नायं पंचमप्रयाज
स्यानुमंत्रणमंत्र एवं श्रूयते हेमंतशिशिरावृतूनां प्रीणामीति॥ एतदेवाभिप्रेत्य बह्वृचब्राह्मणे द्वादशमासाः पंचर्तवो हेमंतशि
शिरयोः समासेन। यत्त्वनयोर्मंत्रब्राह्मणयोर्द्विवचनं तत्स्वरूपद्वैविध्याभिप्रायेण। शिशिरस्य षष्ठस्यांतिमत्वात्ते नानुमंत्रणी
यस्य षष्ठप्रयाजस्याभावाच्च तस्यैव पंचमे हेमंतेऽन्तर्भावो न्याय्यः॥ अत एव प्रयाजब्राह्मणे वसंतमेवर्तूनामवरुंध इत्यादिना च
तुरः प्रयाजान्प्रशस्य पंचमे प्रयाजे केवलेन हेमंतेन प्रशंसा स्वाहाकारं यजति हेमंतमेवावरुंध इति॥ अस्तु नाम यथा तथा पंचसं
ख्या तथापि स्वरूपेण षोढाभिधीयते॥ द्वादशमासात्मके संवत्सरे एकैकस्यर्तोर्मासद्वयात्मकत्वे सति एकादशद्वादशमासयो
र्दीक्षितक्रमत्वात् षष्ठत्वेनेष्टकानुष्ठानविधानाच्च॥ तस्योपरिष्टादुदाहरिष्यामः। मासद्वयात्मकं चाग्निचयने ऋतव्येष्ट
कोपधानब्राह्मणे श्रूयते॥ द्वंद्वमुपदधाति तस्माद्द्वंद्वमृतव इति॥ एकस्मिन्नृतौ कयोर्मासयोर्द्वंद्वं गृहीतव्यमिति चेत्। वसंता
द्यृतुक्रमेण चैत्रमासादिद्वंद्वमिति ब्रूमः। तच्चेष्टकोपधानमंत्रेषु श्रूयते॥ मधुश्च माधवश्च वासंतिकावृतू। शुक्रश्च शुचिश्च ग्रै
ष्मावृतू। नभश्च नभस्यश्च वार्षिकावृतू। इषश्चोर्जश्च शारदावृतू। सहश्च सहस्यश्च हैमंतिकावृतू॥ तपश्च तपस्यश्च शै १६
शिरावृतू॥ एकैकस्यर्तोर्द्विवचनं तदवयवमासाभिप्रायं। अन्यथा षडृतव इति श्रूयमाणषट्संख्या बाध्येत॥

२४ श्रो५

अवयविन ऋतोर्वसंतादेरेकात्मकत्वं सोत्रामणीयहोत्रमंत्रेष्वेकवचनेन व्यवहारादवगंतव्यं। वसंतेन ऋतुना देवाः॥ ग्रीष्मेण ऋ
तुना देवा इत्यादिभिर्हि तत्प्रपद्यते॥ तथैवाधानब्राह्मणे श्रूयते॥ वसंतो वै ब्राह्मणस्यर्तुः ग्रीष्मो वै राजन्यस्यर्तुः शरद्वैश्यस्यर्तुरिति॥
अयं प्रत्येकमृतवो घटीयंत्रघटवन्नैरंतर्येण प्रवर्तंते तथापि संवत्सरोपक्रमरूपत्वेन वसंतस्य प्राथम्यं द्रष्टव्यं॥ एतदेवाभिप्रेत्य श्रूय
ते मुखं वा एतदृतूनां यद्वसंत इति। पूर्वोदाहृतेषु मंत्रब्राह्मणेषु सर्वत्र वसंतोपक्रमपाठाच्च वसंतस्य प्राथम्यं। ते च वसंतादय ऋतवो द्वि
धाः चांद्राः सौराश्च। चैत्रादयश्चांद्राः। ते चोदाहृते मधुश्च माधवश्चेत्यादिना॥ न च तत्र चैत्रादयो नोक्ता इति शंकनीयं। मध्वादिशब्दा
नां चैत्रादिपर्यायत्वात्॥ अत एवाहुः। चैत्रो मासो मधुः प्रोक्तो वैशाखो माधवो भवेत्॥ ज्येष्ठमासस्तु शुक्रः स्यादाषाढः शुचिरुच्य
ते। नभो मासः श्रावणः स्यान्नभस्यो भाद्र उच्यते। इषश्चाश्वयुजो मासः कार्तिकश्चोर्जसंज्ञकः॥ सहो मासो मार्गशिरः सहस्यः
पुष्यनामकः। माघमासस्तपाः प्रोक्तस्तपस्यः फाल्गुनः स्मृत इति॥ एतेषां चैत्रात्मकानां वसंतादीनां चंद्रगतिपरिकल्पितत्वा
च्चांद्रत्वं॥ अत एव होममंत्रे षाम्नायते। चंद्रमाः षण्णो मासस्सन्नृतून्कल्पयति। तथा सूर्यविषये सूर्याचंद्रमसौ प्रशस्त्याम्नायते। पू
र्वापरं चरतो माययैतौ शिशू क्रीडंतौ परियातो अध्वरं। विश्वान्यन्यो भुवनाभिचष्ट ऋतूनन्यो विदधज्जायते पुनरिति॥ अत्र
पुनर्जायत इति लिंगादृतुविधाता चंद्र इत्यवगम्यते॥ न च सत्येवं मध्वादीनां चांद्रमासानां वसंताद्यृतुत्वे संसर्पाख्यस्य त्रयोद
शस्य चांद्रमासस्य कथमृतुषु निर्वाहः॥ तन्मासस्सद्भावश्चर्तुग्रहब्राह्मणे मंत्रानुवादपुरस्सरमाम्नायते। उपयामगृही

सि १

नों संसर्पोस्त्यंहस्पत्यायेत्युत्पाद्या त्रियोदशो मास इत्याहुस्तमेव तत्क्षीणंतीति। तथाप्रवर्ग्यब्राह्मणेपि। अस्ति त्रयोदशो मास इत्या
हुर्यत्त्रयोदशं परिधिः भवति तेनैव त्रयोदशं मासमवरुंधइति॥ तदुक्तं त्रिप्रकारस्थास्मान्मलिमासनिर्णये वक्ष्यते॥ विघ्नतामेवं त्रयो
दशो मासस्तस्य कानुपपत्तिर्वसंताद्यृतुषट्कस्थितिर्वेत्॥ उच्यते॥ किमत्र समसमक्षुराहोस्विदुक्तेष्वेव षट्स्वंतर्भावः॥ उत्तरेद्वयांतरा
लवत्तरकश्चिदन्तरूपः॥ न तावत्पश्चिमः। त्वदुक्तश्रुत्यनानुपमानइति सत्त्वानां नैरंतर्यश्रवणात्॥ नाप्यग्रिमः। षडृतव इति षट्संख्या
नियमात्॥ वसंतादिवन्मंत्रब्राह्मणयोर्नामांतराश्रवणाच्च॥ नापि मध्यमः॥ मधाद्विधाभावात्॥ उच्यते। ययोर्मासयोर्मध्ये मलमासो
दृश्यते तयोरृतुरस्मिंस्तस्यांतर्भावः॥ तथा चासौ षष्टिदिवसात्मको मलिनत्वभागद्वयात्मक इति मधादिशब्दवाच्यत्वेनोक्तेष्वंत
र्भावात्तत्काप्यनुपपत्तिः॥ सौरेष्वृतुषु बौधायनेन मीनमेषयोर्मेषवृषयोर्वा वसंत इत्युक्तेर्निधानामीनादित्वे मेषादित्वे च विक
ल्पिके वसंतस्यांगीकृते॥ तथा च तदनुसारेणोत्तरेष्वाद्येपि यथायथं विकल्प्यते॥ विनियोगश्चैषां तत्तद्विशेषाणां श्रुतिस्मृतिपु
राणेष्ववगम्यते॥ तत्र श्रुतिः॥ वसंते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्य आदधीत शरदि वैश्य आदधीतेत्यादि। स्मृतिरपि॥ वसंते
ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति विष्णुधर्मोत्तरेपि। षण्णामृतूनां ते वसंतादृतुषट्कस्तु पथ्यकर्त्ता विशेषाः
पठिताः। तथा तत्र वसंते स्नानानुलेपनादिदानं ग्रीष्मे पानकादिदानं चोक्तं॥ देवीपुराणे वर्षासु तिलादिदानमुक्तं। तथा शरद्ध
न्यदानं हेमंते वस्त्रदानं शिशिरे वस्त्रदानमित्येतानि विष्णुधर्मोत्तरे बोध्यानि॥ एवमन्यदप्यूह्यं॥ ॥ इत्यृतुनिर्णयः॥ ५

अथ मासः॥ तत्र सकारांतं मासिति प्रातिपदिकं चंद्रवाचि। तस्यार्थे काल इति मासः॥ तदीयत्वं च चंद्रमानां कलानां वृद्धिक्षयद्वारेणावगं
तव्यं॥ यदि वृष्टं मासत्वं सौरसावनयोरनुगतं तदर्थे मस्यते परिमाणइत्यस्माद्धातोर्निष्पन्नोयं मासशब्दः। मस्यते परिमीयते याव
ता कालेन चंद्रवृद्धिक्षयौ स चांद्रो मासः॥ पक्षचंद्रवृद्धिक्षयाभ्यां स्वयं मस्यत इति मासः। तथा च सिद्धांतशिरोमणौ पठ्यते। मस्यते परिमीय
ते स्वकालो वृद्धिहानितः मासः तेस्मत्ता मासाः त्रिंशत्तिथिसमन्विताः इति॥ सूर्यस्य राशिगति यत्र परिमीयते स सौरः॥ अहोरात्राणां
त्रिंशत्संख्या परिमीयते यत्र स सावनः॥ तदुक्तं ब्रह्मसिद्धांते॥ चांद्रःशुक्लादिदर्शांतः सावनस्त्रिंशतादिनैः॥ एकराशौ रवि
र्यावत्कालं मासः स भास्कर इति॥ नाक्षत्रमपि मासं केचिदिच्छंति। सर्वनक्षत्रपरिवर्तैश्च नाक्षत्रो मास उच्यते इति विष्णुधर्मो
त्तरेऽभिधानात्। तत्रापि सप्तविंशति संख्या परिमीयते अनेनेति मासशब्दो योऽर्थः जनीयः। तत्र सौरमासस्याद्यंतौ मेषादिरा
शी नामाद्यंतावस्थितौ। सावनेकुरुषेष्वादिर्नियामकः। नाक्षत्रेन नक्षत्रं नियामकं॥ चांद्रस्कंदर्शांतः पूर्णिमांतो वेति विकल्प्य
ते। तथा च श्रूयते। अमावास्यया हि मासान्संपाद्याहरुत्सृजंत्यमावास्यया हि मासान्संपाद्याहरुत्सृजंति पौर्णमास्या हि
मासान्संपश्यंतीति। अस्य वाक्यस्यायमर्थः। अस्ति किंचिद्गवामयनं नाम सत्रं॥ तच्च गवामयनस्य वितति। अ
तो द्वादशमासेष्वनुष्ठेयं प्रकृतावेकैकस्मिन्मासे त्रिंशत्स्वहस्सु सोमयागविशेषाणां त्रिंशतामनुष्ठेयत्वात् किंचिदप्य
हरुत्सृष्टं त्यज्यते तद्विकृतावपि आग्नेप्रतिमासमेकैकस्मिन्नहनि सोमयागपरित्यागो विधीयते। तत्र केचन महरुत्सृजंता

मं पश्यंति। पौर्णमास्या मासान्संपाद्य ४

त्रिंशन्नात्रं॥ अथ स्यामध्ये द्वौ रेफौ तयोरेकस्मा मितिवीप्सायामिदमुच्यते॥ अमावास्यायामनुष्ठेयेन यागेन प्र
र्वमासं परिसमाप्योत्तरस्यादिमन्तमहस्त्यज्यतामिति विधायार्थवादे प्रसिद्धत्वाच्चिनाहि विशिष्टेन मासस्यामावास्यान्तत्वं प्रत्य
क्षदृष्टवत्सर्वेषां संमतमिति द्रढयति॥ एवं पौर्णमासीवाक्येपि योऽपमिति। पौर्णमास्यन्तत्वेऽकृते कदाचिन्मन्यान्। यो वै प्र
र्णमासीं सिंचतीत्यादिना यज्ञेनयज्ञं प्रत्यवरोहन्तीत्यनेनार्थवादद्वयं चेन सदृष्टान्तान्वयव्यतिरेकयुक्तेन प्रपंचितत्वात्॥ ननु
नोदाहृतं वाक्यं मासांतस्य नियामकमतिप्रसंगात्॥ तथाहि॥ तस्यैवानुवाकस्यादौ पठ्यान्तरमुपन्यस्तं॥ षडहैर्मासान्त्संपा
द्याहरुत्सृजंति षडहैर्हि मासान्त्संपश्यंतीति॥ तत्र पूर्वन्यायेन षष्ठमहर्मासान्त इति प्रसज्येत॥ अथ मन्यसे षडहैरिति बहुवचन
निर्देशात्त्वं चभिः षडहैरिति व्याख्यायां न कोपि विरोध इति। एवमप्यन्यत्रातिप्रसंगो दुर्वारः॥ तथा च वाक्यान्तरं श्रूयते। अर्धमा
सैर्मासान्त्संपाद्याहरुत्सृजंति अर्धमासैर्हि मासान्त्संपश्यंतीति॥ अत्रैकैकार्धमासस्वीकारे पक्षस्य मासत्वप्रसंगः॥ बह्वर्ध
मासस्वीकारे पक्षत्रयादेर्मासत्वप्रसंगः॥ किंच पूर्वोक्तोप्यतिप्रसंगो दुष्परिहर एव। षडहैरित्यत्र षडहपंचकस्वीकारात्त्रैस १८
संभवात्॥ एकैकस्य षडहस्य स्वीकर्तव्यत्वात्॥ तत्तेरानुवाके षडहैर्मासान्त्संपाद्य यत्सप्तममहस्तस्मिन्नुत्सृजेयुरिति सप्तमम
सविशेषणात्॥ तस्मादतिप्रसंगद्वयग्रस्तत्वेन न पूर्वोक्तो मासान्तः। अत्रोच्यते। श्रुतिस्मृतिलोकप्रसिद्धिभ्यो मासशब्दस्त्रिंश

दा१ स्क२

द्दिनसमूहे रूढः। ऋतवः संवत्सरायनर्तुविषयाः पूर्वमुदाहृताः। तत्र संवत्सरस्य द्वादशो भागो मासः॥ अयनस्य षष्ठो
भागः। ऋतुषु द्वयोर्भागयोरन्यतरः॥ स्मृतयस्तु। मानि मासे नाक्षत्रे सप्तविंशतिभिर्दिनैः। परिशेषेषु मानेषु मासस्त्रिंश
द्दिनैः स्मृतः॥ चान्द्रः शुक्लादिदर्शान्तः इत्यादयः॥ लोकेप्याविद्वदंगनागोपालं मासस्य त्रिंशद्दिनात्मकत्वं प्रसिद्धं। एवं सत्य
र्धमासैर्मासानित्यत्र मासशब्दो मासैकदेशं लक्षयति॥ षडहैरित्यत्र षडहपंचकविवक्षायां न काचिदनुपपत्तिः। एकैकषडह
विवक्षायामपि वेदैकदेशालक्षणा॥ अतोतिप्रसंगाभावादुक्तवाक्याभ्यां मासस्यामावास्यान्तत्वं पौर्णमास्यन्तत्वं च विकल्प्यते॥
तत्र प्रथमपक्षे शुक्लादिदर्शान्त इत्यादिस्मृतयस्तदर्थाः शिष्टाचारबाहुल्यं च तत्र प्रसिद्धं। [redacted]
द्वितीयपक्षस्योपोद्बलकं श्रुतिलिंगं स्मृतिलिंगं च। आथर्वणिकाः सृष्टिप्रकरणे संवत्सरदक्षिणोत्तरायणसृष्टिमाम्नाय
मासपक्षसृष्टिमेवमामनंति। मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव रयिः शुक्लः प्राण इति॥ तत्र कृष्णपक्षस्य प्राथम्येन पाठो लिं
गं। स्मृतौ महालयप्रकरणे पठ्यते॥ आश्वयुक्कृष्णपक्षे तु श्राद्धं दद्याद्दिने दिने इति॥ तत्र यदि दर्शान्तो मासो विवक्ष्येत तदा
भाद्रपदकृष्णपक्ष इत्युच्येत॥ तथैवमुक्तं। आश्विनमासान्तर्गतत्वं विधीयते। तच्च कृष्णप्रतिपदादिपूर्णिमान्तत्वे संभ
वति॥ तथा च जयन्तीप्रकरणे स्मर्यते॥ मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्धरात्रके॥ भवेत्प्रजापतेर्ऋक्षं जयन्ती नाम सा स्मृ
तेति च॥ अत्रापि जयन्त्या भाद्रपदान्तर्गतत्वं मासस्य पूर्णिमान्तत्वं गमयति॥ शिष्टाचारविशेषादपि पूर्णिमान्तत्वं द्र

र्थां यतिधर्मप्रकरणे स्मर्यते। न्यूनसंधिस्तु वापयेदिति। तत्र यदि दर्शान्तविवक्षा स्यात्तदा दर्शस्यैव संधित्वात्तत्रै
व वपनं कुर्युः। ऊर्ध्वं तिथेः पूर्णिमायां। तस्माद्दर्शान्तत्वपूर्णिमान्तत्वयोः समो विकल्पः। अनुष्ठाने त्व
तद्वचनविशेषाच्छिष्टाचाराच्च व्यवस्था द्रष्टव्या। वचनविशेषस्तु ब्रह्मसिद्धान्ते पठ्यते। अमावास्याप
रिच्छिन्नो मासः स्याद्ब्राह्मणस्य तु। संक्रान्तिपौर्णमासिभ्यां तथैव नृपवैश्ययोरिति। दर्शान्तानां पू
र्णिमान्तानां वा मासविशेषाणां चैत्रादिसंज्ञा नक्षत्रप्रयुक्ताः। यस्मिन्मासे पूर्णिमा चित्रानक्षत्रेण युज्य
ते स चैत्रः। एवं वैशाखादि ज्ञेयं। चित्राविशाखादियोगस्योपलक्षणत्वात् क्वचिच्चित्रादिप्रत्यास
न्नस्वात्यनुराधादियोगेपि चैत्रवैशाखादिसंज्ञा न विरुध्यते। चैत्रादिश्रावणान्तानां पंचानां मासानां चि
त्रादिनक्षत्रद्वंद्वक्रमो ज्ञेयः। भाद्राश्वयुजौ स्तः शतभिषग्रेवत्यादि त्रिकं त्रिकं। कार्तिकादिमाघान्तानां
कृत्तिकादिद्वंद्वं। फाल्गुनस्य तु पूर्वाफाल्गुन्यादित्रयमिति विवेकः। तथा च संदर्पणे कोऽङ्कोदक्षि
णादितारागणां परिपूर्णेन्दुसंगमे। मासाश्चैत्रादयो ज्ञेयास्त्रिकं षष्ठान्त्यसप्तमात् इति। अन्यत्राप्यंत्योपान्त्यौ त्रिभौ ज्ञेयौ
त्रिभो मतः फाल्गुनश्च विशेषतः। शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थयेति। तत्र माससामान्यकर्तव्यानि तैत्तिरीयाश्रमने

ति। मासि मासि पितृभ्यः क्रियते मासि मासि दृष्टमनुपयांति मासि मास्यनित्याग्रायणं तद्वति। दृष्टानि स्तोत्रविशेषाः। अतिथ्याग्र
ग्रहतिशेषाः। शाखान्तरेपि। कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीति। मासविशेषानुपजीव्य कर्तव्यविशेषं कल्पसूत्र
काराः पठंति॥ अश्वत्थ्यां हि वै चातुर्मास्ययाजिनः सुकृतं भवतीति। फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा चैत्रदेवेन यजेत तत्र चातुर्मासे
षु आषाढ्यां श्रावण्यां वोदवसाय वरुणप्रघासैर्यजेतेति। स्कान्दे च पद्मपुराणोक्तगौरीव्रतादयश्चैत्रमासादिषु क्रमेण कर्तव्याः।
ते च हेमाद्रौ व्रतखंडे द्रष्टव्याः। तथा च विष्णुधर्मोत्तरे तिलदानादीनि माघमासादिकर्तव्यानि। तानि च दान
खंडे द्रष्टव्यानि। चांद्रसौरसावनानां मासानां मध्ये कस्यचित्क्वचित्प्रशस्तत्वं दृष्टव्यं॥ तदुक्तं ज्योतिर्ग्रंथे॥ सौरो मासो विवाहादौ
यज्ञादौ सावनः स्मृतः। आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यते॥ ॥इति मुख्यमासनिर्णयः॥ ॥अथ मलमासः॥
तस्य स्वरूपं ब्रह्मसिद्धान्तेऽभिहितं॥ चांद्रो मासो ह्यसंक्रान्तो मलमासः प्रकीर्तित इति॥ मलत्वं च कालाधिक्यात्॥ तथा च गृ
ह्यपरिशिष्टे। मलवदंति कालस्य मासं कालविदोऽधिकमिति॥ कालाधिक्यं च विष्णुधर्मोत्तरे दर्शितं। सौरेण त्वस्य मानेन यदा
भवति भार्गव॥ सावनेन तु मानेन दिनषट्कं न मर्यते। दिनरात्राश्च ते राम ज्ञेयाः संवत्सरेण षट्। सौरसंवत्सरस्यां
ते मानेन नाक्षत्रेण तु। एकादशातिरिच्यंते दिनानि भृगुनंदन। समाद्वये साष्ट मासे तस्मान्मासोतिरिच्यते। एकादशा

भिर्दिनैश्चांद्रादतिरिच्यते। तथा चांद्रसंवत्सरद्वयात्सौरसंवत्सरद्वयं द्वाविंशत्यादिभिरधिकं भवति। ततऊर्ध्वं सौरमासाष्टकं
चांद्रात्मासाष्टकात्सार्धैः सप्तभिर्दिनैरतिरिच्यते। तथा च मिलित्वा तद्दिनार्धन्यूनो मासो भवति सोयमधिको मास इति॥
अवशिष्टदिनार्धपूरणं च यथोक्तकालादूर्ध्वं षोडशभिर्दिनैः संपद्यते। अतएव सिद्धांतेऽभिहितं। द्वात्रिंशद्भिर्गतैर्मासैर्दि
नैः षोडशभिस्तथा॥ घटिकानां चतुष्केन पतत्येकोऽधिमासक इति॥ न च कालाधिक्यमात्रेण मलत्वं तिथ्यादिवृद्धेरपि मल
त्वं प्रसज्येतेति शंकनीयं। कालाधिक्ये सति नपुंसकत्वेन मलत्वांगीकारात्। नपुंसकत्वं ज्योतिःशास्त्रेऽभिहितं॥ असंक्रां
तो हि यो मासः कदाचित्तिथिवृद्धितः॥ कालांतरात्समायाति नपुंसकः स उच्यत इति॥ पुरुषस्य सूर्यस्य तत्राभावान्नपुंसकत्वं॥ त
दपि तत्रैवोक्तं॥ अरुणः सूर्यो भानुस्तपनश्चंडो रविर्गभस्तिश्च॥ अर्यमा हिरण्यरेता दिवाकरो मित्रविष्णू च॥ एते द्वादशसू
र्या माघाद्येषूदयंति मासेषु॥ निःसूर्योऽधिकमासो मलिम्लुचाख्यस्ततः पापः॥ मासेषु द्वादशादित्यास्तपंते हि यथाक्रमं
नपुंसकेऽधिके मासि मंडलं तपते रविरिति। मलिम्लुचत्वं च तस्य राशेस्तस्करेणाक्रांतत्वात्॥ तदाह शातातपः॥ व २०
त्सरांतर्गतः पापो यज्ञानां फलनाशकृत्॥ नैर्ऋतैर्यातुधानाद्यैः समाक्रांतो विनायकैः॥ मलिम्लुचेः समाक्रांते सूर्य
संक्रांतिवर्जिते॥ मलिम्लुचं विजानीयात्सर्वकर्मसु गर्हितमिति॥ ननु द्वात्रिंशद्भिर्गतैः मासैरित्यनेन वचनेनेयंका

यत्रादर्शितासा वचनांतरेण विरुध्यते। तथा च काठकगृह्यं॥ यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा॥ मलमासः
स विज्ञेयो मासे त्रिंशत्तमे भवेदिति॥ नायं दोषः॥ द्वयोर्वचनयोर्भिन्नविषयत्वात्॥ ज्योतिःशास्त्रप्रसिद्धं मध्यममा
नमाश्रित्य द्वात्रिंशद्भिरिति वचनं प्रवृत्तं॥ यस्मिन्मास इति तु स्फुटमानमाश्रित्य प्रवृत्तं। ननु मध्यममानप्रवृत्तो
ऽधिकमासो ज्योतिःशास्त्रव्यवहार एवोपयुज्यते न तु श्रौतस्मार्तयोः तस्य शुक्लप्रतिपदादिदर्शांतत्वानियमासं
भवात्। षोडशभिर्दिनैर्घटिकाचतुष्टयेन चोपेतेषु द्वात्रिंशन्मासेषु गतेषु सोऽधिमासो विधीयते। तत्र यदि द
र्शांतमासा विवक्षितास्तदा तस्य द्वितीयायां घटिकाचतुष्टये गतेऽधिकमासस्योपक्रमः प्रसज्येत॥ अथानि
यतोपक्रमावसाना द्वात्रिंशन्मासा विवक्ष्येरन् तदापि शुक्लप्रतिपदादिदर्शांतो मास इत्येष नियमो न लभ्य
ते। श्रौतस्मार्तोपयोगिनि चाधिकमासे त्विति नियमः॥ तथा च लघुहारीतः॥ इंद्राग्नी यत्र हूयेते मासादिः स प्रकी
र्तितः॥ अग्नीषोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ॥ तमतिक्रम्य तु यदा रविर्गच्छेत्कदाचन॥ आद्यो म
लिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृत इति॥ अयमर्थः॥ दर्शपूर्णमासयाजिनां शुक्लप्रतिपदि दर्शेष्टिर्देवा

विश्राम्नीकृत्येते॥ तस्मात्प्रतिपदि सूर्यमासेष्टिं दावग्नीषोमौ॥ अमावास्यायां पिंडपितृयज्ञदेवौ पितृसोमकौ॥ तत्रैवं सति
शुक्लप्रतिपदादिदर्शांतो मासः संक्रांतिरहितोधिकमास इत्यर्थाल्लभ्यते॥ इति॥ तस्मान्मध्यममानगणनाश्रौतस्मा
र्तयोर्नोपयुक्ता॥ बाढं॥ तथापि कालाधिक्यान्मलमास इत्यस्मिन्ग्रंथोक्तदुदाहरणमित्यदोषः॥ यत्तु मासेत्रिंशत्तमे
भवेदित्युदाहृतं॥ तत्तु श्रौतस्मार्तयोरुपयुज्यते॥ स्फुटमानसिद्धत्वात्॥ तादृशंचाधिमासमुदाहरामः॥
अष्टपंचाशद्युक्तशतद्वयाधिके शाकवर्षगणे सहस्रेगते सति समनंतरभावीयोयमीश्वरसंवत्सरस्तस्मिन्
श्रावणमासोधिकः ततः सर्वभावीयोभावसंवत्सरस्तस्मिन्फाल्गुनमासोधिकः तयोः संवत्सरयोर्मध्य
वर्तिनौ द्वौ युवधातृसंवत्सरौ तदीयाश्चतुर्विंशतिमासाईश्वरसंवत्सरेश्चचारश्चैत्राद्यास्तथापि सति यथोक्तफा
ल्गुनमारभ्यगणनायां यथोक्तश्रावणमासस्त्रिंशत्तमोभवति॥ अनेनन्यायेन षष्ठिमासात्मकेषु पंचसु संवत्सरे
षु द्वावधिकमासौ संपद्येते॥ तदुक्तं महाभारते पंचमे पंचमे वर्षे द्वौ मासावधिमासकौ॥ तेषांकालातिरेके
ण ग्रहाणामतिचारतः॥ इति॥ नन्वधिकमासस्य क्वचित्त्रिंशत्तमत्वे अभिचरति॥ न्यूनाधिकसंख्यायात्र २१
पिदर्शनात्॥ तथाहि॥ यथोक्तेश्वरसंवत्सरोत्तरभाविनि चित्रभानुसंवत्सरे वैशाखमासोधिकः ततः उत्तरसा

विनितारणसंवत्सरे भाद्रपदमासोधिकमासः तथाचतस्यैकोनत्रिंशत्त्वं संपद्यते॥ तथा खरसंवत्सरे वैशाखमा
सोधिकः नंदनसंवत्सरव्यवहिते विजयसंवत्सरे भाद्रमासोधिकः तथाच तत्राप्येकोनत्रिंशत्त्वं॥ तथा दुर्मुखसंवत्स
रे श्रावणमासोधिकः हेमलंबिविलंबिसंवत्सरव्यवहिते विकारिसंवत्सरे ज्येष्ठोधिकः॥ तथाचतत्र पंचत्रिंशत्त्वं संप
द्यते॥ तस्मान्मासेत्रिंशत्तमे भवेदित्येतदयुक्तं॥ नायंदोषः॥ त्रिंशत्तमत्वस्य तूपलक्षणत्वेनांगीकारात्तदुदाहरण
प्रदर्शनार्थमेवदुक्तमित्यविरोधः॥ इदमत्र विचार्यते॥ किमयं मलमासः स्वतंत्र उत पूर्वस्य शुद्धमासस्य शेषः
शेषोस्विदुत्तरस्य शुद्धमासस्य शेष इति॥ नचकाकदंतपरीक्षेयमनुष्ठानानुपयोगादिति शंकनीयं॥ प्रत्याब्दि
काद्यनुष्ठाने तद्विचारस्योपयुक्तत्वात्॥ तथाहि॥ शुद्धाषाढशुद्धश्रावणयोर्मध्ये यदा मलमासस्तदा तस्य स्वतंत्रत्वे
तस्मिन्प्रत्याब्दिकमेव न प्राप्नोति॥ पितृकार्ये लिलिचोभयोरिति वचनात्॥ तस्मात्सार्थकोविचारः॥ तत्र स्वातंत्र्यं ताव
द्दत्तनिर्णये निरस्तं॥ पारतंत्र्येत्तु x पूर्वस्योत्तरस्य वा शेषत्वे शैथिल्लिमासे यत्प्रत्याब्दिकादि तस्य मलमासेप्यनु
ष्ठानं प्राप्नोति x पूर्वशेषत्वं युक्तमिति केचिदाहुः॥ तत्रोपपत्तिं केचिदिच्छंति चोपन्यस्यंति च मेषादिसंक्रांतयश्चै
त्रादिसंज्ञानां प्रयोजिकाः॥ तथा ज्योतिःशास्त्रेभिहितं॥ मेषादिस्थे सवितरि योयो मासः प्रपूर्यते चांद्रः॥ चैत्रादिः

सक्षयः स्त्रीन्द्वित्र्यधिमासोत्पद्यते। यदा सवितर्येकराशिस्थे सति दर्शद्वयं स्पृशते तदानीमुत्पन्नस्तु दर्शविमानको मासोऽधिमा
सः न तत्पूर्वदर्शविमानक इत्यर्थः॥ यदा शुक्लाषाढस्य बहुलचतुर्दश्यां दर्शे वा कर्कटसंक्रान्तिर्भवति शुक्लश्रावणस्य शुक्लप्रतिपच्चेत्प्र
तिपदि द्वितीयायां वा सिंहसंक्रान्तिस्तदा कर्कटसंक्रान्तिशुक्लस्य शुद्धमासस्याषाढत्वं युक्तं॥ तदीयदर्शस्य कर्कटस्थैरवा
ववसितत्वात्॥ सिंहसंक्रान्तियुक्तस्यापि श्रावणत्वमुचितं॥ तदीयदर्शस्य सिंहस्थैरवावसितत्वात्॥ एतेनैव न्यायेन तयोर्मध्य
वर्तिनः संक्रान्तिरहितमासस्य दर्शः कर्कटस्थ एव रवौ स्पृष्टवदिति पूर्वाषाढवदेतस्याप्याषाढत्वं समुचितं॥ अत्रोच्यते॥ मेषादी
नां शुद्धमाससंज्ञाप्रत्येव प्रयोजकत्वं॥ मलमासस्योत्तरमाससंज्ञोक्तत्वस्मरणात्॥ तथा च ज्योतिषि पितामहः॥ षष्ट्यापि दिवसैर्मासः क
थितो बादरायणैः॥ पूर्वमर्द्धं परित्यज्य कर्त्तव्या उत्तरे क्रियेति॥ अन्यत्रापि षष्टिदिनात्मकं मासं प्रकृत्योक्तं॥ आद्यो मलिम्लु
चो ज्ञेयो द्वितीयः प्राकृतः स्मृतः॥ एवं षष्टिदिनो मासस्तत्रार्धं तु मलिम्लुच इति॥ ज्योतिःशास्त्रान्तरेऽपि॥ षष्ट्याहि दिवसैर्मासः कथि
तो बादरायणैः॥ पूर्वमर्धं परित्यज्य उत्तरार्धं प्रशस्यत इति॥ अस्त्वेवं संक्रान्तिरहितस्य मलमासस्योत्तरशेषत्वं द्विसंक्रान्तियुक्त
स्य तु कथमिति चेत्॥ उच्यते॥ प्रथमं तावत्तत्स्वरूपं निरूप्यते॥ तच्च ज्योतिःसिद्धान्ते निरूपितं॥ असंक्रान्तिमासोऽधिमासः स्फुटः २२
स्याद्द्विसंक्रान्तिमासः क्षयाख्यः कदाचित्। क्षयः कार्त्तिकादित्रये नान्यतः स्यात्तदा वर्षमध्येऽधिमासद्वयं चेति॥ अयमर्थः॥

स्फुटमानेन योऽयमसंक्रान्तः स स्फुटोऽधिमासस्तेनैव मानेन यो द्विसंक्रान्तियुक्तः स क्षयमासः॥ स च कार्त्तिकमार्गशीर्षपौ
मासेष्वेवेति त्रिष्वन्यतमो भवति॥ तान्येषु माघादिषु नवसु॥ एवंविधक्षयमासयुक्ते वर्षे क्षयमासात्पूर्वेषु मासेषु मध्ये कश्चि
दधिकमासो भवति क्षयमासादूर्ध्वमपि मासत्रयमध्ये परोऽधिमासः॥ तदेवंविधमेकवर्षस्थं मलमासत्रयं चिरेण काले
न यदा कदाचिदायाति न त्वेकाधिकमासवत्पुनः सहसा समायाति॥ तत्त्रितयागमनकालश्च सिद्धान्तशिरोमणौ दर्शितः॥
गतोऽब्ध्यद्रिनन्दैर्मिते शाककाले तिथीशैर्भविष्यत्यथाङ्गाक्षसूर्यैः॥ गजाद्र्यग्निभूमिस्तथा प्रायशोऽयं कुवेदेन्दुवर्षैः
क्वचिद्गोकुभिश्च॥ अस्यायमर्थः॥ चतुःसप्तत्यधिकनवशतसंख्याकैर्वर्षैः परिमिते शाकस्य काले कश्चिदुक्तमासत्र
योपेतो वत्सरो गतः॥ यथोक्तसंख्या चाब्ध्यद्रिनन्दैरित्यनेन पदेन विवक्षिता॥ अब्धयश्चत्वारः॥ अद्रयः सप्त॥ नन्दा नव॥
एवं तत्संख्यात्रयगमकानामङ्कानां प्रसिद्धा प्रातिलोम्येन लिखिता यथोक्तसंख्यायां पर्यवस्यंति॥ तिथीशैरित्यत्रा
पि तिथयः पंचदश॥ ईशा एकादश॥ तत्राणामेकेरंकेषु प्रक्षिप्तेषु पंचादशाधिकशतेषु क्तसहस्रसंख्या संपद्यते॥
तावद्भिः शकवर्षैर्मिते काले कश्चिदुक्तमासत्रयोपेतः संवत्सरः॥ अंगाक्षसूर्यैरित्यत्राङ्गानि षट्॥ अक्षाणीन्द्रि
याणि पंच॥ सूर्या द्वादश॥ तत्रांकप्रक्षेपे सति षट्पंचाशदधिकशतद्वयोपेतसहस्रसंख्या संपद्यते॥ तावद्भिर्वत्स

रेऽर्मितेऽत्राककालेयथोक्तमासत्रयोपेतः कश्चित्वत्सरः। अस्योदाहरणंपूर्वोदाहृतईश्वरसंवत्सरात्प्राचीनोभावसंवत्स
रः। तत्रहिभाद्रबहुलामावास्यांकन्यासंक्रांतिस्ततऊर्ध्वमसंक्रांतिमेकंमासमतीत्योत्तरयोर्मासयोः क्रमेणतुलावृश्चिक
संक्रांती॥ ततऊर्ध्वमेकस्मिन्नेवमासेशुक्लप्रतिपदिधनुःसंक्रांतिः ततऊर्ध्वंदर्शेमकरसंक्रांतिः। ततऊर्ध्वंकुंभसंक्रांतिः स
मनंतरेमासेदर्शे। ततऊर्ध्वमेकमसंक्रांतमासमतीत्योत्तरस्यांशुक्लप्रतिपदिमीनसंक्रांतिः। एवंचसत्येकस्मिन्नेववत्सरे
द्वावसंक्रांतौमासावेकोद्विसंक्रांतमासइतियथोक्तमासत्रयंसंपद्यते॥ गजाग्न्यग्निभूमिरित्यत्रापिगजाअष्टौ। अग्न
यः सप्त। अग्नयः त्रयः। भूरेका। तत्रांकक्रमेणैतेयेसत्यष्टसप्तत्यधिकत्रितत्रयोपेतसहस्रसंख्यासंपद्यते। तावद्भिर्वत्स
रैर्मितेऽत्राककालेकश्चिदुक्तविधःसंवत्सरःसंपद्यते॥ ऊवेदेंदुवर्षैरित्यत्रऊरेका। वेदाश्चत्वारः। इंदुरेकः। तत्रांकक्रमेण
पंचचत्वारिंशदधिकशतसंख्याभवति॥ एतावद्भिर्वर्षैः क्वचित्पौत्तरेक्षयमासयोर्व्यवधानंभवति॥ गोकुभिश्चेत्य
त्रनपुंसकत्वेऽपितेषुस्वरास्वरेलक्षणयाप्रयुज्यमानेगोकारोनभवमःसंपद्यते। कुरेका। तत्रांकक्रमेणैतेयेसत्येकोनविंशतिर्भवति।
तावद्भिर्वत्सरैः क्वचित्पूर्वोत्तरयोः क्षयमासयोर्व्यवधानमिति॥ अत्रद्विसंक्रांतिसुक्तस्यक्षयसंज्ञायामुपपत्तिरुच्य २२
ते॥ यदाधनुःस्थेरवौदर्शःप्रवृत्तिस्तदातत्स्यमेषादिष्वचनेनमार्गशीर्षत्वंप्राप्तं। तथासतिपूर्वोक्तेद्विसंक्रांते

मासेधनुःस्थेरवौदर्शोनिसमाप्तः मकरस्थेतुरवौसमाप्तः अतःपौषमासत्वंतस्यसंपन्नं॥ तथाचमार्गशीर्षस्यतत्रलु
प्तत्वात्तस्यक्षयसंज्ञाउक्ता॥ अतएवैकमासस्याधिवादेहसःपापस्यपतिरितिव्यक्तत्वात्सएवांहस्पतिसंज्ञयाऽ
पिव्यवह्रियते। सचव्यवहारोबार्हस्पत्यज्योतिर्ग्रंथेदृश्यते। यस्मिन्मासेनसंक्रांतिःसंक्रांतिद्वयमेववा॥ सं
सर्पांहस्पतीमासावधिमासश्चनिंदिताः॥ तत्रक्षयमासात्प्राचीनोयोऽसंक्रांतःससंसर्पः। असंक्रांतत्वेनेतराधि
मासवत्कर्मानर्हतायांप्राप्तायांतदपवादेनकर्मार्हः सन्नुत्समुत्कर्षतीतिसंसर्पः। तस्यकर्मानर्हत्वप्राप्तिरेवंस्म
र्यते। सिनीवालीमतिक्रम्ययदासंक्रमतेरविः॥ रविलांघितोमासोऽयंनर्हःसर्वकर्मस्विति। तदपवादश्चैवंस्मर
र्यते॥ मासद्वयेऽब्दमध्येतुसंक्रांतिर्नयदाभवेत्॥ प्राकृतस्तत्रपूर्वःस्यादधिमासस्तथोत्तरइति॥ संक्रांतिरहितयोर्द्वयो
र्मासयोर्यःपूर्वोऽसंक्रांतःसप्राकृतःशुद्धःकर्मार्हइत्यर्थः॥ अस्मिन्नेवार्थेजाबालिः॥ एकस्मिन्नपिवर्षेचेद्द्वौमा
सावधिमासकौ॥ प्राकृतस्तत्रपूर्वःस्यादुत्तरस्तुमलिम्लुच इति॥ अतःसंसर्पत्वंतस्योपपन्नं॥ असंक्रांतमास
द्वयमध्यवर्तिनः क्षयमासस्यांहस्पतित्वंनिरुक्तैःपूर्वमेवदर्शितं॥ तदुत्तरभाविनोसंक्रांतस्यकाला

धिक्याद्धिमासत्वं॥ तएते त्रयोपि ज्योतिःशास्त्रप्रसिद्धविवाहादौ निंदिताः॥ यथोक्तप्रकारेणांहस्पतिना
म्नः क्षयमासस्य द्वितीयसंक्रांतिप्रयुक्तनाम संभवे सति शुद्धमासवत्वात् अत्र पूर्वोत्तरमासशे
षत्ववशात्कावकाशः॥ नत्वेधिकमासोपेतसंवत्सरस्य त्रयोदशमासात्मकत्वं यथा तथाधिमासद्वयोपे
तसंवत्सरस्य चतुर्दशमासात्मकत्वं प्राप्नोति न च तत्फलं। त्रयोदशोत्र शाति राहु मासं चतुर्दशः
क्वापि न चैव दृष्ट इति वचनात्॥ नैष दोषः॥ असंक्रांतत्वेनाधिकत्वप्रसक्तियुक्तयोर्द्वयोर्मध्ये पूर्व
पूर्वस्याधिमासत्वनिषेधात्॥ उक्तं ज्योतिःसिद्धांते॥ घटकन्यागते सूर्ये वृश्चिके वाथ धन्व
नि मकरे वाथ कुंभे वा नाधिमासो विधीयत इति॥ अयमर्थः॥ वृश्चिकादिषु चतुर्षु मासेषु
युद्रामलमासः प्राप्नोति तदा तुलाकन्ययोर्वर्तमानेसत्यसंक्रांतोपि नाधिमास इति॥ घटकन्यागत इत्यु
लं॥ पूर्वेद्यपि प्रसक्तो संक्रांतो नाधिमासः॥ न तु मासद्वये चतुर्दशमासत्वप्राप्तिः॥ तथाप्येकादशमासत्वप्र २४
प्तेस्तत्त्वेव दोषः॥ तथाहि॥ द्वादशमासाः संवत्सर इत्येषां नित्यवच्छ्रुतिः स संक्रांतान् मासानुद्दिश्य प्रवृत्ता॥
तदुक्तं ब्रह्मसिद्धांते॥ चैत्रादर्वाङ् नाधिमासः परतस्त्वधिको भवेदिति॥ चैत्रादारभ्योपरितने षु मासेषु यस्यां कोपि न्नाम समसंक्रांतो तदा तयोरर्वाचीनः पूर्वो
नाधिमासः॥ उत्तरस्त्वधिमासः॥ २

अस्ति त्रयोदशमास इत्यादिकुरित्यसंक्रांतस्य कदाचित्कस्य पृथक्प्रबलात्॥ तथा च सति प्रक्रांते क्षयमासोपेते त्रयोदशमासा
त्मके संवत्सरे द्वयोः असंक्रांतयोः परित्यागे सत्यवशिष्टाः ससंक्रांता एकादशैव॥ ततो नित्यवच्छ्रुतिविरोधः॥ नायं दोषः॥
द्विसंक्रांतियुक्तस्य क्षयस्य मासद्वयत्वेन परिगणनात्॥ तथा च स्मर्यते॥ तिथ्यर्धे प्रथमे पूर्वो द्वितीयेर्धे तदुत्तरः॥ मासा
विति बुधैश्चिंत्यौ क्षयमासस्य मध्यगौ इति॥ ज्योतिःशास्त्रे द्विसंक्रांतियुक्तात् क्षयमासादाद्यसंक्रांतेः क्वचित् सर्वत्र
चालनसंस्कारोक्तीत्युक्तं॥ तथा च यदा चालनमस्ति तदा पूर्वस्यासंक्रांतस्य ससंक्रांतत्वसंपादनादयं मास एकत्वेनैव
परिगणनीयः॥ यदा तु चालनं नास्ति तदा यथोक्तप्रकारेण मासद्वयात्मकत्वं द्रष्टव्यं॥ तथोक्तं वटेश्वरसिद्धांते॥ यदि
न चलति वै मासयुग्मं विचिंत्यमिति॥ ॥इति मलमासस्य स्वरूपं निरूपितं॥ ॥अथ तत्र वर्ज्यावर्ज्यविवेकः क्रि
यते॥ तत्रेयं पैठीनसिः॥ अतस्मात्क्रियाः सर्वाः द्वादशो मासि कीर्तिताः॥ त्रयोदशोतु सर्वास्ता निष्फलाः परिकी
र्तिताः॥ तस्मात्त्रयोदशे मासि कुर्यात्तानु कथंचन॥ कर्म च न धर्मे वा कुर्यादात्मविनाशनमिति॥ अत्र निष्फला
इत्यभिधानात् फलकामनया प्रवृत्तं कर्म निषिध्यत इति गम्यते॥ तथा च स्मृत्यंतरे॥ इत्यादि सर्वकाम्यं मल
मासे विवर्जयेदिति॥ न च सर्वास्ता इत्यभिधानान्नित्यनैमित्तिकयोरपि निषेधः शंकनीयः॥ नित्य

नैमित्तिके कार्ये त्वयतः सन्मलिम्लुचे इति बृहस्पतिवचनात्॥ ज्ञाबालिनापि तथैवोक्तं॥ नित्ये नैमित्तिके कार्ये कृ-
द्धं कुर्यान्मलिमलिम्लुचे॥ तिथिनक्षत्रवारोक्तं काम्यं नैव करोत्वेनेति॥ योयं मलमासे काम्यनिषेधः आरंभ-
समाप्तिविषयः॥ अस्पूर्यानामये मासा न तेषु मम संमतः। व्रतानां चैव यज्ञानामारंभश्च समापनमिति॥ आरंभस-
माप्त्योरेवाधिमासे प्रतिषेधात् आरंभसमाप्त्योर्मध्यपातिन्यधिमासे तदारब्धं काम्यमनुष्ठेयं। अधिमासे निप-
तितेप्येष एव विधिक्रम इति॥ स्मरणात्॥ यत्तु काठकगृह्ये समाप्तिप्रतिप्रसववचनं॥ प्रवृत्तं मलमासात्प्राक् काम्यं
कर्म समापितं॥ आगते मलमासेपि तत्समाप्तिर्न संशय इति॥ तत्सावनमासप्रवृत्तत्त्वचान्द्रायणादिनक्षत्रादिविष-
यं॥ आवश्यकं तु यत् काम्यं कर्म तन्मलमासेप्यनुष्ठेयं॥ तद्यथा॥ आक्रान्ते मलमासे द्वित्रेषु दिनेषु यदि कश्चिद्बालो ज्व-
रातिसारादीनां गृह्येत॥ तदा रक्षोघ्नी इष्टिः स एव कर्तव्या॥ मलमाससमाप्तिप्रतीक्षायां बालादिमरणप्रसंगा-
त्॥ सा चेष्टिः काम्यकाण्डे श्रूयते॥ अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेत् यं रक्षांसि सचेरन्नग्निमेव
रक्षोहणं स्वेन भागधेयेनोपधावति स एवास्माद्रक्षांस्यपहंतीति॥ सचेरन्नसमवेयुर्गृह्णीयुरिति यावत्॥ उप- २५
धावति॥ देवता प्रियेण हविर्भागेन तोषयति। अस्माद्रक्षो गृहीतात् इष्टिकर्तारं रक्षांसि। नपनयंति॥ तथैवाभिच-

रतः प्रतिचरः प्रतिचरतश्च काचिदिष्टिः श्रूयते॥ अग्नावैष्णवमेकादशकपालं निर्वपेदभिचरेद्दीक्षिन्नेति॥ प्रति वै
परस्तादभिचरंतमभिचरेद्द्वे पुरोनुवाक्ये कुर्यादिति च॥ तत्र द्वयोरप्येकैवेष्टिः। अभिचरत एकैका पुरोनुवा-
क्या। प्रतिचरतस्तु द्वे द्वे इति विशेषः॥ कालविलंबप्रतीक्षा त्वत्रापि न संभवति बाधके शत्रौ प्रत्यासन्ने सति तदैवाभिचा-
रस्य कर्तव्यत्वात्॥ प्रतिचारस्यापि स एव कालः॥ एतयैव यजेताभिचर्यमाण इति वर्तमानवाचिना शानच्प्रत्ययेन
न ग्रहणेन प्रतिचारकर्तुरभिचारसमकालत्वविशेषणात्॥ एवं प्रबलज्वरराजद्रोहादिना यदापमृत्युः प्रसक्तस्तदा-
पि सैषैवेष्टिः कर्तव्या॥ दृष्टिस्तु श्रूयते॥ यो मृत्योर्बिभीयात्तस्मा एतां प्राजापत्यां शतकृष्णलां निर्वपेत् प्रजापतिमेव
स्वेन भागधेयेनोपधावति स एवास्मिन्नायुर्दधाति सर्वमायुरेतीति॥ कृष्णलाः सुवर्णशकलानि यवत्रयपरिमिता-
नि तानि च शतसंख्यानि यस्यां निर्वपणीयानि सेष्टिः शतकृष्णला॥ यदा वृष्ट्यभावात्सस्यानि शुष्यंति मलमास-
स्यागतस्तदा कारीर्या वृष्टिकामो यजेतेति॥ विहितेष्टिर्न कालविलंबं सहते। एवमन्यान्यप्यावश्यकान्युदा-
हरणीयानि॥ नित्यनैमित्तिकयोरपि रनन्यगतिकं तदेव मलमासे कार्यं। अनन्यगतिकं नित्यं कुर्यान्नैमि-
त्तिकं तथेति स्मरणात्॥ काठकगृह्येपि॥ मलेऽन्यगतिं कुर्यान्नित्यनैमित्तिकक्रियामिति॥ अनन्यगतिका॥

नि च नित्यानि॥गृह्यपरिशिष्टेऽप्युदाहृतानि॥अवषट्कारहोमाश्च पर्व चाग्रयणं तथा॥मलमासेऽपि कर्तव्यं का
म्या इष्टीर्विवर्जयेदिति॥अवषट्कारहोमा अग्निहोत्रोपासनवैश्वदेवादयः॥पर्व दर्शपौर्णमासौ पार्वणस्थालीपा
कश्च॥दर्शादीनां नित्यत्वमकरणे प्रत्यवायादवगंतव्यं॥तथा चाथर्वणिका आमनंति॥यस्याग्निहोत्रमदर्शपौर्णमासमअ
नाग्रयणमतिथिवर्जितं अहुतमवैश्वदेवमविधिनाहुतमासप्तमांस्तस्य लोकान्हिनस्तीति॥गार्ग्यंतरप्युक्तानि त्वनित्या
नि तत्र वर्ज्यानि॥तदुक्तं काठकगृह्यपरिशिष्टे॥सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे॥षष्ठ्यब्दात्प्राग्यदाधानं चा
महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत्॥स्पष्टमासविशेषाख्याविहितं वर्जयेन्मल इति॥सोमयागो हि वसंते वि
हितस्तस्य मलमासविसर्जने पिशुद्धमासे तु अनुष्ठानसंभवात्संगतिकत्वं॥षष्ठ्यब्दिकाष्टकश्राद्धे प्रसिद्धा॥न चाग्र
यणस्य संगतिकस्य गतिकपोरुदाहरणं विरुद्धमिति शंकनीयं॥तस्य मलमासे विकल्पितत्वात्॥तदाहोपेठीनसिः॥संक्रां
तिरहिते मासि कुर्यादाग्रयणं न वेति॥अनन्यगतिकानि नैमित्तिकानि ग्रहणस्नानादीनि तेषां मलमासेऽपि कर्त
व्यतामाह॥यमः॥चंद्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकं॥कार्याणि मलमासेऽपि नित्यं नैमित्तिकं तथेति॥सगति २६
कानि तु नैमित्तिकानि जातेष्ट्यादीनि वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इति विहिता याष्टिः साशौचे वसिते यथा
नुष्ठानं तद्वन्मलमासेऽपवसिते नुष्ठातुं शक्यत्वात्संगतिकत्वं यथोक्तरीत्या काम्यमावश्यकमनन्यगतिके नि

मित्तिके अपि मलमासे कार्याणि नेतराणीति सामान्यतो वर्ज्यावर्ज्यविवेकः संपन्नः॥तानि च कार्याकार्याणि कालादर्शकारो
संगृह्योदाजहार॥द्वादशाहसपिंडांतकर्मग्रहणजन्मनोः॥सीमंते पुंसवे श्राद्धं द्वावेतौ जातकर्म च॥रोगे शांतिरल
भ्ये च योगे श्राद्धं व्रतानि च॥प्रायश्चित्तं निमित्तस्य वशाहूर्वेपरत्र च॥अष्टोदकुंभमन्वादिमहालययुगादिषु॥श्राद्धं दर्शेष
हरहः श्राद्धस्नानादि मासिकं॥मलिम्लुचान्यमासेषु मृतानां श्राद्धमाब्दिकं॥श्राद्धं तत्पूर्वदं दृष्टं तीर्थे वै युगादिषु॥मन्वादिषु च
पद्मानेदानं दैनंदिनं च यत्॥तिलगोभूहिरण्यानां संध्योपासनयोः क्रिया॥पर्वहोमा वाग्रयणं साग्नेरिष्टिश्च पर्वणोः॥नित्या
ग्निहोत्रहोमश्च देवतातिथिपूजनं॥स्नानं च स्नानविधिनाप्यनस्यापेयवर्जनं॥तर्पणं च निमित्तस्यानित्यबाहुनयत्र वा॥अ
नित्यमनिमित्तं च दानं च महदादिकं॥अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेज्यणां॥देवारामतडागादिप्रतिष्ठा मौंजीबंध
नं॥आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रमः॥राजाभिषेकः प्रथमं चूडाकर्म व्रतानि च॥अन्नप्राशनमारंभो
गृहाणां च प्रवेशनं॥स्नानं विवाहो नामानि तथाप्यन्नमहोत्सवं॥व्रतारंभसमाप्ती च काम्यं कर्म च पाप्मनः॥प्रायश्चित्तं
तु सर्वस्य मलमासे विसर्जयेत्॥उपाकर्मोत्सर्जनं च पवित्रदमनार्पणं॥अवरोहश्च हेमंतः सर्पाणां बलिरष्टकाः॥ईशा
नस्य बलिर्विष्णोः शयनं परिवर्तनं॥दुर्गेंद्रस्थापनोत्थानेध्वजोत्थानं च वर्जिणः॥सर्वत्र प्रतिषिद्धानि परत्रान्यत्र च

वैदिकमिति॥ अत्र द्वादशाहेत्यारभ्यानित्यत्वाकुलयत्रेत्युक्तं तेन ग्रंथेन कर्तव्यसंग्रहः॥ अनित्यमनिमित्तं चेत्यारभ्य वर्ज्ये येदित्यंतेन वर्ज्यसंग्रहः। अनुपाकर्मेत्यारभ्य परत्रान्यश्चैवैदिकमित्यंतेन मलमासे विवर्जितानां सतां शुद्धमासेऽवश्यकर्तव्यत्वेन संग्रहः॥ अत्र सर्वत्र साक्षिवचनान्युदाहरामः॥ यमः॥ गर्भे वार्धुषिके भृत्ये श्राद्धकर्मणि मासिके। सपिंडीकरणे नित्ये नाधिमासं विवर्जयेत्॥ तीर्थस्नानं जपो होमो यवव्रीहितिलादिभिः॥ जातकर्मांत्यकर्माणि नवश्राद्धं तथैव च॥ मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश॥ चंद्रसूर्यग्रहे स्नानं श्राद्धं दानं जपादिकं। कार्याणि मलमासेपि नित्ये नैमित्तिके तथेति॥ मासिके श्राद्धकर्मण्यमावास्याश्राद्धकर्मणीत्यर्थः। नित्यनित्यदाने। होमोत्रोपासनहोमः। अंत्यकर्माणि दहनोदकपिंडनोदास्थिसंचयनादीनि॥ स्मृत्यंतरे॥ श्राद्धं जातकनामानि ये च संस्काराः सव्रताः। मलिम्लुचेपि कर्तव्याः इष्टीः काम्याश्च वर्जयेदिति॥ संस्कारा अन्नप्राशनांता निःक्रमणादयः॥ सव्रता ब्राह्मणस्य व्रतादयः॥ गभस्तिः॥ एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते॥ तत्कार्यं पूर्वमासे च मलाधिक्ये च धर्मत इति॥ गौतमः॥ जातकर्मणि यच्छ्राद्धं नवश्राद्धं तथैव च॥ ग्रहणे तु सवादौ च तत्सर्वं त्रपरत्र चेति॥ निमित्तवशादिति वाक्यशेषः। स्मृतिसंग्रहेपि। जातकर्म च पुंस्त्वं तिस्सीमंतोन्नयनं व्रतं॥ मलिम्लुचेपि कुर्वीत यस्मिन्निमित्तं यदि जायत इति॥ मरीचिः॥ रोगे चालभ्ययोगे च सीमंते पुंसवेपि च॥ यदृदा

ति समुद्दिष्टं सर्वत्रापि न दुष्यतीति। निमित्तवशात्प्राप्तानि अच्छिद्रकांडे बहूनि श्रूयंते॥ आहिताग्निर्वदाग्नीन् धान्वाधायेष्टिमरंसायामांतरे प्रयाणं कुर्यात्तदाग्न्यंतादिति मंत्रे एकं जुहुयात्तथा च श्रुतिः॥ सर्वो वा एषोग्निः कामो नाम्ना वेदास्य तियोग्नीनन्वाधाय व्रतमुपैति स यदनिष्ट्वा प्रयायात्कामप्रीता एनं कामा नानुप्रयायुः। अनेजा अवीर्य्यः स्यात्तज्जुहुयात्तदन्यंता अग्नि रमद्विषः स्तुक्षितयः पृथक्॥ अग्ने कामाय येमिर इति कामानेवास्मिन्दधाति कामप्रीता एनं कामा अनुप्रयांति तेजस्वी वीर्यवान्भवतीति। पत्न्यो भयं द्विरात्रिमाच्छेत्सेदेंद्रं पंचशरावमोदनं निर्वपेदिति॥ कौथुमिः॥ अद्य मं कुघटं दद्यादन्नं वापि स्वसंचितं॥ संवत्सरे विवृद्धेपि प्रतिमासं च मासिकमिति। मरीचिः॥ प्रतिमासं मृताहे च यच्छ्राद्धं प्रतिवत्सरं। मन्वादौ च युगादौ च मासयोरुभयोरपीति॥ मत्स्यपुराणे। वर्षवृद्ध्यहरहःश्राद्धं दानं च प्रतिवासरं। गोभूतिलहिरण्यानां मासेपि स्यान्मलिम्लुचे इति॥ एवमभ्यासेपवर्जनसंध्यावंदनादिष्वपि विशेषतः साक्षिवचनान्युदाहरणीयानि। सामान्यतस्तु नित्ये नैमित्तिके कुर्यात्प्रयतः सन्मलिम्लुच इति। बृहस्पतिवचनं पूर्वमेवोदाहृतं॥ ननु उदाहृतेषु संग्रहवचनेषु भाद्रपदापरपक्षश्राद्धस्याप्युभयत्र कर्तव्यता प्रतीयते॥ महाप्रलययुगादिष्विति तत्र पठितत्वात्॥ तच्चोभयत्र कर्तव्यता स्मृतिविरुद्धा महालयाष्टकाश्राद्धेति काठकगृह्ये वर्ज्यत्वस्मरणं पूर्वमुदाहृतं॥ न्ययुरपि॥ वृद्धिश्राद्धं तथा सोमम् अग्न्याधेयमहालयं।

राजाभिषेकं काम्यं च न कुर्यात् भानुलंघिते इति॥ नागरखंडेपि॥ नभो वाथ नभस्यो वा मलमासो यदा मलंमासो भवेत्॥ सप्तमः
पितृपक्षः स्यादन्यत्रैव तु पंचम इति॥ तत्राषाढीमवधिं कृत्वा सप्तमपंचमौ द्रष्टव्यौ॥ आषाढ्याः पंचमे पक्षे इति वचनात्॥ प
आषाढमासस्यांते भागे कर्कटसंक्रांतौ नभसोऽधिकमासत्वे॥ श्रावणमासस्यांत्यभागे सिंहसंक्रांतौ नभस्यस्याधिकमासत्वे
तयोरुभयोरपि पक्षयोः कन्यायां वर्तमाने सवितरि यः कृष्णः पक्षः स सप्तमो भवति॥ असति तु वृद्धिविधेरधिकमासे पंचमस्तथा
सति सप्तमे विहितस्यापरपक्षश्राद्धस्य मलिने नभस्य कृष्णपक्षेऽनुष्ठानमयुक्तं॥ नायं दोषः॥ संग्रहकारगतमहालयश्रा
द्धे न तीर्थविशेषस्य वा मघात्रयोदश्या वा विवक्षणीयत्वात्॥ ननु मलिम्लुचान्यमासेषु मृतानां श्राद्धमाब्दिकमिति॥ प्रति
संवत्सरं चाप्यमाणस्य मृतश्राद्धस्य मासद्वयकर्तव्यता संग्रहे दर्शिता॥ सा न युक्ता मलमासे तन्निषेधात्॥ तथा च सत्यव्रतः॥
वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि। मलमासे न कर्तव्यं व्याघ्रस्य वचनं यथा॥ सत्यतपाः॥ वर्षे वर्षे तु यच्छ्राद्धं मृताहे तन्म
लिम्लुचे॥ कुर्यात्तत्र प्रमीतानामन्येषामुत्तरत्र त्विति॥ पैठीनसिः॥ मलमासमृतानां तु श्राद्धं यत्प्रतिवत्सरं। मलमासे तु कर्त २८
व्यं नान्येषां तु कदाचनेति॥ अतः शुद्धमासमृतानां मलमासे मृताहश्राद्धकर्तव्यताविधानमयुक्तं। नैष दोषः। तस्याभिधा
नस्य प्रथमाब्दिकविषयत्वात्॥ आब्दिके प्रथमे यस्यात्तत्कुर्वीत मलिम्लुचे इति स्मरणात्॥ तथा हारीतोपि॥ असंक्रां

ते हि कर्तव्यमाब्दिकं प्रथमं द्विजैः॥ तथैव मासिकं श्राद्धं सपिंडीकरणं तथेति॥ लघुहारीतोपि॥ प्रत्यब्दं द्वादशे मासि कार्या पिंडक्रि
या बुधैः। क्वचित्त्रयोदशेपि स्यादाद्यं मुक्त्वा तु वत्सरमिति॥ अत्र द्वादशे मासे पूर्णे सति तदुत्तरदिने कार्येति व्याख्येयं॥ मासपक्षतिथि
स्पृष्टे यो यस्मिन्म्रियतेऽहनि॥ प्रत्यब्दं तु तथाभूते क्षयाहे तस्य तद्भवेदिति व्यासेनाब्दिकदिनस्य विशेषितत्वात्॥ केचित्तु॥ आ
द्यं मुक्त्वा तु वत्सरमित्येतदंतराधिमासेपि योज्यं यथा कार्तिकप्रमीतस्य प्रथमाब्दिकं माश्वयुजे कुर्वंति। तदयुक्तं। मासप
क्षेति वचनेन विरोधात्॥ अतिमाधिमासविषये तु यथोक्तरीत्योपपद्यते॥ तस्माच्छुद्धमासप्रमीतानां प्रथमाब्दिकं मलमासे
कर्तव्यं॥ द्वितीयाद्याब्दिकं शुद्धमास इत्यनया विवक्षयोभयत्र कर्तव्यतोक्ता॥ मलमासमृतानां यदि कदाचित्स एव मलमा
स आगतस्तदा तत्रैव प्रत्याब्दिकं कर्तव्यं न त्वपरितने शुद्धमासे॥ तथा च भृगुः॥ मलमासमृतानां तु यच्छ्राद्धं प्रतिवत्सरं॥
मलमासे तु तत्कार्यं नान्येषां तु कथंचनेति॥ अतो मलमासमृतानां कदाचित्प्रत्याब्दिकं मलमासेपि कार्यं शुद्धमा
समृतानां च प्रथमाब्दिकं तत्र कार्यं द्वितीयाद्याब्दिकं तु शुद्धमास इति। एतन्निर्णयमभिप्रेत्य श्राद्धीयेऽहनि संप्राप्ते म
लमासो भवेद्यदि॥ मासद्वयेपि कुर्वीत श्राद्धमेवं न लुप्यते। षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः। उत्तरे देवका
र्याणि पित्र्यकार्याणि चोभयोरित्यादीनि वचनानि प्रवृत्तानि॥ अनित्यमनिमित्तं चेत्यादिना यानि वर्ज्यानि सौर

हीतानि तेषु स्मृतं यत्तदा क्रियन्ते॥ तत्र वृद्धमनुः॥ अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च॥ वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः॥
मंगल्यमभिषेकं च मलमासे विवर्जयेत्॥ बाले वा यदि वा वृद्धे शुक्रे वास्तमुपागते॥ मलमासइवैतानि वर्जयेद्देवदर्शनमिति॥
पैठीनसिज्योतिःपराशरयोरप्ययमेव पाठः॥ कौथुमिः॥ अधिमासे तु कर्त्तव्यं श्राद्धं संवत्सरादिकं॥ देवव्रतं ह्यभिषेकादि कर्त्तव्यमम
धिके न तु॥ अधिमासे न कर्त्तव्यं श्राद्धमाभ्युदयं तथा॥ तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते॥ सपिंडीकरणादूर्ध्वं यत्किंचिच्छ्राद्धि
कं भवेत्॥ इष्टं वाप्यथवा पूर्त्तं तन्न कुर्यान्मलिम्लुच इति॥ असंक्रान्तं प्रकृत्य ज्योतिःशास्त्रे॥ तत्र दत्तमदत्तं वा हुतं न हुतमेव च॥
सुक्षेत्रमप्यक्षय्यं चनोपवासः कृतो भवेत्॥ न यात्रा न विवाहश्च न च वस्तुनिवेशनं॥ न प्रतिष्ठां च देवानां प्रासादारामभूरुहां॥
न हिरण्यं सुवासांसि कारयेदिति निश्चय इति॥ स्मृत्यंतरेपि॥ वापीकूपतडागादिप्रतिष्ठा यज्ञकर्म च॥ न कुर्यान्मलमासे च महादा
नव्रतानि चेति॥ महादानानि तुलापुरुषादीनि षोडशापि विष्णुपुराणोक्तानि कनकादीनि दश कूर्मपुराणोक्तानि॥ एवमन्या
न्यपि निषेधवचनान्युदाहरणीयानि॥ उपाकर्मोत्सर्गे चेत्यादिना शुद्धमास एव कर्त्तव्यानि॥ तत्र ज्योतिःपराशरः॥ रविणा ल
घितो मासश्चान्द्रः ख्यातो मलिम्लुचः॥ तत्र यद्विहितं कर्म तन्नेरेमासि कारयेदिति॥ प्रजापतिः॥ उपाकर्म च हव्यं च कव्यं पर्वो २९
त्सवं तथा॥ उत्तरे नियतं कुर्यात्सर्वं तन्निष्फलं भवेदिति॥ हारीतोपि॥ उपाकर्म तथोत्सर्गं काम्यमुत्सवमष्टकाः॥ मासवृद्धौ

पराः कार्या विवर्जयित्वा तु पैतृकमिति॥ ज्योतिषितामहोपि॥ मासः कन्यागते भानावसंक्रान्तो भवेद्यदि॥ दैवं पित्र्यं तदा कर्म तुलास्थे कर्त्तुर
क्षयमिति॥ अत्र कन्यागते सवितरि योऽसंक्रान्तोऽसौ मलिन आश्वयुक्॥ भाद्रपदान्ते कन्याप्रवेशात्॥ एवं च सति कन्यानुपजीव्यवि
हितं यद्दैवं पित्र्यं च तन्मलिन आश्वयुजे न कर्त्तव्यं किं तर्हि तुलासंक्रान्तियुते शुद्धाश्वयुजे॥ न चैवं सति महालयाख्यापरपक्षश्राद्ध
स्यापि तुलामासे कर्त्तव्यतापद्येत॥ तस्यापि कन्यानुपजीव्यविहितत्वात्॥ तथा च पुराणं॥ कन्यागते सवितरि यान्यहानि तु षोड
श। क्रतुभिस्तानि तुल्यानि पितृणां दत्तमक्षयमिति॥ मैवं। भाद्रपदकृष्णपक्षस्य कन्यासंक्रान्तिस्पर्शित्वेन कन्योपजीविनोप्यपरप
क्षस्य तत्रानुष्ठानं त्राकयत्वात्॥ तथा च कार्ष्णाजिनिः॥ अन्ते वा यदि वा मध्ये यत्र कन्यां रविर्व्रजेत्॥ स पक्षः सकलः पूज्यः श्राद्धषोडशकं
प्रतीति॥ वृद्धमनुरपि॥ मध्ये वा यदि वाप्यन्ते यत्र कन्यां रविर्व्रजेत्॥ स पक्षः सकलः पूज्यः श्राद्धं तत्र विधीयत इति॥ किं चैनेदमप
रपक्षश्राद्धं कन्यामुपजीवति॥ तस्यामनादरस्मरणात्॥ तथा च कौत्सकर्ष्यः॥ आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पंचमः॥
श्राद्धकालः स विज्ञेयः कन्यां गच्छतु वा न वेति॥ अतः कन्यागते सवितरीति वचनं तत्पक्षस्य कन्यायोगं प्रशंसति॥ अत एव
क्रतुभिस्तानि तुल्यानीति तत्रोक्तं॥ एवं सति तुलास्थे कर्त्तुरिति वचनं महालयव्यतिरिक्तवचनं॥ अथ महालयस्यापि गौण
कालमभिधेयार्थं तदुक्तं॥ तथा हि॥ कन्यासंक्रान्तियुक्तो भाद्रपदकृष्णपक्ष[illegible]यमुख्यः कालश्चेन्नापि निमित्तेन मुख्यका
लोऽसंभवेद्यावद्वृश्चिकदर्शनं तस्य गौणः कालः स्मृतिसिद्धः॥ तत्र किं कन्यायुक्ते मलिनाश्वयुजे तच्छ्राद्धं कर्त्तव्यं उ

तकन्यारहिते त्वलोपे तेषु द्वादशस्वहःस्विति वीप्सायां बलात्स्थ्यकत्वेरत्ययमिति विधीयते। एवमन्यान्यप्युत्तरमासे कर्तव्यविषयाणि
वचनान्यूदाहार्याणि॥ तदेवं कार्याकार्यविवेकः पंचधा संपन्नः। तत्र किंचिन्मलमास एव कर्तव्यं। तद्यथा॥ मलमासमृतानां यदाक-
दाचिन्नित्यादिकं। अन्यमासमृतानां तु प्रथमाब्दिकं च। किंचित्तु शुद्धमास एव कर्तव्यं। तद्यथोपाकर्मादि। किंचिदुभयत्रापि क-
र्तव्यं। तद्यथा श्राद्धोदकादि॥ किंचित्तु नयोरन्यतरस्मिन्निमित्तवशात्कर्तव्यं। तद्यथा। द्वादशाहसपिंडादि। किंचिन्मलमासे वर्ज्यं॥
तद्यथा। अनित्यमनिमित्तं चेत्यादि॥ अथ मलमासस्यैव द्विराषाढसंज्ञको विशेषरुच्यते॥ तत्र बृहन्मिहिरः॥ माधवाद्येषु ष-
ट्स्वेकमासि दर्शद्वयं यदा॥ द्विराषाढः स विज्ञेयः शेते कर्कटके च्युत इति॥ इयं च द्विराषाढसंज्ञा तरनाविनि संवत्सरे हरि-
स्वापविवेकायोपयुज्यते॥ अत एव बृहन्मिहिरः॥ मेषादिमिथुनांतेषु यदा दर्शद्वयं भवेत्॥ अब्दांतरे तदा वर्षं मिथुनार्के
हरिः स्वपेत्॥ कर्कटादित्रिके चापि यदा दर्शद्वयं भवेत्॥ अब्दांतरे तदा वर्षं कर्कटार्के हरिः स्वपेदिति॥ ॥इति मासनिर्णयः
॥ ॥अथ पक्षः॥ ॥पक्षशब्दः पक्षपरिग्रह इत्यस्माद्धातोर्निष्पन्नः। दैवकार्यार्थिपित्र्यकार्यार्थिं वा पक्षते परिगृह्यते यः का-
लविशेषः स पक्षः॥ अथ वा चंद्रस्य पंचदशानां कलानां पूरणं क्षयो वा यत्र परिगृह्यते स पक्षः॥ तथा च वाजसनेयि- ३०
नः। चंद्रमा एष संवत्सरनिर्वाहकस्य प्रजापतेः कलापूरणापक्षयावामनंति॥ एष संवत्सरः प्रजापतिः षोडशकलः त-
स्य रात्रय एव पंचदश कलाः ध्रुवैवास्य षोडशी कला स रात्रिभिरेवापूर्यतेऽप च क्षीयत इति। तथा त एवं चाग्निविषया

दक्षिणोत्तरमार्गयोः शुक्लकृष्णपक्षावपक्षयापूरणात्मकाविष्टापूर्तादिकारिभिरुपासकैश्च प्राप्येते इति पठंति। अथ ये यज्ञेन दा-
नेन तपसा लोकं जयंति ते धूममभिसंभवंति धूमाद्रात्रिं रात्रेरपक्षीयमाणं पक्षमिति॥ ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धामुपास-
ते तेऽर्चिरभिसंभवंत्यर्चिषोऽहरह्न आपूर्यमाणपक्षमिति च॥ तैत्तिरीयाश्च सावित्रचयने पूर्वोत्तरपक्षयोः प्रत्येकं पंचदशाहोरात्रका-
वामनंति॥ संज्ञानं विज्ञानं दर्शा दृष्टेति एतावानुवाको पूर्वपक्षस्याहोरात्राणां नामधेयानि प्रस्तुतं विष्टुतं सुता सुतन्वतीत्येतावनुवा-
कावपरपक्षस्याहोरात्राणां नामधेयानीति॥ अयमर्थः॥ संज्ञानं विज्ञानमित्येकोऽनुवाको मंत्रकांडे पठितः। तस्मिन्ननुवाके शुक्लपक्ष-
स्याह्नां नामधेयानि पंचदश नपुंसकानि पठ्यंते। दर्शा दृष्टेत्यपरानुवाकस्तत्र शुक्लपक्षस्य रात्रीणां नामधेयानि पंचदश स्त्रीलिंगा-
नि पठितानि॥ तथा प्रस्तुतं विष्टुतमित्येकोऽनुवाकः॥ सुता सुन्वतीत्यपरोऽनुवाकः॥ तावुभौ कृष्णपक्षविषयौ पूर्ववद्योजनीयावि-
ति॥ ते चानुवाका एवं श्रूयंते। संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत्संकल्पमानं प्रकल्पमानमुपकल्पमानमुपक्लृप्तं क्लृप्तं श्रे-
यो वसीय आयत्संभूतं भूतं॥ दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना आप्यायमानाप्यायमाना प्याया सूनृतेतरा आपूर्यमाणा
पूर्यमाणा पूरयंती पूर्णा पौर्णमासी॥ प्रस्तुतं विष्टुतं कल्याणं विश्वरूपं शुक्रममृतं तेजस्वि तेजः समिद्धं अरुणं भानुमन्मरी-
चिमदभितपत्तपस्वत्॥ सुता सुन्वती प्रसुता सूयमानाभिषूयमाणा पीती प्रपा संपा तृप्तिस्तर्पयंती कांता काम्या कामजा-
तायुष्मती कामदुघेति॥ क्षयो वापक्षयो वा पक्षशब्दः स च द्वेधा विभक्तस्य मासस्यैकैकमर्धं ब्रूते॥ पंचदशस्तोमनामकेन सामस-

सूक्तेन मध्ये त्रि न्वस्य त्रिवृत्स्तोमनामकस्य सामसमूहस्य पूर्वोत्तरभागाभ्यामुत्पन्नत्वात्तयोः पूर्वापरपक्षयोः तौ च द्वौ
पक्षौ क्रमेण देवानामसुराणां च क्रमेण स्वत्वात्तयोः प्रशस्ताप्रशस्तत्वे तदेतत्सर्वं होतृब्राह्मणे तैत्तिरीयाः पठंति। प्रजापतिरका
मयत प्रजायेयेति स तपोतप्यत स त्रिवृतं स्तोममसृजत तं पंचदशस्तोमो मध्यत उदतृणत्तौ पूर्वपक्षश्चापरपक्षश्चाभ
वतां पूर्वपक्षं देवा अन्वसृज्यंतापरपक्षमन्वसुरास्ततो देवा अभवन्परासुरा यं कामयेत वसीयान्स्यादिति तं पूर्वपक्षे
याजयेत् वसीयानेव भवति यं कामयेत पापीयान्स्यादिति तमपरपक्षे याजयेत्पापीयानेव भवति तस्मात्पूर्वपक्षोऽपरपक्षा
त्करुण्यतर इति। वसीयान्वसुमत्तरः। पापीयान्द्रव्यहीनः। करुणत्वं च फलप्रापकत्वेन करणमतिशयेनार्हतीति करुण्य
तरः। तदेवमस्मिन्प्रकरणे संवत्सरायनर्तुमासपक्षा निरूपिताः। ॥ इति माधवीये कालनिर्णये द्वितीयं प्रकरणं॥ ॥
अथ तिथयो निरूप्यंते। तत्र तिथिशब्दस्तनोतेर्धातोर्निष्पन्नस्तनोति विस्तारयति वर्धमानां क्षीयमाणां वा चंद्रकलामेको
यः कालविशेषः सा तिथिः। यद्वा यथोक्तकलया तन्यत इति तिथिः। तदुक्तं सिद्धांतशिरोमणौ। तन्यंते कलया यस्मात्त
स्मात्तास्तिथयः स्मृता इति। एतदेवाभिप्रेत्य स्कांदे पठ्यते। अमा षोडशभागेन देवि प्रोक्ता महाकला। संस्थिता पर- ३१
मामाया देहिनां देहधारिणी। अमादिपौर्णमास्यंता या एव शशिनः कलाः संस्थिता परमाख्याया तिथयस्ताः समाख्या

ताः षोडशैव वरानने इति। अयमर्थः। या महामाया आधारशक्तिरूपा देहिनां देहधारिणी संस्थिता सा चंद्रमंडलस्य षोडशभागे
न परिमिता चंद्रदेहधारिण्यमानाम्नी महाकलेति प्रोक्ता क्षयोदयरहिता नित्या तिथिसंज्ञिकैव। इतरा अपि पंचदश कलाव्यवहा
रोपयोगिन्यः क्षयोदयवत्यः पंचदश तिथयो भवंतीति तिथयः षोडशैवेत्यविरुद्धं वचनमिति। श्रुतिस्त्वस्मिन्नेवार्थेपि ह्यनिर्णय एवोदाहृता।
तस्य रात्रय एव पंचदश कलाः ध्रुवैवास्य षोडशी कलेति। एवं सत्यत्र सामान्यविशेषरूपेण तिथिर्द्वैविध्यमुक्तं भवति तत्र येयममहाका
क्षयोदयवर्जिता ध्रुवा षोडशी कला तदुपलक्षितः कालस्तिथिसामान्यं। यस्त्ववशिष्टा वृद्धिक्षयोपेताः पंचदश कलास्ताभिर्विशिष्टाः का
लविभागास्तिथिविशेषास्तासां च पंचदशानां कलानामेकैकां कलां वह्न्यादयः प्रजापत्यंताः पंचदेवताः क्रमेण पिबंति। तत्र वह्निपेया
कला प्रथमं पीयत इति प्रथमेत्युच्यते तया युक्तः कालविशेषः प्राथम्यवाचिना प्रतिपच्छब्देनाभिधीयते एवं द्वितीयादीनां पंचदशपर्यंता
नां तिथीनां नामान्यवगंतव्यानि एता एताः कृष्णपक्षे तिथयो भवंति। पुनश्च ताः पीताः कलाः तेनैव क्रमेण तत्तथा वह्न्यादिदेवताभ्यो
निर्गत्य चंद्रमंडलं पूरयंति ताभिर्युक्ताः कालविशेषाः शुक्लपक्षगताः प्रतिपदाद्यास्तिथयो भवंति। वह्न्यादिदेवतानां कलापानं सो
मोत्पत्तौ पठ्यते। तथा हि। प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः। विश्वेदेवास्तृतीयायां चतुर्थं सलिलाधिपः। पंचमीं तु
वषट्कारः षष्ठीं पिबति वासवः। सप्तमीमृषयो दिव्या अष्टमीमज एकपात्। नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलां। दश

म्मीं पिबते वायुः पिबेत्येकादशीमुमा॥ द्वादशीं पितरः सर्वे समं भागं तु भागशः॥ त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलां॥ चतुर्दशीं पशु
पतिः पंचदशीं प्रजापतिः॥ निःपीतः कलाशेषश्चंद्रमा न प्रकाशते॥ कलां षोडशिकां यां तु अपः प्रविशते सदा॥ अमायां तु सदा सोम
ओषधीः प्रतिपद्यते॥ तमोषधिगतं गावः पिबंत्यंबुगतं च यत्॥ तत्क्षीरममृतं भूत्वा मंत्रपूतं द्विजातिभिः॥ हुतमग्निषु यज्ञेषु पुनराप्या
यते शशी॥ दिने दिने कलावृद्धिः पौर्णमास्यां तु पूर्यते इति॥ ज्योतिःशास्त्रे तु सिद्धांतशिरोमणिकारेण तिथिरेवं प्रदर्शिता॥ अर्काद्वि
निःसृतः प्राचीं यद्यात्यहरहः शशी॥ तच्चांद्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिरिति॥ अयमर्थः॥ सूर्यमंडलस्य अधःप्रदेशाव
र्ती शीघ्रगामी चंद्रमंडलस्य ऊर्ध्वप्रदेशावर्ती मंदगामी सूर्यस्तथा सति। तयोर्गतिविशेषवशाद्यदा चंद्रमंडलमन्यूनमनतिरिक्तं सत्सू
र्यमंडलस्याधोभागे व्यवस्थितं भवति तदा सूर्यरश्मिभिः साकल्येनाभिभूतत्वाच्चंद्रमंडलमीषदपि न दृश्यते परितने दिने सूर्या
च्छीघ्रगत्या विनिःसृतश्शशी प्राचीं याति त्रिंशदंशोपेतराशौ द्वादशभिर्भागैः सूर्यमुल्लंघ्य गच्छति। तदा चंद्रस्य पंचदशेषु भागे
षु प्रथमभागो दर्शनयोग्यो भवति॥ सोयं भागः प्रथमकलेत्यभिधीयते। तत्कलानिःपत्तिपरिमितः कालः प्रतिपत्तिथिर्भव
ति॥ एवं द्वितीयादितिथिष्ववगंतव्यं॥ तदेतद्विष्णुधर्मोत्तरे। विस्पष्टमभिहितं। चंद्रार्कगत्या कालस्य परिच्छेदो यदा भवेत्॥ तदा
तयोः प्रवक्ष्यामि गतिमाश्रित्य निर्णयं॥ भगणेन समग्रेण ज्ञेया द्वादशराशयः॥ त्रिंशांशश्च तदा राशेर्भाग इत्यभिधीयते॥ ३२
आदित्याद्विप्रकृष्टश्च भागद्वादशकं यदा॥ चंद्रमाः स्यात्तदा राम तिथिरित्यभिधीयते इति॥ सेयं द्वादशभिर्भागैः सूर्यमु

ल्लंघितवती प्रथमा चंद्रकला शृंगद्वयोपेता सूक्ष्मरेखाकाराशौ क्रमीषदुपयाति॥ उत्तरोत्तरदिनेषु सूर्यमंडलविप्रकर्षतारतम्या
नुसारेणाशौ क्रममुपचीयते॥ अनयैव रीत्या असंनिकर्षतारतम्येन मेचकत्वमुपचीयते॥ तदेतदुक्तं सिद्धांतशिरोमणौ। उपचयमुपया
ति शौक्ल्यमिंदोस्त्यजत इनं व्रजतश्च मेचकत्वं। जलमयजलजस्य गोलकत्वात्प्रभवति तीक्ष्णविषाणरूपतास्येति सूर्याचंद्रमसोर्यो
संनिकर्षविप्रकर्षौ तयोरवसाने दर्शपूर्णिमयोः संपद्यते॥ तदाह गोभिलः॥ यः परो विप्रकर्षः सूर्याचंद्रमसोः सा पौर्णमासी
यः परः संनिकर्षः साऽमावास्येति॥ न चैवं चंद्रकलानां सूर्ये प्रवेशनिर्गमौ प्रतीयते सोमोत्पत्तिवह्न्यादिदेवतासु॥ नायं दो
षः॥ अस्मदादिदर्शनापेक्षया ज्योतिःशास्त्रस्य प्रवृत्तत्वात् सोमोत्पत्तिवह्न्यादिदेवतानां तत्कालप्रवृत्तिरदृष्टिर्विवक्षिता॥ यदि सूर्ये
प्रवेशनिर्गमौ यदि वा वह्न्यादिदेवतासु सर्वथापि कलाप्रयुक्ता एव प्रतिपदादितिथयः॥ ननु सावनदिवसेषु सौरदिवसेषु च नि
र्णयमुपेक्ष्य चांद्रतिथिष्वेव कृतो निर्णयोद्यम इति चेत्॥ संदेहसद्भावादिति॥ न खलु सौरसावनदिवसयोः संदेहसद्भावोऽस्ति
नियतपरिमाणत्वात्॥ तच्च ब्रह्मसिद्धांतेभिहितं॥ सावनं स्यादहोरात्रमुदयादोदयाद्रवेः॥ रवेस्त्रिंशांशकराश्यंशस्तिथिसंभो
गेणैंदवमिति॥ एकस्मिन् राशौ यावंतं कालं रविवर्त्तते तावतः कालस्य त्रिंशो योयमंशः स सौरो दिवसः॥ तिथिरेका कलात
त्संभोगद्वयोर्यावता कालेन निःपद्यते तदैंदवं दिनं॥ न चात्र सौरसावनयोरिव चांद्रेपि दिने संदेहाभावः शंकनीयः। ह्रास

दृष्टी वगर्गेणाद्यर्त्तिः ॥ खर्वो दर्पस्तथा हिंस्रस्त्रिविधं तिथिलक्षणं ॥ धर्माधर्मवशादेव तिथिस्त्रेधा विवच्छिनेति ॥ खर्वा समति
थिः ॥ दर्पो वृद्धियुक्ता ॥ हिंस्रा ह्रासयुक्ता ॥ तस्यैतस्य त्रैविध्यस्य विपरिवर्त्तनविशेषेण तिथिः पूर्णा खंडा चेति द्वैविध्यमापद्यते ॥
तत्र संपूर्णा स्कंदपुराणे दर्शिता ॥ प्रतिपत्प्रभृतयः सर्वा उदयादोदयाद्रवेः । संपूर्णा इति विख्याता हरिवासरवर्जिता इति ॥ हरिवा
सरः एकादशी ॥ यातु नोक्तलक्षणा सा खंडतिथिः ॥ तत्र संपूर्णायां विधिनिषेधयोर्नास्ति संदेहः ॥ खंडतिथौ तु विधिनिषे
धव्यवस्थामाह गार्ग्यः ॥ निमित्तं कालमादाय वृत्तिर्विधिनिषेधयोः ॥ विधिः पूज्यतिथौ तत्र निषेधः कालमात्रके ॥ तिथीनां
पूज्यता नाम कर्मानुष्ठानयोग्यता ॥ निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षत इति ॥ एवं च सति खंडतिथौ पूज्यत्वं निर्णेतव्यं
भवती ॥ तत्र प्रतिपदमारभ्य पंचदश्यंतास्तिथयः क्रमेण निर्णीयंते ॥ तत्र प्रतिपच्छब्द उपक्रमे वर्त्तते ॥ चांद्रः पक्षो मासो वा
प्रतिपद्यते प्रारभ्यते यस्यां तिथौ सा तिथिः प्रतिपत् ॥ प्रारंभवाचित्वं प्रतिपच्छब्दस्य बह्वृचब्राह्मणारण्यकसूत्रेषु प्रयोगादव
गम्यते ॥ तथा च श्रुतिः ॥ आत्वा रथं यथोतय इदं वसो सुतमंध इति मरुत्वतीयस्य प्रतिपदनुचराविति ॥ अयमर्थः ॥
मरुत्वतीयं नाम किंचिच्छस्त्रं तस्यात्वा रथमित्ययं मंत्रः प्रतिपत्प्रथमं पाठ्यः इदं वसो सुतमंध इत्ययं मंत्रोऽनुचरः प ३३
श्चात्पाठ्य इति ॥ तथा च तैत्तिरीया अश्वमेधब्राह्मणमामनंति । पवस्वा वाजसातय इत्यनुष्टुप्प्रतिपद्भवतीति ॥

तथा त एव दर्शपूर्णमासप्रक्रमणे पठंति ॥ सामिधेनीरनुवक्ष्यन्नेताः व्याहृतीः पुरस्ताद्दध्यात् अग्र एव प्रतिपदं कुरुत इति ॥ सा च प्रतिपत्ति
थिर्यदा सूर्योदयमारभ्य पुनरुदयपर्यंता भवति तदा शुद्धा प्रतिपदि विहितं सर्वं निःशंकैरनुष्ठेयं ॥ शुद्धत्वं च नारदीयपुराणे दर्शि
तं ॥ आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः । या तिथिः सा तु शुद्धा स्यात्सर्वतिथ्योऽप्ययं विधिरिति ॥ सूर्यसिद्धांतेपि ॥ सर्वास्वेतास्व
तिथिषूदयादोदयं स्थिताः ॥ शुद्धा इति विनिश्चेयाः षष्टिनाड्यो हि वै तिथिरिति ॥ यदा तु सा प्रतिपत्खंडतिथिः सती पूर्वापरदिन
योर्दर्शद्वितीयाभ्यां युज्यते तदा दर्शयुक्तायाः पूज्यत्वात्तत्रानुष्ठेयं ॥ तत्पूज्यत्वं च पैठीनसिराह ॥ पंचमी सप्तमी चैव नवमी च त्रयोद
शी ॥ प्रतिपद्दर्शमी चैव कर्त्तव्या संमुखी तिथिरिति ॥ संमुखत्वं स्कंदपुराणे विवेचितं ॥ संमुखी नाम सा या सायाह्नव्यापिनी दृश्यते यदा ॥
प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी ॥ व्यासोपि ॥ प्रतिपत्सैव कर्त्तव्या या भवेदापराह्णिकी । दैवं कर्म ततः यत्नेन पित्र्यं वा मनुरब्रवी
त् ॥ सायाह्नापराह्णादयः कालविशेषाः सावनदिवसगतस्याह्नो भेदादवगंतव्याः । स च दिवसो विष्णुधर्मोत्तरे विवेचितः ॥ लघ्वक्ष
रसमा मात्रा निमेषः परिकीर्त्तितः ॥ अतः सूक्ष्मतरः कालो नोपलभ्यो भृगूत्तम ॥ नोपलभ्यं यथा द्रव्यं सूक्ष्मं परमाणुतः ॥ द्वौ
निमेषौ त्रुटिर्ज्ञेया प्राणो दश त्रुटिः स्मृतः ॥ विनाडिका तु षट्प्राणास्तत्षष्टिर्नाडिका स्मृता ॥ अहोरात्रं तु तत्षष्ट्या नित्यमेतत्प्र
कीर्त्तितं ॥ त्रिंशन्मुहूर्त्तश्च तथा अहोरात्रेण कीर्त्तितः ॥ तत्र पंचदश प्रोक्ता राम रात्रिर्दिवा तथा ॥ उत्तरां च यदा काष्ठां क्रमाद
क्रमते रविः ॥ तदा तदा भवेद्वृद्धिर्दिवसस्य महाभुज ॥ दिवसश्च तदा राम ह्रासं समधिगच्छति ॥ तदाश्रितमुहूर्त्तानां हानि

ऽहीयात तथा तथा॥ दक्षिणां च यदा काष्ठां क्रमादाक्रमते रविः। दिवसस्य तदा हानिर्निशा तद्वा तावदेव तु॥ क्षीयंते तस्य हानौ च तन्मुहूर्त्तास्तथैव च॥
रात्र्यांश्चितास्तु वर्धंते रात्रिवृद्धिस्तथैव च॥ यदा मेषं सहस्रांशुस्तुलां चैव प्रपद्यते॥ समरात्रिंदिवः कालो दिनशब्दस्य वाचकः इति॥ वाचको
वाच्यार्थ इति यावत्॥ अत्र ये मुहूर्त्ता अभिहितास्तेषां नामानि श्रुतिज्योतिश्शास्त्रस्मृतिषु विविधानि दर्शितानि। तत्र श्रुतिं तावत्तैत्ति-
रीयाः पठंति॥ चित्रः केतुर्दाता प्रदाता सविता प्रसविताभिशास्तानुमंतेत्येतेनुवाका मुहूर्त्तानां नामधेयानीति॥ तत्र द्वाभ्यां द्वाभ्यां प-
दाभ्यामेकैकस्यानुवाकस्य प्रतीकमुक्तं तथा सति चत्वारोनुवाकाः संपद्यंते॥ तत्र प्रथमे शुक्लपक्षगतस्याह्नो मुहूर्त्ता द्वितीये तद्रात्रे
तृतीये कृष्णपक्षगतस्याह्नः चतुर्थे तद्रात्रेरिति विवेकः। ते चानुवाका ४ वक्ष्यंते॥ चित्रः केतुः प्रभानाभान्संभान् ज्योतिष्मांस्तेजस्वा-
नातपंस्तपन्नभितपन् रोचनो रोचमानः शोभनः शोभमानः कल्याणो ० दाता प्रदातानंदो मोदः प्रमोद आवेशयन्निवेशयन् संवे-
शनः संशांतः शांतः आभवन् प्रभवन् संभवन् संभूतो भूतः सविता प्रसविता दीप्तो दीपयन् दीप्यमानः ज्वलन् ज्वलिता तपन् वि-
तपन् संतपन् रोचनो रोचमानः शुंभुः शुंभमानो वामः॥ अभिशास्तानुमंतानंदो मोदः प्रमोद आसादयन्निषादयन् संसादनः
संसन्नः सन्न आभुर्विभुः प्रभुः शंभुर्भुव इति॥ एतेषु मुहूर्त्तेष्वेकैकमुहूर्त्तस्य पंचदश भागाः सूक्ष्ममुहूर्त्ताः। तथा च वेद श्रास्त-
णां इदानी तदानीमिति॥ × प्रमुः × एते वै मुहूर्त्तानां मुहूर्त्ता इति। इदानीमित्यादि॥ को नु वा कोमंत्र कांड ४ वं पठ्यते।
इदानीं तदानीमेतर्हि क्षिप्रमजिरमाशुर्निमेषः फणो द्रवन्नतिद्रवन् त्वरंस्त्वरमाण आशुराशीयाञ्जव इति। २५

ज्योतिःशास्त्रे तु अहोरात्रयोस्त्रिंशन्मुहूर्त्तानां नामानि कश्यपेनोक्तानि॥ गौरी वह्निः सर्पमित्रपितरो वसवस्त्वंबुविश्वाख्यया ब्रह्मनामोरु-
हसंभवेंद्रकुतंभुग्देवेशानक्षेचराः॥ तोयेशार्यमयोनयो दश तथा पंच क्षणा वासरे॥ अजाहिर्बुध्न्यपूषाश्विनाः स्युः कीनाशोग्निर्धातृचंद्रा-
दितीज्याः। विष्णुर्भानुस्त्वष्टृधाता मुहूर्त्ताः॥ रात्रौ क्रूरास्त्वंतकाद्याग्निरुद्रा इति॥ स्मार्त्तानि तु नामानि पुराणे दर्शितानि॥ रौद्रश्चैव तथा श्वेत मैत्रस्त-
था सारभटः स्मृतः॥ सावित्रो वैश्वदेवश्च गांधर्वः कुतपस्तथा॥ रौहिणश्च विरिंचश्च विभवो निर्ऋतिस्तथा॥ शंबरो विभवश्चैव भेदाः
पंचदश स्मृता इति॥ एते पंचदश सूर्योदयादारभ्य क्रमाद्दिवामुहूर्त्ताः॥ तथा रात्रिमुहूर्त्ताः॥ शंकरश्चाजपादश्च तथाहिर्बुध्न्यमैत्रकौ॥
आश्विनो याम्यवाह्नेयौ वैधात्रश्चांद्र एव च॥ आदितेयोथ जैवश्च वैष्णवः सौर एव च॥ ब्राह्मो नाभस्वतश्चैव मुहूर्त्ताः क्रमशो निशीति॥ यद्यो-
क्तनानाविधनामकत्रिंशन्मुहूर्त्तैरपि तस्य सावनाहोरात्रस्य यदहः पंचदशमुहूर्त्तात्मकं तस्याह्नो भागाः पराह्णसायाह्नप्रातराद-
यः। ते चाह्नो भागा मतभेदेन पंचधा विकल्प्यंते॥ द्विधा त्रेधा चतुर्धा पंचधा पंचदशधा वाहर्विभज्यत इति पंच मतभेदाः। तत्र द्वेधा वि-
भागः स्कंदपुराणे दर्शितः। आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्तथा परः इति त्रेधा विभागोपि स्कंदपुराणे दर्शितः। ऊर्ध्वं सूर्योदयात्प्रोक्तं
मुहूर्त्तानां तु पंचकं॥ पूर्वाह्णः प्रथमः प्रोक्तो मध्याह्नस्तु ततः परः॥ अपराह्णस्ततः प्रोक्तो मुहूर्त्तानां तु पंचकमिति॥ श्रुतावपि प्रातस्सा-
दहस्तु पूर्वाह्णे देवा अश्नन् मध्यंदिने मकुष्या अवाह्णे दिवि देव इयते यजुर्वेदे तिष्ठति मध्ये अह्नः सामवेदेनास्तमये
महीयते वेदै श्शून्यस्त्रिभिरेति सूर्य इति॥ श्रुत्यंतरेपि × अपराह्णे पितर इति॥ एवमेव विभागमभिप्रेत्य सहस्रसंवत्सरस

त्र आत्मनेपि आम्नायते॥ श्रुतिः पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितॄणामिति॥ चतुर्धा विभागमाह गोभिलः॥ पूर्वाह्णः
प्रहरं सार्द्धं मध्याह्नः प्रहरं तथा॥ आतृतीयादपराह्णः सायाह्नश्च ततः परं इति॥ पंचधा विभागं व्यास आह॥ मुहूर्तत्रितयं प्रातस्तावा
नेव तु संगवः॥ मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णोपि तादृशः॥ सायाह्नस्त्रिमुहूर्तः स्यात्सर्वधर्मबहिष्कृत इति॥ हेद्रूपराशरोपि लिखा
प्रत्यादित्यात्मुहूर्तास्त्रय एव तु॥ प्रातस्तु स स्मृतः कालो भागश्चाह्नः स पंचमः॥ संगवस्त्रिमुहूर्तोथ मध्याह्नस्तत्समः स्मृतः॥
ततस्त्रयो मुहूर्ताश्चाथापराह्णो विधीयते॥ पंचमोपदिनांशोयः स सायाह्न इति स्मृत इति॥ एवमेव विभागमभिप्रेत्य कश्चिन्मंत्रः सं
गवकालमवलंब्य व्यवजहार॥ मंत्रं च बह्वृचा आश्विने सूक्ते आमनंति॥ उतायातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य दिवा न
क्तमवसा शंतमेन नेदानीं पीतिरश्विना ततानेति॥ अस्मिन्मंत्रे प्रातस्संगवमध्यंदिनानां स्वसंज्ञाभिर्व्यवहृतत्वात्तदवशिष्टयोरपि
भागयोरप्येतत्त्रितयमुपलक्षणं द्रष्टव्यं॥ तैत्तिरीयब्राह्मणेपि यथोक्तानां पंचानां प्रातरादीनां भागानां मध्यवर्तिषु संधिषु अग्नि
ष्टोमोक्थ्यषोडशातिरात्राख्यानां चतसृणां सोमसंस्थानां निर्माणं॥ वक्तुं यथोक्तेपंच भागाः साधिष्ठातृदेवताः समाम्नाताः
देवस्य सवितुः प्रातर्मित्रस्य संगवः बृहस्पतेर्मध्यंदिनः भगस्यापराह्णः वरुणस्य सायमिति॥ छंदोगाश्च सप्तभक्त्युपेतसा
मआदित्यात्मनोपासनं च कुर्मादित्यस्य संबंधिनः कालभेदाच्चिमज्यते वाहिंकारादि सप्तभक्तिरूपतां विवचाव आमनं २५
ति॥ तस्य यत्पुरोदयात्स हिंकारः॥ अथ यत्प्रथमोदिते स प्रस्तावः॥ अथ यत्संगववेलायां स आदिः॥ अथ यत्संप्रति मध्यं

दिने स उद्गीथः॥ अथ यदूर्ध्वं मध्यंदिनात्प्रागपराह्णात्स प्रतिहारः॥ अथ यदूर्ध्वमपराह्णात्प्रागस्तमयात्स उपद्रवः॥
अथ यत्प्रथमास्तमिते तन्निधनमिति॥ वाजसनेयिनोप्येवमामनंति॥ आदित्यो वै सर्व ऋतवः स यदैवोदेत्यथ वसंतो य
दा संगवोथ ग्रीष्मो यदा मध्यंदिनोथ वर्षा यदापराह्णस्तदा शरद्यदास्तमेत्यथ हेमंत इति॥ पंचदशधा विभागः शंखेन द
र्शितः॥ रौद्रश्चैव तथा मैत्रस्तथा शालकटः स्मृतः॥ सावित्रश्च जयंतश्च गांधर्वः कुतपस्तथा॥ रोहिणश्च विरंचश्च विजयो नै
र्ऋतिस्तथा॥ महेंद्रो वरुणश्चैव भवेदाः पंचदश स्मृता इति॥ तत्र पंचधा विभागपक्षस्य बहुश्रुतिस्मृतिषु दृष्टत्वात्त
येनैतमेव पक्षमाश्रित्य विधिनिषेधशास्त्राणि प्रवर्तंते॥ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति श्रुतौ प्रातः का
लमुपजीव्य तत्कालीन होमस्य मंत्रविशेषोभिहितः॥ स्मृतावपि संध्यामुपास्य विधिवत्प्रातर्होमं समाचरेदिति होमो गत्वे
न प्रातः काल आश्रितः॥ संगवस्तु कात्यायनेन व्यवहृतः॥ संधिश्चेत्संगवादूर्ध्वं प्राक्पावर्तनाद्रवेः॥ सा पौर्णमासी विज्ञेया सद्य
स्कालविधौ तिथिरिति॥ बौधायनेन मध्याह्नो व्यवहृतः॥ मध्याह्नव्यापिनी या स्यात् एकभक्ते व्रते तिथिरिति॥ अमावास्याया
मपराह्णे पिंडपितृयज्ञेन चरंतीति श्रुत्यापराह्णो व्यवहृतः॥ सायाह्नश्च वरुणस्य पूर्वमेव संमुखीनामेति वचनेनोदाहृ
तः॥ त्रेधा विभागस्तु सोमयागे सवनत्रयत्वप्रयुज्यते॥ यथोक्तेषु पंचसु कालेषु यानि विहितानि कर्माणि तानि दैवपि
अह्नः पूर्वं रात्रिद्वयं तु तात यागीणकाष्ठम्पनुज्ञानाय द्वेधा विभागो दर्शितः॥ चतुर्धा विभागस्तु प्रकरणबलाद्गोभि

लस्य तत्कर्मविशेषे द्रष्टव्यः॥ पंचदशधाविभागे मुहूर्त्तोपजीवनेन विधिनिषेधौ ज्योतिश्शास्त्रेषु द्रष्टव्यौ॥ एवं
च सति प्रसक्ते पंचस्वह्नो भागेषु पंचमं सायाह्नभागं व्याप्य ततः पूर्वं चतुर्थमपराह्णभागं या प्रतिपत्सा स्पृशति तादृ
शी पूर्वविद्धोपवासे प्रशस्ता॥ अत्र तिथीनां वेधः पैठीनसिना दर्शितः। पक्षद्वयेपि तिथयस्तिथिं पूर्वां तथोत्तरां॥ त्रिभि
र्मुहूर्त्तैर्विध्यंति सामान्योयं विधिः स्मृत इति॥ पूर्वेद्युरुदयानंतरममावास्या त्रिमुहूर्त्ता चेत्सा प्रतिपदं विध्यति। प
रेद्युरस्तमयात्प्राग्द्वितीया त्रिमुहूर्त्ता चेत्सापि पूर्वां प्रतिपदं विध्यति। एवमुभयतो विद्धयोर्दिनद्वयवर्तिन्योः प्रति
पदोर्मध्ये किं पूर्वा ग्राह्या उतोत्तरेति विचार्यते। तत्र पूर्वा ग्राह्येत्येवं पैठीनसिस्कंदव्यासाद्युक्तवचनानि पूर्वमुदा
हृतानि॥ निगमेप्येवमेवोक्तं। युग्माग्नियुगभूतानां षण्मुन्योर्वसुरंध्रयोः॥ रुद्रेण द्वादशी युक्ता चतुर्दश्याथ पू
र्णिमा। प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलं। एतद्व्यस्तं महादोषं हंति पुण्यं पुराकृतमिति॥ युग्मं द्वि
तीया॥ अग्निस्तृतीया॥ युगं चतुर्थी। भूतं पंचमी॥ षट् षष्ठी। मुनिः सप्तमी। वसुरष्टमी। रंध्रं नवमी। रुद्र २६
एकादशी। अत्र युग्माग्न्यादिसमयुग्मेषु पूर्वा तिथिरुत्तरेविद्धा ग्राह्या उत्तरा तु पूर्वविद्धेत्युक्तं भवति। स्मृत्यं
तरेपि। एकादशी तथा षष्ठी अमावास्या चतुर्थिका। उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इति। अन्यत्रापि

क्तं। षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी॥ एताः परयुताः पूज्याः पराः पूर्वेण संयुता इति॥ शिवशंकरगीतायां। एका
दश्यष्टमी षष्ठी द्वितीया च चतुर्थिका॥ चतुर्दश्यप्यमावास्या उपोष्याः स्युः परान्विता। इति। एतेषु सर्वेषु वचनेषु प्र
तिपदः पूर्वविद्धायाः पूज्यत्वं प्रतीयते॥ एतस्यैव पक्षस्यानुग्राहकुत्तरविद्धाया निषेधो वृद्धवसिष्ठेन स्मर्यते। द्वि
द्वितीया पंचमी वेधाद्दशमी च त्रयोदशी। चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी इति। द्वितीयादयः स्ववेधेन पूर्वामुत्त
रां च तिथिं हन्युरित्यभिधानादुत्तरा प्रतिपदुपवासे निषिद्धा भवति। आपस्तंबस्तूत्तरविद्धायाः प्रतिपदः पूज्यत्वमाह॥
प्रतिपत्सद्वितीया स्याद्द्वितीया प्रतिपद्युतेति॥ भविष्योत्तरेप्ययमेव पाठः। अत्रेदं चिंत्यते। किमुत्तरविद्धापूज्यत्वव
चनेन प्रतिपन्मात्रं विषयी क्रियते। किं वा प्रतिपद्विशेषः। यदापि प्रतिपद्विशेषस्तदापि किं शुक्लपक्षगत्वे। किं वानुपो
ष्यत्वे। पूर्वदिने अनापराह्णिकत्वे वा। तत्रैव सायाह्निकत्वे वा। तत्रैवापराह्णसायाह्नोभयव्याप्तित्वे वा। बलिदिनेतरत्वे वा।
शुक्लप्रतिपदादिनिखिलप्रतियोगिराहित्यं वा। ननु सर्वत्र संशयः कोटिद्वयमवलंबते। कोटिद्वयालंबी विमर्शः संशय इति
तार्किकडिंडिमः। अतो बहुपक्षोपन्यासोऽयुक्तः। मैवं। प्राणाधिकरणे बहुपपत्तेः। अस्ति हि केवलमीमांसायां प्रथमाध्या
यस्य प्रथमपादावसाने प्राणशब्दविषयीकरणप्रवृत्तमधिकरणं। तस्य संग्राहकावेतौ श्लोकौ भवतः। प्राणोस्मीत्यत्र वाय्वि
न्द्रजीवब्रह्मसु संशयः। चतुर्णां लिंगसद्भावात्पूर्वपक्षस्त्विहेवाद्धिकः। ब्रह्मणोनेकलिंगानि तानि सिद्धान्यनन्यथा॥

अन्येषामन्यथासिद्धत्वात्साधं अनस्तेनेतरदिति॥ अयमर्थः। कौसीतकिब्राह्मणे प्रतर्दनायोपसन्नायेंद्र एवमुपदिदेश॥
प्राणोस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्वेति॥ तत्र संशयः। किं प्राणशब्देन उच्छ्वासनिश्वासकारी वायुर्विवक्षित उत
इन्द्रशब्दाभिधेयः सहस्राक्षत्वाद्याकारवान् देवताविशेषः आहोस्वित्कार्यकारणाध्यक्षो जीवो यद्वा परब्रह्मेति। संति चात्र
ले प्रकरणे पक्षचतुष्टयगमकानि चतुर्विधानि लिंगानि। इदं शरीरं परिगृह्योत्थापयतीति॥ प्राणवायोर्लिंगं अस्मीत्यहंकारवा
देवक्रिंद्रस्य देवताविशेषस्य लिंगं। न वाचं विजिज्ञासीत वक्तारं विद्यादिति वक्तृत्वादिकं जीवलिंगं। आनंदोऽजरोमृत
इत्यादिकं ब्रह्मलिंगं॥ चतुर्णां लिंगानां समबलत्वादिच्छया यत्किंचित्स्वीकर्तव्यमिति पूर्वपक्षः॥ आनंदत्वादीनां ब्रह्मलिंगाना
मनेकत्वाद्देषां च ब्रह्मपरत्वे कथंचिदपि योजयितुं अशक्यत्वाच्छरीरोत्थापनादीनां वा स्वादिलिंगानां तत्र दुपाध्यपदिते अस्यापि
सुसंपादत्वाद्ब्रह्मैवात्र प्राणशब्देन विवक्षितमिति राद्धांत इति॥ पूर्वमीमांसायामपि षष्ठाध्यायस्य सप्तमे पादे सहस्रसंवत्स
राधिकरणस्य संशयपक्षा अष्टावुपन्यस्ताः। किमस्मिन्सत्रे दीर्घायुषां गंधर्वादीनामधिकार उत रसायनेन सिद्धानां मनुष्या
णां। अथापि रघुनृपो वादिशिरः परारूपस्य कुलस्याहोस्विदस्मादेव शास्त्रात्प्रवृत्तस्य सहस्रसंवत्सरमायुर्भविष्यति। किं २०
वा साधिकृतानां पुरुषाणामत्राधिकारः। अत्र संवत्सरोक्तिर्मासपरा वा। द्वादशरात्रिपरा वा॥ दिनपरा वेति। एवं च स
ति संशयस्यैककोटिकत्वं तार्किकैर्यावर्त्यते नतु बहुकोटिकत्वं। नन्वेवमपि यथोक्तानां पक्षाणां प्राणाधिकरणन्या

येन गमकानि लिंगानि वक्तव्यानीति चेतान्युदाहरामः॥ द्वितीयाप्रतिपद्युते त्यक्ते सामान्यतः प्रतिपन्मात्रे प्रतीयेत॥
युग्माग्निवाक्ये प्रतिपद्ग्रहणस्येति पूर्वदिने सत्त्वं स्पष्टमुक्तं पक्षविषयत्वादितरस्य शुक्लपक्षविषयत्वं। न चात्रामा—
वास्यायाः पूर्णिमायाश्च पक्षचलक्षणमिति शंकनीयं॥ चतुर्दश्या च पूर्णिमेति पूर्णिमायाः पूर्वदिनेन सह युग्मत्वा
भिधानात्॥ उदाहृतस्मृत्यंतरेणोपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः इत्यमावास्यायुतायाः प्रतिपद उपोष्यत्वाभि
धानात् द्वितीयायुक्तायाः उपवासव्यतिरिक्तव्रतादिविषयत्वं उपोष्यशब्द इतरव्रतादीनामुपलक्षणमिति चेत् न। पूर्वा
ह्णो वै देवानामिति श्रुत्या व्रतादौ दैवे पूर्वाह्णस्य विहितत्वेनोत्तरदिनस्वीकारे कर्मकालव्याप्तिलाभात्॥ यस्मिन्काले
तु यत्कर्म तत्कालव्यापिनी तिथिरिति कर्मकालव्याप्तिः स्मर्यते॥ नन्वेवोपवासेपि समानमेतदिति वाच्यं॥ उपवास
स्याहोरात्रसाध्यत्वेन खंडतिथौ संपूर्णकर्मकालव्याप्त्यसंभवात्॥ व्याप्तिबाहुल्यं पूर्वविद्धायामेव भवति। अहो
परभागे तु स्वल्पायां रात्रौ च तद्व्याप्तिः। उदये तूपवासस्येति स्मृत्या परेद्युरुपवासः प्राप्नोतीति चेत् न। तस्याः सामा
न्यशास्त्रत्वेन प्रतिपदुपवासाभिधायिनो विशेषशास्त्रस्य बलित्वात्॥ पैठीनसिस्कंदव्यासैः पूर्वतिथावपराह्णव्या
पितयाऽसायाह्नव्यापितयोभयव्यापितया च युग्मत्वाभिधाने सति तासामेव तिसृणां व्याप्तीनां अभावे तु त

रतिथौपसत्त्वयं संपद्यते॥ ननु पूर्वतिथावपराह्णव्याप्त्यभावेत त्संबंधीयकतया सायाह्नव्याप्तेरवश्यंभावित्वेन प्रयत्नर्द्धिया
न निरर्थकमिति चेत्॥ किमिदं केवलसायाह्णाभिधायि वाक्ये चोदयसि॥ किं वोभयाभिधायि वाक्ये। नाद्यः। पराविद्धेन व्याप
राह्णव्याप्तिं सायाह्नमात्रं व्याप्यते। तदा पूर्वविद्धायाः प्रसक्ततया वक्तव्यत्वात्। द्वितीये वैश्वानरेष्टिन्यायेनावयुत्यानुवादो
न विरुध्यते॥ स च न्यायस्तु द्वितीयाद्यपादे व्यवस्थितः। काम्येष्टिकांडे श्रूयते॥ वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाय
ते॥ यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति यद्दशकपालो विरा
जैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निंद्रियं दधातीति॥ अत्र द्वादशकपाले — — ब्रह्मवर्चसा
दि फलविशेषाय याष्टाकपालादिगुणविधिरिति पूर्वपक्षः। उत्पत्तिशिष्टद्वादशकपालेनावरोधे सत्युत्पन्नशिष्टानामष्टा
कपालादीनामनवकाशाभावात् उपक्रमोपसंहारात् गतत्वेन तेषां विधेयत्वं तदभावात् अवयवैरष्टाकपालादिभिर्नांतरीय
कसिद्धिरवयविनो द्वादशकपालस्य स्तुतिरिति सिद्धांतः॥ एवमत्रापि यदा सायाह्णव्यापिन्यपि तत्सुतेन तदा पराह्णव्यापिन्या
ग्रहणं किमुत वक्तव्यमिति नांतरीयकसिद्धया सायाह्नव्याप्त्याऽपराह्णव्याप्तिः प्रशस्यते। स्कंदपुराणे बलिदिनाभिधानाद्याः
(ऋ ले) प्रतिपदः पूर्वविद्धत्वाभिधानादितरास्सर्वा प्रतिपदुत्तरेत्येषः पक्षः प्रतीयते। अकलंकपक्षोपवासापराह्णसायाह्नव

लिदिनानां पंचानां समूहस्य पूर्वतिथिप्रयोजकत्वं सत्यं तिमः पक्षस्तु देति॥ एवं बहुविधसंशये सति निर्णयं ब्रूमः। यद्य
पि द्वितीयाप्रतिपद्युत्तत्र न कोपि विशेषः पश्यते तथाप्यत्रैव प्रतिपत्स्वीकारे युग्माग्न्यादीनि वाक्यानि बाध्येरन्॥
न चांतिमः पक्षो युक्तिसहः। तदा हि पूर्वविद्धायाः प्रयोजकमेवं वक्तव्यं। अकलंकपक्षे सायाह्नापराह्णव्यापिनि बलिदिने
उपवासः स पूर्वविद्धायाः विषय इति तच्च वक्तुं न शक्यते॥ बलिदिने निमित्ते सत्योपवासस्याविधेयत्वात् पूजोत्सवादिक
मेव हि तत्र विहितं अतः समूहस्य प्रयोजकत्वाभावे अव्यक्तपक्षादिपंचस्वन्यतमस्य प्रयोजकत्वमभ्युपेयं॥ तत्र किमिच्छे
या विकल्पः आहोस्विदेकं प्रतिनियतमिति विचारे विकल्पस्तावन्न युज्यते अष्टदोषग्रस्तत्वात्। तथा हि। यदा वलक्षस्य
प्रयोजकत्वं स्वीक्रियते तदोपवासवाक्यस्य प्राप्तं प्रामाण्यं त्यज्येत॥ अप्राप्तमप्रामाण्यं स्वीक्रियेत॥ तथा यदोपवासस्य प्र
योजकत्वं स्वीक्रियते तदा परित्यक्तं प्रामाण्यं स्वीक्रियेत स्वीकृतमप्रामाण्यं परित्यज्येत॥ तदेवमुपवासवाक्ये च
त्वारो दोषाः अनेनैव न्यायेन वलक्षवाक्येपि यथोक्ताश्चत्वारो दोषास्तत्र द्रष्टव्याः। न चैवं व्रीहियवस्थलेपि विकल्पो
न स्यादिति वाच्यं॥ अगत्या तत्र तदाश्रयणात्॥ यदाहुर्भट्टाचार्याः। एवमेषोष्टदोषोपि यद्व्रीहियववाक्ययोः। विकल्प
आश्रितस्तत्र गतिरन्या न विद्यते॥ प्रकृते तु अगत्यंतरसद्भावाद्विकल्पो न। अतो विकल्पासंभवादेकस्यैव प्रतिनि

यतस्य स्वीकर्तव्यत्वे सति शुक्लपक्षस्येव स्वीकरणं युक्ततरं मन्यामहे। तथा सति बह्वनुग्रहसिद्धेर्युग्माग्निवाक्यं
बलिदिनवाक्यमुपवासवाक्यं चेत्येतान्यनुगृह्यन्ते। न ह्येतानि कृष्णपक्षविषयतया कथंचिदपि योजयितुं शक्यं
ते। एतदनुसारेण द्वितीयायुतत्वेन कृष्णपक्षविषयत्वेन संकोचनीयं तस्य सामान्यवचनत्वात्॥ एवं शुक्लकृष्णप्रतिप
दोः क्रमेण पूर्वोत्तरविद्धया व्यवस्थितायां सत्यां योयं द्वितीयायुक्तोपवासनिषेधः सोपि शुक्लपक्षविषयतया योजनीयः।
यद्यप्यापराह्णिकवचनं शुक्लकृष्णपक्षद्वयसाधारणं प्रतिभासते तथापि शुक्लपक्षविषयत्वमेव तस्य न्याय्यं सा
मुख्यानुपजीव्यप्रवृत्तत्वात्॥ कृष्णपक्षे द्वितीयायुतायाः प्रतिपदो विमुखत्वात्। नन्वेवं शुक्लपक्षे यदा सायाह्नं व्या
प्नोति न त्वपराह्णं तदानीमुत्तरतिथिः प्रसज्येतेति चेन्न॥ मैवं समुखी नाम सा या सायाह्नव्यापिनीति वचनेन तादृशे वि
षये पूर्वतिथेर्विधानात्॥ एवमपीषन्न्यूनसायाह्नव्याप्तौ शुक्लपक्षेपि परेद्युरेव प्रसज्येतेति चेत्। प्रसज्यतां नाम पू
र्वतिथेर्युग्मवाक्यविषयत्वाभावात्॥ यदा प्रातरमावास्या त्रिमुहूर्ता ततोधिका वा सायं च प्रतिपत् त्रिमुहूर्ता
ततोधिका वा भवति तादृश्या एवोभयतस्त्रिमुहूर्तवेधा मेत्यास्तिथेस्तद्विषयत्वात्। न च त्रिमुहूर्तवेधः सर्वसा
धारणो न प्रतिपद्विषय इति शंकनीयं। विशेषवचनाभावे सामान्यस्य स्वीकर्तव्यत्वात्। द्वितीयायुतोपवा ३९

सनिषेधस्तु पूर्वेद्युः प्रतिपदस्त्रिमुहूर्तवेधे सति द्रष्टव्यः। सायाह्नव्याप्तिवचने त्रिमुहूर्तवेधोभिधीयते। आपराह्णिक
वचनेन ततोप्यधिकवेधः। तत्रोभयत्र शुक्लप्रतिपत्पूर्वैवोपोष्या। कृष्णप्रतिपत्परेद्युरुदयादूर्ध्वं त्रिमुहूर्ता ततोधि
का वा स्यात्तदा सैवोपोष्या। अन्यथा पूर्वेद्युरिति निर्णयः। व्यासवचने पूर्वविद्धायां शुक्लप्रतिपदि यद्दैवपित्र्योर्वि
गर्हिते तयोर्दैवशब्देन प्रतिपन्निमित्तोपवासो बल्युत्सवश्चेत्युभयं विवक्षितं। वचनांतराभ्यां तयोः श्रृंगआ
ह्निकयाभिधानात्॥ एकादशी तथा षष्ठी अमावास्या चतुर्थिका। उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः॥
आवली दुर्गनवमी तथा दूर्वाष्टमी च या। पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम्॥ इति। नन्वाश्वयुजेसा
यायं नवरात्रोत्सवस्तदुपक्रमस्यापि पूर्वविद्धायां क्रियमाणत्वात् सोप्यत्र विवक्षणीय इति चेत्। न। तस्य
नक्तव्रतत्वात्। एकभक्तनक्तप्रतिपद्दिष्टानां दैवत्वेपि पृथङ्निर्णयस्य वक्ष्यमाणत्वात्॥ न च व्रतादीनि
दैवान्यत्र विवक्ष्यन्तामिति शंकनीयं। तेषूदयप्राशस्त्यस्य वक्ष्यमाणत्वात्। पित्र्यशब्देनात्र मृता
हश्राद्धं विवक्षितं। आपराह्णिकीति तस्मिन्नेव वचनेभिधानात्। आपराह्णिकत्वं च मृताहश्राद्धप्रयोजक
मिति वक्ष्यते। एवं तर्हि तिथ्यंतरमृताहश्राद्धवदत्रापि प्राप्तत्वात् पित्र्यं वा मनुरब्रवीदिति विशेषवि

धानमनर्थकमिति चेन्न ॥ तदपवादार्थत्वात् । यदा पूर्वेद्युरल्पो पराह्णस्पर्शस्तदा परेद्युरेव मन्वादिश्राद्धं प्रतिपदि तु तदपवादेनपू
र्वेद्युरेव विधीयते । न चात्र पित्र्येशब्दस्यैकोद्दिष्टविषयत्वं युक्तमेकोद्दिष्टादीनां मध्याह्नादिकालेषु विहितत्वेन कर्मकाल
व्यापिन्यास्तिथेस्तत्र ग्रहीतत्वात् ॥ तेव कालादर्शकारेण दर्शिताः । आमश्राद्धं च पूर्वाह्णे एकोद्दिष्टं तु मध्यतः । पार्वणं चाप
राह्णे तु प्रातर्वृद्धिनिमित्तकमिति ॥ मनुरपि । पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पार्वणं । एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनि
मित्तकमिति । दैविकं । विश्वामित्र श्राद्धादेवानुद्दिश्य क्रियते यत्तद्दैविकमुच्यते । तन्नित्यश्राद्धवत्कुर्यात् द्वादश्यादिषु
यत्नतः । तस्मान्नैकोद्दिष्टादिकमत्र विवक्षितं । किं तु मन्वादिश्राद्धमन्वष्टकादि चित्पार्वणं श्राद्धं । अत्र पूर्वविद्धायां शुक्ल
प्रतिपदि दैवशब्देन विवक्षितो यत्तूपवासस्तमुदाहरामः । भविष्योत्तरपुराणे । वृद्धत्रपाभिधे येत्र ते कार्तिकमा
सांतदर्शे पायसभोजनादिनियमौ विधायेदमुच्यते । ततो मार्गशीर्षे मासि प्रतिपद्यपरेऽहनि । एष्वास्य गुरुं चोप
वसेन्महादेवं समनुस्मरन्निति । ननु पूर्वविद्धायां शुक्लप्रतिपदि योऽयमुपवासो विहितस्तस्य संकल्पः किं प्रात
र्विहितः कार्यः किं वा प्रतिपत्काले । नाद्यः । अमावास्यावेलायां प्रतिपदुपवाससंकल्पायोगात् । अत एव बौ ४०
द्धायनः । यो यस्य विहितः कालस्तत्कर्मणस्तदुपक्रमे । तिथिर्या विहिता सा तु कार्या नोपक्रमो — तेति । स्कंद

पुराणे ॥ यो यस्य विहितः कालस्तत्कर्मणस्तदुपक्रमे । विद्यमानो भवेदंगं नोदितोपक्रमेणाचितिरिति । न द्वितीयः । प्रातः
कालस्यैव संकल्पांगत्वात् । तथा च स्मर्यते । प्रातः संकल्पयेद्विद्वानुपवासव्रतादिकमिति । तथा प्रातरारभ्य मतिमा
न्कुर्याद्व्रतादिकमिति । नापराह्णे न मध्याह्ने पित्र्यकालौ हितौ स्मृताविति वा । अत्रोच्यते । यथोक्तवचनबलात्प्रा
तरेव संकल्पः कार्यस्तदानीं ज्योतिःशास्त्रप्रसिद्धप्रतिपदभावेपि स्मृतिभिरापादितायाः प्रतिपदः सत्वात् । अत एव
देवलः । यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः । सा तिथिः सकला ज्ञेया स्नानाध्ययनकर्मस्विति वृद्धवचनं न नि
र्दिष्टं । अत्रास्तमयात्पूर्वं मुहूर्त्तत्रयव्यापिनीं तिथिं समनुप्राप्येति वचनं व्याख्येयं । नन्वेततोल्पव्याप्तिर्विवक्षिता
तथा सति पूर्वोक्तवेधाभावे नोत्तरतिथेरेव ग्राह्यत्वप्रसंगात् । तथा त्रिमुहूर्त्तव्याप्तिः स्कंदपुराणे दर्शिता । यां ति
थिं समनुप्राप्य यात्यस्तं व्यापिनी त्रिपः । सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्त्ता च या भवेदिति । शिवरहस्यसौ
रपुराणयोरपि । यां प्राप्यास्तमुपैत्यर्कः सा चेत्स्यात्त्रिमुहूर्त्तिका । धर्मकृत्येषु सर्वेषु संपूर्णां तां विदुर्बुधा इति ॥
वृद्धवसिष्ठोपि । यस्यां तिथावस्तमियात्सूर्यस्स्यात्त्रिमुहूर्त्तकैः । यागदानजपादिभ्यस्तामेवोपक्रमेत्तिथिमिति । ननु
सायंतनेन त्रिमुहूर्त्तेन शुक्लप्रतिपद्युतेनायां तिथौ प्रातरेव संकल्प्य प्रतिपदुपवासः कार्य इति युग्मादिवाक्यमाश्रित्यानि
णत्तेन तिथिस्त्वयेत्तथा स्कसामावद्ध्यो स्फुरखर्वदर्पवाक्यात्परेद्युरुपवासः प्राप्नोतीति चेन्न । मैवं । खर्वदर्पादिवा

क्यस्यैकोद्दिष्टादिविषयत्वात्॥ तथाह व्यासः॥ द्वितीयादिकयुग्मानां प्र॰ज्यतानियमादिषु॥ एकोद्दिष्टादि दृष्ट्या
दोहासविध्यादिचोदने॥ नियमादिष्वित्यादिशब्देन पित्र्यकर्मव्यतिरिक्तव्रतोपवासादिसकलकर्मणो ग्रह
णं॥ एकोद्दिष्टादीत्यादिशब्देन विवाहादिमंगलांगस्य तस्माद्व्यतिरिक्तपार्वणश्राद्धस्य॥ दृष्ट्या दावित्यादिशब्दे
न मांगलिकश्राद्धस्य॥ प्रास दृष्ट्यादीत्यादिशब्देन सर्वस्य ग्रहणं॥ तदेवं वृद्धैः शुक्लप्रतिपद्युपवासे कृत्वाप
रेद्युः पारणं कुर्यात्॥ तत्रेदं चिंत्यते॥ किं प्रातः पारणं किं वा तिथ्यंते इति॥ नाद्यः॥ सुमंतुवचनविरोधात्॥ ति
थिनक्षत्रनियमे तिथिभांते च पारणं॥ अतोन्यथा पारणे कुर्वन् व्रतभंगमवाप्नुयादिति॥ न द्वितीयः॥ देवलव
चनविरोधात्॥ उपवासेषु सर्वेषु पूर्वाह्णे ॰ पारणं भवेत्॥ अन्यथा तु फलस्यार्धं धर्ममेवोपसर्पती
ति॥ नायं दोषः॥ पूर्वाह्णस्य वाक्यस्य सामान्यरूपत्वेन परविद्धोपवासविषयतया संकोचनीयत्वात्॥
एतदेवाभिप्रेत्य नियमे स्मर्यते॥ पूर्वविद्धासु तिथिषु भेषु च श्रवणं विना॥ उपोष्य विधिवत्कुर्यात्ति ४१
थ्यंते च पारणमिति॥ भेषु नक्षत्रेषु॥ स्कंदपुराणेपि॥ तिथीनामेव सर्वासामुपवासव्रतादिषु॥
तिथ्यंते पारणं कुर्याद्॰ नाशिवचतुर्दशीमिति॥ अत्रोपवासव्रतादिष्वित्यादिशब्देनैकभक्त

नक्तायाचितानि गृह्यंते॥ यां तिथिं समुद्दिश्यैतानि पूर्वेद्युरेव विहितानि परेद्युस्तिथिभागे नीतपश्चाद्भोजनं कुर्या
त्॥ अन्यथा पूर्वदिनानुष्ठितैकभक्तादिव्रतानां वैकल्यं स्यादित्यभिप्रायः॥ अस्य च तिथिभांतपारणस्यापवादः॥
क्वचित्स्मर्यते॥ तिथ्यंते चैव भांते च पारणं यत्र चोच्यते॥ यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणमिति॥ यथो
क्तोपवासव्रतस्य फलत्सवोपि पूर्वविद्धायामेव कर्तव्यः॥ स चोत्सवो ब्रह्मपुराणे वामनपुराणे भविष्योत्तरपुरा
णे च प्रपंचितः॥ अतः प्रातःकाले घृतादिकं ब्रह्मपुराणे दर्शितं॥ तस्मात् घृतं प्रकर्तव्यं तत्र मानैर्वैरिति॥ यद्यपि
प्रातरमावास्या वर्तते न तु प्रतिपत्तथापि पूर्वसंकल्पन्यायेन प्रतिपदः साकल्यमाश्रित्य घृतादिकं प्रातरेव कार्यं
न तु यावेतावुपवासव्रतस्य फलत्सवौ पूर्वविद्धायां प्रतिपदि विहितौ तयोः केनापि निमित्तेन तत्रानुष्ठानासंभवे
सति किमुत्तरविद्धा गौणकाल चेन प्रोत्साहि वा मुख्यकालातिक्रमे तयोः परित्याग एव॥ अत्र केचिदाहुः॥
परित्याग एव युक्तः॥ मुख्यकालमंतरेणाप्यनुष्ठाने द्वितीयातृतीयादिष्वपि तदनुष्ठानप्रसंगात्॥ अ
त्रोच्यते॥ यथात्र वर्णिकोपनयनस्य गर्भाष्टमादिमुख्यकालासंभवे सत्याषोडशादिकालो गौण

कालत्वेन स्वीकृताः एवमत्राप्यस्तीति॥ नन्वा वैषम्यात्तत्र हि गौणकालो वाचनिकः। आषाढशुक्लद्वादश्यां चतुर्विंशा
च वत्सराः॥ अस्तु तत्र विंशकाल औपनायनिकः पर इति। न त्वेवमत्रोत्तरप्रतिपदो गौणत्वेन स्वीकारे किंचिद्
वचनमस्ति। अंतरेणापि वचनं युक्तिमात्रेण तत्कल्पनायां षोडशादिवर्षेष्वपि ऊर्ध्वमपि सन्निकर्षविप्रकर्षतारतम्ये
न गौणतरगौणतमाद्युपनयनकालौ प्रसज्येयातां॥ न चेतोपि युक्तो। अतऊर्ध्वं पतंत्येते यथाकालमसंस्कृता इति
पातित्यस्मरणात्॥ किं च पूर्वोत्तरविद्धयोरुभयोरपि स्वीकारे पूज्यत्वविचारो निरर्थकः स्यात्। तस्मात्परित्याग
एवेति॥ अत्र ब्रूमः॥ सत्येवात्रोपनयनवदपरतिथेः प्रापकानि बहूनि। वचनानि। प्रतिपत्सु द्वितीयास्वपि तावदे
कं वचनं। न त्वेवं यथोक्तविषयाव्यतिरिक्तविषये मुख्यकालत्वं विदध्यात् किंतु यथोक्तविषये गौणकालत्वमिति चे
त्॥ अत्र वक्तव्यं। किमत्र विषयांतरे मुख्यत्वं वाचनिकं किं वा यथोक्तविषयस्य मुख्यकालेऽभिहिते सत्यर्थादित
रविषयत्वं तस्य वचनस्य परिशिष्यत इति। नाद्यः। तस्मिन्वचने विषयांतरस्य शब्दतोऽप्रतीतेः। द्वितीये तु सामान्य
वचनस्याविशेषव्यतिरिक्तसंभावितत्वात्स्वविषयत्वं परिशेषलभ्यं। तथा सति त्वस्य प्रतिपद्विषयत्वमुपवासव्य
तिरिक्तदानव्रतादिविषयत्वं संभावितत्वाद्यथा परिशिष्यते तथोपवासेपि गौणकालविषयत्वं ततोनुपरि

शिष्यते॥ द्वितीयायुतोपवासनिषेधादिति चेत्। तस्य निषेधस्य पूर्वविद्धोपवासप्रशंसायां तात्पर्यात्॥ अपशवो
वा अन्ये गोअश्वेभ्यः पशवो गोअश्वा इत्यत्र गोअश्वप्रशंसार्थं अजादीनां पशुत्वं निषिध्यते न तु सर्वथा तन्निषेधः।
प्रत्यक्षविरोधात् शास्त्रांतरविरोधाच्च। एवमत्राप्युत्तरविद्धायां प्रतिपदि सर्वथा प्रतिपद्युपवासनिषेधो व्याहन्येत।
यथा चोदितानुदितहोमयोरन्योन्यनिंदेतरप्रशंसायै न तु सर्वथा हेयत्वाय। नो चेदुभावपि होमौ परित्यज्येयातां।
यदि तत्र शाखाभेदेन व्यवस्था तर्ह्यत्रापि मुख्यगौणभेदेन व्यवस्थास्तु। न चैतावता तिथेः पूज्यत्वविचारो निरर्थ
को भवति। प्रशस्ततिथिस्वीकाराय तदुपयोगात्। यानि चान्यानि सामान्यवचनान्युदये तूपवासस्य पूर्वोक्तिकास्ति
थयो दैवे कार्यफलप्रदा इत्यादीनि तानि सर्वाणि यथाखंडप्रतिपदमुपोद्बलयंति। तथा गौणप्रतिपदं उक्तोनोपो
द्बलयेयुः। न चैवं सति द्वितीयातृतीयादिष्वतिप्रसंगः। गौणप्रतिपदत्वस्य तत्राभावात्। गौणप्रतिपद्येतावता वि
निर्बंधेन कस्तव लाभ इति चेत्॥ तत्र प्रद्वेषेण वा तव को लाभ इति वक्तव्यं। शिष्टाचार इति चेत्। विपर्यय एव तं प
श्यामः। तथा हि। यदा यथोक्तरीत्या यस्याश्च तिथेर्द्वैविध्यं भवति तदानीं केचन शिष्टाः पूर्वत्रानुतिष्ठंति अन्ये प
रत्र चा। न च तत्राविगीतः शिष्टाचारः प्रमाणं नेतर इति शंकनीयमुभयेषां शिष्टानामविगीतत्वकथनाय संप्र

तिथ्यन्तेति विशेषितत्वात्। एवं तर्हि मुख्यत्वमप्यन्यतमस्य निश्चेतुमशक्यमिति चेन्न। यस्मिन्देशे यस्मिन्काले ये
शिष्टास्तु नीरागद्वेषस्य स्वस्य प्रामाण्यातिशयस्य बुद्ध्या तादृशस्याचारस्य मुख्यत्वात्। तदेवाभिप्रेत्य गुरोः शि
ष्यानुशासने तैत्तिरीयाः समामनंति। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ये तत्र ब्राह्मणाः स
मदर्शिनो युक्ता आयुक्ता अलूक्षा धर्मकामाः स्युः यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः इति। युक्ता अलूक्षा युक्ताः
शास्त्रतत्पराः। आयुक्तास्तदर्थानुष्ठाननिरताः। अलूक्षाः क्रोधादिवर्जिताः। धर्मकामा जीवन्मुक्तावत्कर्मण्यौदा
सीन्यमकुर्वाणाः। उक्तरीत्या कस्यचिच्छिष्टाचारविशेषस्य मुख्यत्वे सत्यपरो गौणो भविष्यति। नतु सर्वथैवानाचा
रः। एवं सत्येकामेव तैत्तिरीयशाखामधीत्य बौधायनापस्तंबमतभेदेन परस्परविलक्षणमनुष्ठानमारताम्
भयविधानां पुरुषाणां स्वस्वपूर्वपुरुषपारंपर्यक्रमायात एवाचारो मुख्यः। कदाचित्तदसंभवेन मतांतरेणा
प्यनुष्ठानमेव श्रेयो नतु सर्वथा तल्लोपो युक्तः। किं बहुना मुख्यायाः पूर्वविद्धायाः प्रतिपदो संभवेऽपि परित्या
गाद्वरमुत्तरविद्धायाः परिग्रहणमित्यवगंतव्यं। तदेवं वैष्णवप्रतिपदुपवासवत्पक्षद्वयोः पूर्वविद्धा मुख्ये ५३
ति स्थितं॥ ॥अथैकभक्तं निर्णीयते॥ ब्रह्मपुराणे। वैश्वानरव्रते पठ्यते। प्रतिपद्येकभक्ताशी समाप्ते च क

पिलाप्रद इति॥ तत्रैतावदेकभक्तं त्रिविधं। स्वतंत्रमन्यांगमुपवासप्रतिनिधिरूपं चेति। तेष्विदानीमुदाहृतं स्व
तंत्रं। तत्रेदं चिंत्यते। किमुपवासवत्तिथिरस्मिन् ग्रहीतव्या उत प्रकारांतरेणेति। उपवासवदिति तावत्प्राप्तं दैवपि
त्र्यं तथा कार्यमिति वचनेनोपवासैकभक्तादिलक्षणे दैवस्य विवक्षितत्वात्। न च कर्मकालव्याप्त्या तन्निर्णय इति शं
कनीयं। तत्कालस्याद्याप्यनिर्णीतत्वात्। कथंचित्तन्निर्णयेऽपि कर्मकालव्यापिवचनस्यापि त्र्यविषयत्वेनाप्युपपत्तेः।
तस्मादुपवासवन्निर्णय इति प्राप्ते ब्रूमः। कर्मकालव्याप्तिरेवात्र निर्णयहेतुः। कर्मकालस्तत्स्वरूपं चैकभक्तस्य स्कं
दपुराणे दर्शितं। दिनार्धसमयेऽतीते भुज्यते नियमेन यत्। एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवैव हि॥ इति। देव
लोऽपि। दिनार्धसमयेऽतीते भुज्यते नियमेन यत्। एकभक्तमिति प्रोक्तं न्यूनं ग्रासत्रयेण वै इति। अत्र चादि
नार्धस्योपरि सार्धमुहूर्तपरिमितः कालः। पंचधाविभागे मध्याह्नस्य परभागे एकभक्तस्य मुख्यः कालः।
दिनार्धेऽतीते सति मुख्यकालव्यापिनी तिथिर्ग्रहीतव्या। अत एव पद्मपुराणे। मध्याह्नव्यापिनी ग्राह्या एकभक्ते
सदा तिथिरिति। बौधायनोऽपि। उदये तूपवासस्य नक्तस्यास्तमये तिथिः। मध्याह्नव्यापिनी ग्राह्या एकभक्ते व्र
ते तिथिरिति॥ न चात्रैवोपवासो युक्तः। तत्र पूर्वविद्धायामेव विशेषशास्त्रपर्यवसानात्। द्विविधं हि विशे

षशास्त्रं। तिथिप्रयुक्तमेकं॥ कर्मप्रयुक्तमपरं। तत्र यौ बीह्निकास्तत्तिथयो दैव इत्यनेन कर्मविषयेण सामा
न्यशास्त्रेणोत्तरेणैकविद्धायां प्राप्तायामुपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इत्यनेन कर्मविषयेण विशे
षशास्त्रेण पूर्वविद्धा विहिता॥ तिथिविषये अपि सामान्यविशेषशास्त्रे उदाह्रियेते। पूर्वाह्णिकास्तु तिथय इति
तिथिमात्रमुपजीव्य प्रवृत्तत्वात् सामान्यशास्त्रं। प्रतिपत्संमुखी कार्येत्येतद्विशेषशास्त्रं। तथा सति द्विविधे
नापि विशेषशास्त्रेण पूर्वविद्धायामेवोपवासः सुस्थितः अत्र मध्याह्नव्यापिनीत्येतत् कर्मविषये विशेषशास्त्रम
स्तु तदनुसारेण निर्णयो युज्यते। ननु प्रतिपत्संमुखी कार्येत्य ×नु× नेन तिथिविषयेण विशेषशास्त्रेणोक्तो न
निर्णय इति चेत् उपवासविषयत्वेनापि तस्योपपन्नेरिति ब्रूमः ननु मध्याह्नव्याप्तिवचनमपि तिथ्यंतरे कर्म
कर्मविषयत्वेनोपपादयितुं शक्यं अतः कर्मविशेषशास्त्रतिथिविशेषशास्त्रयोः समानबलत्वमिति चेन्नो अस्तु
नाम किं नश्छिन्नं मध्याह्नव्यापित्वसंमुखत्वयोः पूर्वविद्धायां संपादयितुं शक्यत्वेन विरोधाभावात्। यदा तू
त्तरविद्धायामेव मध्याह्नव्यापित्वं तदा विरोध इति चेत्। बाढं। तथापि तिथिविषयविशेषशास्त्रात् कर्मविष ४४
यविशेषशास्त्रं प्रबलं तिथेर्गुणत्वात् कर्मणश्च प्रधानत्वात् तस्मादेवं विधे विषये कर्मकालव्याप्त्यैव निर्ण

तव्यः। अत्र निर्णेतव्यो विषयः षोढाभिधीयते। पूर्वेद्युरेव मध्याह्नव्यापित्वं परेद्युरेव तद्व्यापित्वं उभयत्र तद्व्यापि
त्वं। उभयत्र तदव्यापित्वं उभयत्र साम्येन तदेकदेशव्यापित्वं उभयत्र वैषम्येण तदेकदेशव्यापित्वं चेति। तत्र प्रथ
मद्वितीययोर्मध्याह्नव्यापित्वस्य निर्णायकत्वं। तृतीये पूर्वविद्धा ग्राह्या मुख्यकालव्याप्तेः समत्वेपि गौणकाल
व्याप्तेरधिकत्वात्। अनेनैव न्यायेनोभयत्र मुख्यकालव्याप्त्यभावेपि गौणकालव्याप्तिलाभात् पूर्वविद्धैव पंचमे
प्ययमेव न्यायो योज्यः षष्ठे तु यदा पूर्वेद्युर्मध्याह्नैकदेशमधिकं व्याप्नोति तदानीं तस्याधिक्याद्गौणकालव्याप्ते
श्च पूर्वेद्युर्ग्राह्यः यदा तु परेद्युर्मध्याह्नैकदेशमधिकं व्याप्नोति तदा गौणकालव्याप्त्यभावेपि मुख्यकालव्याप्त्याधि
क्यानुसारेण परेद्युर्ग्राह्या। नन्वस्त्वेवमस्वतंत्रे कर्मणि निर्णयः अंगेषु कथं। तत्र कानुपपत्तिरिति चेत् उच्य
ते। पूजाव्रतेषु सर्वत्र मध्याह्नव्यापिनी तिथिरिति मध्याह्ने पूजये नृपेत्यादिशास्त्रेणांगिनः पूजादेर्मध्याह्ने वि
हितत्वेनांगस्य कर्मणस्त्वपरात्वात् तदा मुख्यकालासंभवः। माभूत् तादृशविषये मुख्यः कालः प्रधानानुसारे
ण गुणस्य नेतव्यत्वात्। यदा स्वतंत्रे कर्मण्यपि केनचिन्निमित्तेन मुख्यकालासंभवे गौणकालोभ्यनुज्ञायते
तदा किमु वक्तव्यमांगे। यत्तूपवासप्रतिनिधिरूपमेकभक्तं तदुपवासं तिथौ कार्यं तस्य गौणोपवासत्वात्॥

अतएव सुमंतुः। तिथौ यत्रोपवासः स्यादेकभक्तेऽपि सा तथेति॥ न च तादृशमेव नास्तीति शंकनीयं। उपवासव्रतं प्रक्रम्य
रोगादिना तदशक्तो गुर्वनुज्ञया तस्यैकभक्तस्य संभावितत्वात्। अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः। हविर्ब्राह्मणका
म्या च गुरोर्वचनमौषधमिति शास्त्रात्॥ ॥इत्येकभक्तनिर्णयः॥ ॥अथ नक्तं निरूप्यते। तत्र वाराहपुराणे धान्यव्रते
पठ्यते। मार्गशीर्षे सिते पक्षे प्रतिपद्या तिथिर्भवेत्। तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं च पूजयेदिति। अत्र नक्तशब्दो भोजनप
रः कालपरत्वे प्रकुर्वीतेत्यस्यानन्वयात्। न हि कालः केनचित्कर्तुं शक्यते। तस्य भोजनस्य रात्रौ विहितकालविधिः। अतो दि
वाभोजनरहितत्वे सति रात्रिभोजनं व्रतस्य स्वरूपं। अन्यथा स्वतः प्राप्तस्य रात्रिभोजनस्य विधानवैयर्थ्यात्। तस्य च
नक्तभोजनस्य विष्णुपूजनमंगं। तत्संनिधौ पठितत्वात्। तथा होमोपि तदंगं। होमं च तत्र कुर्वीतेत्यभिधानात्। एवं च सति
प्रधानाविरोधेन पूजाहोमयोरंगयोर्दिवानुष्ठानमर्थसिद्धं भवति प्रधानस्य च नक्तस्य द्व कालद्वयं भविष्यत्पुराणे दर्शि
तं। मुहूर्तोनं दिनं नक्तं प्रवदंति मनीषिणः। नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप इति। अस्य च कालद्वयस्याधिकारिभे
देन व्यवस्थामाह देवलः। नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतं। यतेर्दिनाष्टमे भागे तस्य रात्रौ निषिध्यत इति॥ २४॥
स्मृत्यंतरेपि। नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः। यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरं। सदिवाकरं तु तत्रा

क्तं मतिमेघटिकाद्वये। निशानक्तं तु विज्ञेयं यामार्धे प्रथमे सदेति। रात्रिनक्तभोजने व्यासः। त्रिमुहूर्तं प्रदो
षः स्याद्भानावस्तं गते सति। नक्तं तु तत्र कर्तव्यं इति शास्त्रविनिश्चय इति। तदेवं नक्तकालो व्यवस्थितो। तत्र
नक्तं प्रदोषव्यापिन्यां तिथौ कार्यं तदाह वत्सः। प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा। एकादशीं विना सर्वाः
[illegible] तथा स्मृतेति। एकादश्यां तु यन्नक्तं तत्रोदयतिथिव्यापिनी ग्राह्या। तदुक्तं स्कंदपुराणे। प्रदोषव्यापिनी
ग्राह्या सदा नक्तव्रते तिथिः। उदयस्था सदा पूज्या हरिनक्तव्रते तिथिरिति। अत्राप्येकनक्तन्यायेन षोढा वि
षयभेदा उन्नेतव्याः। मध्याह्नप्रदोषयोरेवंभिन्नत्वात् पूर्वेद्युरेव प्रदोषव्याप्तौ सत्यां तिथिर्ग्राह्या परेद्युरेव
प्रदोषव्याप्तौ परतिथिरुभयत्र प्रदोषव्याप्तौ परतिथिरेव तदाह जाबालिः। सदैव तिथ्योरुभयोः प्रदोषव्या
पिनी तिथिः। तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा यत इति। उभयत्र दिवारात्रावपि सा तिथिर्विद्यते यत इत्य
र्थः। उभयत्र प्रदोषव्याप्त्यभावेपि परैव तदाह जाबालिः। अस्तकाले परत्र स्यादस्मादर्वाक्क्रियते हि सा ति
प्रदोषे तदभावेप्यस्तमयादर्वाग्यतः। सा विद्यते ततः ग्राह्येत्यर्थः। अस्य च दिवारात्रिव्रतत्वेन प्रदोषव्या
प्तिवत्सायंकालव्याप्तिरपि निर्णयहेतुर्भवतीत्यनेनाभिप्रायेण वागस्तमयादित्युक्तं। दिवारात्रिव्रत

त्वं च कूर्मपुराणेऽभिहितं। प्रदोषव्यापिनी यत्र त्रिमुहूर्त्ता यदा दिवा। तदा नक्तव्रतं कुर्यात्स्वाध्यायस्य निषेधवीदिति
।यद्यप्यत्र प्रदोषकालः सायंकालो द्वावपि प्रयोजकौ प्रतिभासेते तथापि प्रदोषव्याप्तिर्मुख्यः कालः सायंकालव्य
व्याप्तिरनुकल्प इति जाबालिवचनादवगम्यते। तत्र ह्येतथा लक्ष्तिप्रदोषव्याप्त्यभावमनूद्य तादृश्यास्तिथेर्ग्राह्य
त्वेऽवगम्यत इति हि त्वन्यासानर्हदृशोऽपि विषये गृहस्थोऽपि यतिवद्दिवा नक्तमाचरेत्। तदुक्तं स्कंदपुराणे। प्रदो
षव्यापिनी न स्याद्दिवा नक्तं विधीयते। आत्मनो द्विगुणां छायामतिक्रामति भास्करे। तन्नक्तं नक्तमित्याहुर्न नक्तं
निशिभोजनं। एवं ज्ञात्वा ततो विद्वान्सायाह्ने तु मुद्रिकियां। कुर्यान्नक्तव्रती नक्तफलं भवति निश्चितमिति। यत्तु
सप्तमीभानुवारादौ सौरनक्तं विहितं तत्र पूर्वोक्ते न विपर्यासे न सायंकालव्याप्तिर्मुख्यः कल्पः प्रदोषव्याप्तिरनु
कल्पः एतदेवाभिप्रेत्य सुमंतुः त्रिमुहूर्तस्पृगेवाह्नि निशि चैतावती तिथिः। तस्यां सौरं भवेन्नक्तमहन्येव तु भोजन
मिति। अत्र सायंव्याप्तेर्मुख्यकालत्वात्प्रथमतो निर्देशः प्रदोषव्याप्तेरनुकल्पत्वात्पश्चान्निर्देशः। इतरनक्तेषु तु प्र
दोषव्याप्तेर्मुख्यत्वादुदाहृतकूर्मपुराणवचने सैव प्रथमं निर्दिष्टा सायंकालव्याप्तिः पश्चान्निर्दिष्टेति विवे कः।। ५८
तेष्वितरनक्तेषु प्रदोषव्यापितिथिग्रहणेऽपि भानुवारसंक्रांत्यादिना गृहस्थस्यापि यदा रात्रिभोजननिषेधस्तदा दि

वैव नक्तं कुर्यात्तथा भविष्यपुराणे। ये चादित्यदिने अस्तनक्तं कुर्वंति मानवाः। दिनांते तेऽपि भुंजीरन्निषेधाद्रात्रिभोजने
मिति। अस्मिंश्च दिवाभोजने उत्तमोंऽतिममुहूर्त्तो मध्यमस्तु पात्यः ततः प्राचीनोऽधन्यः। एवं च सत्यंतिमभागात्रिमुहूर्त्तेहूव च
नान्यक्षपाद्यते। रात्रिभोजनेऽपि घटिकात्रयमुत्तमः घटिकाषट्कं मध्यमः कालः एतदेवाभिप्रेत्य वचनं स्मर्यते प्रदोषोऽस्त
मयादूर्ध्वं घटिकाद्वयमिष्यते। त्रिमुहूर्त्तः प्रदोषः स्याद्रवावस्तंगते सतीति। निशीथपर्यंतोऽधन्यः कालः। नक्तप्रकुर्व
तराश्चावितिसामान्येनाभिधानात्।। अ सौरनक्तेषु साम्येन वैषम्येण वा दिनद्वये प्रदोषैकदेशव्याप्तौ परेद्युरेव नक्तं कार्यं सायं
कालस्य गौणस्य तत्तिथिव्याप्तत्वात्। अनेनैव न्यायेन सौरनक्तेषु सायंकालैकदेशव्याप्तौ पूर्वतिथिर्ग्राह्या प्रदोषकालस्य गौण
स्य तत्तिथिव्याप्तत्वात्।। अथोपेकनक्तवदन्यांगनक्तोपवासस्थानीयनक्तयोर्निर्णयोऽप्येष्टव्यः। ययोः कुलक्षणलक्षितयो
रेकभक्तनक्तयोरेकस्मिन्दिने यदा प्रसक्तिस्तदा कथं कर्त्तव्यं। न चैतादृशी प्रसक्तिरेव नास्तीति शंकनीयं। भविष्यत्पुराणे के
रस्य सप्तमी कदाचित्प्रसक्तेः। तथा हि तत्र तृतीयादिषु सप्तम्यंतेषु पंचसु दिनेषु क्रमेण नक्तैकभक्तायाचितोपवासपारणा
नि विहितानि। अत्र यदा तृतीया यामत्रयपरिमिता ततऊर्ध्वं चतुर्थ्यन्तदा मध्याह्नव्यापित्वात्तृतीयैकभक्तं तत्र प्राप्तं। प्रदोषव्या
प्तिचतुर्थ्यनक्तमपि तत्रैव। तथा सति परस्परविरोधो दुःपरिहरः अत्रोच्यते। एकभक्तेऽप्राथम्यात्प्रबलत्वेन तस्मिन्मुख्य
कालएवानुष्ठेयः। तद्विरोधिनि नक्तेऽनुकल्पः। स चाह्निविधः दिनांतरानुष्ठानात्केत्नुकांतरानुष्ठानाच्च। यदा चतुर्थ्यपरेद्युः

थ्या सायं कालं व्याप्नोति तदा तस्य गौणकालव्यापित्वादेक एव कर्त्ता दिनभेदेन दिनद्वयमनुतिष्ठेत्। यदा त्वचतुर्थ्यां समा क्षीणा वा तदा
गौणकालस्याप्यसंभवेन पूर्वेद्युरेव भार्यापुत्रादिना कर्त्रन्तरेण तन्नक्तं कारणीयं॥ ॥इति नक्तनिर्णयः॥ ॥अथाया
चितं निरूप्यते॥ पूर्वोदाहृते सप्तमीव्रते पंचम्यामयाचितं विहितं तस्यैकभक्तवत्प्रतिपदोक्तकालविधिर्नास्ति तस्य याचि
तभोजननिषेधरूपत्वात्। स च निषेध उपवासवदहोरात्रं विषयीकरोति अत एव संकल्पोपि अस्मिन्नहोरात्रे याचितमन्नं
न भोक्ष्य इत्येवं कर्त्तव्यः। अथयाचितादन्ययाचितमित्यप्रयत्नलभ्यस्य परदत्तस्य भोजनं विवक्ष्येत तदापि पराधीनत्वादेव नैत
स्य कालविशेषो विधातुं शक्यते। यद्यपि स्वगृहे पूर्वसंचितमप्ययाचितमिदानीं भवति तथा पूर्वप्रयत्नसंपादितत्वाद्याचितमेव
अथवा निषेधस्य प्रसक्तिपूर्वकत्वाद्याच्ञाप्रसक्तेश्च परद्रव्यविषयत्वादयाचितशब्दोपि परद्रव्यमेव विषयीकरोति अत्रायाचित
शब्दस्य यथोक्तरीत्या द्वावर्थौ संपन्नौ प्रतिषेधः पर्युदासश्चेति प्रतिषेधपक्षं प्राजापत्यकृच्छ्रव्याख्याने गौतमो व्यवजहार। अ
थापरं त्र्यहं न कंचन याचेतेति। पर्युदासपक्षं बृहस्पतिर्व्यवजहार। त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं। त्र्यहं परं तु नाश्नी
यात्प्राजापत्यं चरन्द्विज इति। स्मृत्यंतरेपि। अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयादिति। मितभोजित्वं दशग्रासभोजित्वे
तदुक्तं चतुर्विंशतिमते। प्रातस्तु द्वादशग्रासान्नक्तं पंचदशैव तु। अयाचिते च चैवाष्टौ प्राजापत्ये विधिः स्मृत इति। तच्च ५
भोज्यद्रव्यं परकीयमप्रयत्नोपनीतं चेत्तदुत्तमं स्मार्त्तलिंगादवगम्यते तथा च प्रतिग्रहप्रकरणे याज्ञवल्क्यः। अयाचिताहृ

तं ग्राह्यमपि दुष्कृतकर्मण इति॥ तथा यतिधर्मेषूशना भिक्षाशनमनुद्योगात्प्राक्केनापि निमंत्रितं। अयाचितं तु संदिष्टं
भोक्तव्यं मनुरब्रवीत्॥ यदि प्रतिषेधो यदि वा पर्युदासस्तूभयथाप्येकभक्तादिवन्न कालो विशेषणीयः। अप्रतिषेधे त्वनुष्ठे
याभावात्पर्युदासे पराधीनत्वादसति तु कालविशेषविधौ न कर्मकालव्याप्तिवचनमत्र प्रवर्तते तथा सति किं पूर्वाह्णि
कास्तु तिथय इति वचनेन परा ग्राह्या किं वा युग्माग्निवाक्येन पूर्वेति वीक्षायां युग्मवाक्यस्य तिथिविशेषविषयत्वात् अतो
सरणं नास्त्या। अनेनैव न्यायेन प्रतिपद्ययाचिते पूर्वैव ग्राह्या॥ अयाचितस्य नियमरूपत्वाद्द्वितीयादिकयुग्मानां प्र
स्यता नियमादिष्विष्टफलत्वात्॥ ॥इत्ययाचितनिर्णयः॥ प्रतिपद्युपवासनक्तायाचितानि निरूपितानि॥ तत्र शुक्लप्रति
पत्सर्वोपोष्या तत्र प्रतिपदुत्तरविद्धा एकभक्तनक्तयोः सर्वासु तिथिषु मध्याह्नप्रदोषव्याप्त्या निर्णयः। अयाचितस्य
प्रातिस्विककालविशेषविध्यभावादुपवासवच्छुक्लकृष्णप्रतिपदोः पूर्वेण निरविद्धग्रहीतव्येत्येतावद्व्यवस्थितापि
तं॥ ॥अथ प्रतिपद्दानव्रतानि निरूप्यंते॥ भविष्योत्तरपुराणे दानं प्रदर्श्यते। प्रतिपत्सु द्विजान्संपूज्य पूजयित्वा
प्रजापतिं॥ सौवर्णं कमलं विरचिदं च कारयित्वाष्टपत्रकं। संस्थाप्य रौप्यपात्रे सुगंधघृतपूरिते। पुष्पैर्धूपैः प्रपूजयित्वा
विप्राय प्रतिपादयेदिति। ब्रह्मपुराणे मंडलव्रतं पठ्यते। मासि भाद्रपदे शुक्ले पक्षे च प्रतिपत्तिथौ। नैवेद्यं च पचेन्मौनी
षोडशत्रिगुणानि च। फलानि पिष्टपक्वानि दद्याद्विप्राय षोडश। देवाय षोडशैतानि दातव्यानि प्रयत्नतः। मुख्यं

नैवोद्देशात्तथाव्रतस्यनियमाश्रयाः एवमन्यान्यपिदानव्रतान्युदाहरणीयानि।तानिसर्वाण्यत्ररविविद्धायांप्रतिपदिकर्तव्या
नितेषांदैवत्वात्तदाहहेमाद्रावुद्धवःयोबाह्लिकास्तुतिथयोदैवेकार्येफलप्रदाइतियद्यप्येतत्तिथिसामान्यमुपजीव्यप्रवृत्तं
तथापिप्रतिपदिबाधकाभावात्तत्रप्रवर्त्ततेनचात्रयुग्मवाक्यबाधकंतस्यतिथिविशेषमुपजीव्यप्रवृत्तत्वात्।अपिकर्मकालव्या
प्तिवाक्याद्दुर्बलत्वात्तिथिरंगंकर्मांगितततःप्रबलमितिपूर्वमुक्तं।कर्मकालव्याप्तिंवृद्धयाज्ञवल्क्यआह।कर्मणोयस्ययःका
लःस्तत्कालव्यापिनीतिथिः।तयाकर्माणिकुर्वीतह्रासवृद्धीनकारणमिति।गार्ग्योपि।योयस्यविहितःकालस्तत्कालव्या
पिनीतिथिः।तयाकर्माणिकुर्वीतह्रासवृद्धीनकारणमिति।कर्मकालश्चदानव्रतयोर्दैवत्वेनपूर्वाह्णोवगंतव्यः।पूर्वा
ह्णोवैदेवानामितिशास्त्रादेकभक्तयोर्दैवत्वेपिप्रतिपदोक्तकालविशेषशास्त्रेणसामान्यरूपपूर्वाह्णशास्त्रंबाध्यते॥
नन्वेवंप्रसक्ततयोर्दानव्रतयोःकिंचिद्बाधकमस्ति।अह्नःपूर्वोभागःपूर्वाह्णःसचपंचधाविभागपक्षेमुहूर्तत्रयात्मकः
प्रातःकालचतुर्धाविभागकालपक्षेसार्धघटिकाधिकमुहूर्तत्रयात्मकः।त्रेधाविभागपक्षेपंचमुहूर्तात्मकः।द्वेधा
विभागपक्षेसार्धसप्तमुहूर्तात्मकः।पंचदशधाविभागपक्षेप्यर्थात्तथैवसंपद्यते।यद्यपिबहुशास्त्रानुरोधेनपंचधा ५८
विभागएवात्रग्राह्यइतिपूर्वमुक्तंतथापिबहुकर्तव्योपेतयोर्दानव्रतयोर्मुहूर्तत्रयमात्रेणानुष्ठानमशक्यत्वा

दितरेपिपक्षाअनुकल्पत्वेनग्रहीतव्याः।यत्रसार्धसप्तमुहूर्तैरपिकर्मनसमाप्यते।तत्रकृत्स्नोदिवसोनुज्ञायते।अत्र
तएवदेवलः।यांतिथिंसमनुप्राप्यउदयंयातिभास्करः।सातिथिःसकलाज्ञेयास्नानदानजपादिषु।इति।व्यासोपि॥उ
दयन्नेवसवितायांतिथिंप्रतिपद्यते।सातिथिःसकलाज्ञेयाह्यध्ययनकर्मस्विति।भविष्योत्तरपुराणेपि।व्रतोपवा
सनियमेघटिकैकायदाभवेत्।सातिथिःसकलाज्ञेयापित्र्यर्थेचापराह्णिकीति।मत्स्यपुराणेपिव्रतोपवासनियमे।घटि
कैकायदाभवेत्।उदयेसातिथिस्तत्रविपरीतातुपैतृकइति।स्कंदपुराणेपिव्रतोपवासस्नानादौघटिकैकायदाभवे
त्।उदयेसातिथिर्ग्राह्याविपरीतातुपैतृकइति।विष्णुधर्मोत्तरेपि।व्रतोपवासस्नानादौघटिकैकायदाभवेत्।उ
दयेसातिथिर्ग्राह्याश्राद्धादावस्तगामिनीति।बौधायनोपि।आदित्योदयवेलायांयाल्पापिचतिथिर्भवेत्।पूर्णाइत्ये
वमंतव्याप्रभूतानोदयंविनेति।नन्वस्त्वेवंकृत्स्नदिवसाभ्यनुज्ञातथाप्यत्ररविविद्धायांतिथौग्रहणेकियत्परिमाण
मुदयेपेक्षणीयमितिविवेचनीयं।तत्रबौधायनेनाल्पापीत्यभिधानान्निमेषमात्रंप्रतिभाति।तथाव्यासवाक्येपि
प्रतिभाति।उदयन्नेवेत्यभिधानात्।भविष्योत्तरपुराणादिवचनेषुघटिकामात्रंप्रतीयते।वचनांतरेतुविष्णुधर्मो
त्तरबौधायनप्रोक्तेघटिकाचतुष्टयेप्रतिभाति।सत्ततथाचपठ्यते।उदितेदैवतंभानोपित्र्यंचास्तमितेरवौ।द्विमु

हूर्त्तत्रिरह्नस्य सा तिथिर्हव्यकव्ययोरिति। अस्यार्थः। भानावुदिते सत्यनन्तरकाले अह्नो मुहूर्त्तद्वयं दैवतं। तस्मिंश्चा
स्तमिते ततः पूर्वकालीनमह्नो मुहूर्त्तत्रयं पित्र्यं पितृदेवतमतस्तत्कालव्यापिनी या तिथिर्भवति सैव क्रमेण हव्यक
व्ययोर्ग्राह्या भवति। अत्रोच्यते। पौर्वाह्णिका इति वचनेन दैवे कर्मणि पौर्वाह्णिकव्याप्त्यभिधानात्पूर्वाह्णस्य पंचधाविभक्तस्य
मुख्यत्वादुदिते भानौ त्रिमुहूर्त्ता तिथिर्ग्रहीतव्या। यत्तु दक्षेणोक्तं। त्रिमुहूर्त्तानि कर्त्तव्या या तिथिः क्षयगामिनी। द्विमुहू
र्त्तापि कर्त्तव्या या तिथिर्वृद्धिगामिनीति तत्र त्रिमुहूर्त्तव्याप्तेर्बाधकं प्रत्युतोपोद्बलकमेव। तथा हि। प्रतिषेधः सर्वत्र प्रस
क्तिपूर्वकः प्रसक्तिश्चात्र यथोक्तरीत्या पौर्वाह्णिकवाक्यात्त्रिमुहूर्त्तविधाभिधायिपैठीनसिवाक्याच्च भवति। तच्च सप्र
सक्तं त्रिमुहूर्त्तत्वं समतिथौ बाधकाभावात्तथैव व्यवतिष्ठते तिथिक्षयेप्यधिकव्याप्तिविधित्सया प्रतिषिध्यते। तस्मात्त्र
चतुर्थमुहूर्त्तस्पर्शिनी तिथिर्ग्राह्या तिथिसाम्यवत्तिथिवृद्धावपि मुहूर्त्तत्रयमेव मुख्यं मुहूर्त्तद्वयमनुकल्पः। एतदेव
स्तवयितुं द्विमुहूर्त्तापीत्यपिशब्देन सूच्यते। नन्वत्र क्षयवृद्ध्युपजीवनेन निर्णयः क्रियते स चानुपपन्नः व्यासवाक्ये ह्रास
वृद्धिचोदनायाः पित्र्यविषयत्वाभिधानात् एकोद्दिष्टादिवृध्यादौ ह्रासवृध्यादिचोदनेति पूर्वमुदाहृतं। दानव्रते चैदे
वे। अतः कथमनयोर्वृद्धिक्षयाभ्यां निर्णयः किंचोदाहृतयाज्ञवल्क्यस्कंदपुराणगार्ग्यवचनेषु ह्रासवृद्धीनका ४९

रणमित्युक्तं तत्कथमत्र ह्रासवृध्योर्निर्णयकारणत्वं। अत्रोच्यते। संति ह्यन्यानि ह्रासवृद्धिवाक्यानि। तत्रोशना। खर्वो
दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणं। खर्वदर्पौ परौ कार्यौ हिंसा स्यात्पूर्वत्र पूज्यते। भविष्योत्तरे। खर्वो दर्पस्तथा हिंसा त्रि
विधं तिथिलक्षणं। खर्वदर्पौ परौ पूज्यौ हिंसा स्यात्पूर्वकालिकी। खर्वः सर्वैः साम्यमत्यक्षयो वा। दर्पो वृद्धिः। हिंसाधिक
क्षयः। एतैः खर्वादिवाक्यैः सह व्यास्मिन्विषये युग्मादिवाक्यस्य विरोधः प्राप्नोति तन्न दैवपित्र्यभेदेन व्यवस्थापकं व्या
सवाक्यं। ननु प्रकृतयोः क्षयवृध्योः पित्र्यविषयत्वप्रतिपादकं याज्ञवल्क्यादिवाक्येष्वपि कर्मकालव्याप्तिशास्त्रस्य
खर्वदर्पादिशास्त्रस्य च विरोधे प्राप्ते सति कर्मकालशास्त्रस्य प्राबल्यमुच्यते न तु प्रकृतयोः क्षयवृध्योर्निर्णय
हेतुत्वं प्रतिषिध्यते। ननु व्यासः खर्वादिवाक्यानि पित्र्यविषयत्वेन संकोचयामास याज्ञवल्क्यादयस्तु पित्र्ये
पि कर्मकालव्याप्त्या खर्वादिवाक्यान्यबाधन्त। अहं तैर्वा निर्विषयत्वमेषां प्रसज्येतेति चेत्। मैवं। यदा पूर्वेद्युरदि
नयोः पित्र्यकर्मविषयव्याप्तिः समा। यदा वा दिनद्वयेपि कर्मकालव्याप्त्यभावस्तत्रोभयत्र खर्वादिवाक्यैर्निर्ण
यकत्वात्। आस्तां प्रासंगिकी खर्वादिवाक्यचिंता प्रकृते सूर्योदये मुहूर्त्तत्रयव्यापिनी प्रतिपद्दानव्रतयोर्ग्र
हीतव्या। एवं सत्युदयमात्रव्याप्तिशास्त्रं घटिकामात्रशास्त्रं च वैश्वानराधिकरणन्यायेनावयुत्यानुवा

दरूपतयात्रिमुहूर्तव्याप्तिं न्यूनां सति॥ अथवा यदा पूर्वेद्युरुदयकालं परित्यज्योपरि सर्वत्र व्याप्नोति परेद्युरुदयकालमा
त्रं व्याप्नोति तदानीमुदयानंतरकालभाविन्या मुख्ययात्रिमुहूर्तया व्याप्तेर्दिनद्वयेप्यभावेन द्वयोरपि दिनयोर्गौण
कालत्वे सति किं ग्राह्यमिति  वीक्षायां पूर्वदिने कर्मकालव्याप्तेर्भूयस्त्वात्तस्यैव ग्रहणं न्याय्यं यतः प्राप्ते केनापि निमित्तेन
तत्र ग्रहे सति परेद्युः कर्मकालव्याप्तिसंपादनाय पूर्णत्वमभिधायोदयविहीनस्य व्याप्तिबाहुल्यस्य हेयत्वोक्तिर्या
ऽन्तेन तदेव प्रशस्यते॥ आदित्योदयवेलायां या स्वल्पापि च तिथिर्भवेत्॥ पूर्णा इत्येवमंतव्या प्रभूता नोदयं विनेति। यदा पू
र्वेद्युः संगवमारभ्य परेद्युरुदयात्प्रागेव तिथिक्षयवशात्त्रिपत्समाप्ता। तदा यद्यपि द्वितीये सोदयमुहूर्तत्रयस्पर्शो ना
स्ति तथापि पूर्वेद्युरेवानुष्ठेयं॥ सा तिथिः सकला ज्ञेया यस्यामस्तमितो रविरिति वचनेन संपाद्यायां सोदयत्रिमुहूर्तया
व्याप्तेर्विद्यमानत्वात्। परेद्युस्तादृश्या अप्यभावात्। यदा पूर्वेद्युरुदयमारभ्य परेद्युरुदयादूर्ध्वं मुहूर्तत्रयं वर्धते तदा
नी यद्यपि द्वयोर्दिनयोः सोदयत्रिमुहूर्तव्याप्तिरस्ति तथापि पूर्वेद्युरेवानुष्ठानमस्तमयव्याप्तेरधिकत्वात्॥ अत
एव पद्मपुराणेभिहितं। व्रते स्नाने तथा नक्ते पितृकार्ये विशेषतः॥ यस्यामस्तंगतो भानुः सा तिथिः पुण्यभाग्भ ३०
वेदिति। न त्वास्तां सोदयत्रिमुहूर्तव्याप्तिरस्तमितव्याप्तिश्च। निर्णयस्तु शुक्लकृष्णपक्षाभ्यां भविष्यतीति तथा

मार्कंडेयः। शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः॥ कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति। विष्णुध
र्मोत्तरे। वर्धमानेंदुपक्षस्य उदये पूज्यते तिथिः। यदा चेंदुः क्षयं याति तदा स्यादापराह्णिकीति। अथवा। पक्षस्य वृद्धिक्ष
याभ्यां निर्णेतव्यो। तथा च वृद्धवसिष्ठः। वर्धमानस्य पक्षस्य उदये पूज्यते तिथिः। यदा पक्षः क्षयं याति तदा स्यादापराह्णिकी
ति। बौधायनोपि। सा तिथिस्तच्च नक्षत्रं यस्यामभ्युदितो रविः। वर्धमानस्य पक्षस्य हानौ त्वस्तमयं प्रतीति। अत्रोच्यते। शु
क्लकृष्णपक्षाभ्यां निर्णयो न संभवति। तथा सति बहुवचनबाधप्रसंगात्। तथाहि यानि वचनानि पूर्वविद्धायां शुक्लप्रति
पद्युपवासविधायकानि पूर्वमुदाहृतानि तानि बाध्येरन्। तदा शुक्लप्रतिपदः परविद्धायां त्वयोष्यत्वे पूर्वनिर्णयं तत्तच्च विप
रिवर्तेत। एवमेकभक्तादावपि यथायोगं विपरिवृत्तिरूह्या। नापि पक्षस्य क्षयवृद्धिभ्यां निर्णयो युज्यते तत्र फलतो दोष
तिथि० स्यापरिहार्यत्वात्। यदा शुक्लपक्षश्चतुर्दश्या षोडशनाड्यादिनाल्पको भवति तदा भवन्मते परविद्धायां शुक्लप्रतिपद्युपवासः प्राप्नोति।
त्कृष्णपक्षस्य तिथिक्षयवशाच्चतुर्दशादिनाल्पकत्वे पूर्वविद्धायां शुक्लप्रतिपद्युपवासः प्राप्नोति। एवं बाधांतरमुन्नेयं। अ
स्ति च शुक्लकृष्णपक्षवाक्यस्य विनाप्यन्यबाधं विषयविशेषः। तथांगिरसा स्मर्यते। संपूर्णा दशमी कार्या परया पूर्व
या यवा॥ युक्ता न दूषिता तस्मादिति सा सर्वतो मुखीति। तत्र शुक्लकृष्णपक्षाभ्यां व्यवस्था कर्तव्या। पक्षवृद्धिक्षयवो

क्रममपि पूर्वेण समानविषयतया व्याख्येयं। वर्धमानस्य चंद्रस्य यः पक्षः तस्येयोज्ञनीयं। तथा सति शुक्लपक्षइत्युक्तं भवति।
यदाय सः क्षयं यातीत्यत्रापि पक्षनिर्वाहकश्चंद्रः क्षयं यातीति व्याख्याने कृष्णपक्ष इति लभ्यते। अतो यथोक्तसोदयत्रिमु
हूर्तव्याप्तिपक्षतो निर्णयः सुस्थितः। अत्राद्येकभक्तवत्वोऽभिधेते उदयकाले पूर्वेद्युरेव त्रिमुहूर्तव्यापिनी नोभयत्र
त्रिमुहूर्तस्पर्शिनी उभयत्रापि साम्येन वैषम्येण वा त्रिमुहूर्तवर्तिन्येकदेशावर्तिनी चेति। अत्र प्रथमपक्षे खंडतिथि
त्वाभावान्नास्ति संदेहः। तृतीयादिषु चतुर्षु पक्षेषु उभयव्याप्तेः कर्मकालवाकुल्यस्य चलाभावात्पूर्वेद्युरेवानुष्ठानं।।
द्वितीयपक्षे तु क्षयगामित्वे त्रिमुहूर्तमप्युत्तरविद्धां परित्यज्य पूर्वेद्युरेवानुष्ठातव्यं वृद्धिगामित्वे साम्ये च परेद्युरिति
निर्णयः।। इत्थं गमस्तावत्प्रतिपत्पर्वनिर्णयेव क्ष्यते।। ।।इति दानव्रतनिर्णयः।। उक्तान्युपवासैकभक्तानक्ता
याचितदानव्रतानि प्रतिपद्विषयाणि तावता दैवविषयो निर्णयः सुस्थितः।। ।।अथ पित्र्यं निर्णीयते।। ।।
तत्र सामान्येनापराह्णः प्रतिपदि पित्र्यं विहितं प्रतिपत्सैव ग्राह्या या भवेदपराह्णिकी।। दैवे कर्मतयाज्ञेयं पित्र्ये वाम ५२
नुरब्रवीदिति हि व्यासवाक्यं पूर्वमुदाहृतं। पित्र्यं च द्विविधं।। एकोद्दिष्टं पार्वणं च तयोः स्वरूपमाह कण्वः।



एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रकीर्तितं।। त्रीनुद्दिश्य तु यत्तद्धि पार्वणं मुनयो विदुरिति। तत्र प्रतिपदि मृतस्य
मासांतवर्तिन्यां तस्यां प्रतिपद्येकोद्दिष्टरूपं मासिकं प्रसक्तं। संवत्सरांतवर्तिन्यां तु तस्यां प्रतिपदि पार्वणरूपमाब्दि
कश्राद्धं प्राप्नोति। अत्र मासिकस्य तद्दिनकर्तव्यतामाह याज्ञवल्क्यः। मृतेहनि कर्तव्यं प्रतिमासं तु वत्सरं। प्रतिसं
वत्सरं चैवमाद्यमेकादशेहनीति। तेषां च मासिकानामेकोद्दिष्टरूपत्वे पैठीनसिराह। यामासिकाब्दिके श्राद्धस्या
तां पूर्वेद्युरेव ते।। मासिकानि स्वकीये तु दिवसे द्वादशेपि वा।। सपिंडीकरणादर्वाक् कुर्याच्छ्राद्धानि षोडश। एकोद्दि
ष्टविधानेन कुर्याच्छ्राद्धानि तानि त्विति। अयमर्थः। ऊनषाण्मासिकं सप्तममासगतमृताहदिनात्पूर्वेद्युरेवानुष्ठेयं।
ऊनाब्दिकं च द्वितीयवत्सरादेर्मृताहदिनात्पूर्वेद्युः कर्तव्यं। मासिकानि तु तत्तन्मासमृताहदिनेनुष्ठेयानि। स एष मु
ख्यः कल्पः। यदा तु द्वादशाहादौ सपिंडीकरणं तदा तस्मात्पूर्वं यस्मिन् कस्मिन्नपि दिने मासिकान्यपकृष्यानुष्ठेया
नि। सोयमनुकल्पः। पक्षद्वयेप्येकोद्दिष्टविधानमेव न तु पार्वणविधानमिति। अत्रेदं चिंत्यते। किमेकोद्दिष्टेऽप
राह्णव्यापिनी तिथिर्ग्राह्या किं वा सायाह्नव्यापिनी उतास्तमयव्यापिनी आहोस्विन्मध्याह्नव्यापिनी। न चात्र पक्षां
तराणि संभाव्यंते। तद्बाधकाभावात्।। ननु युग्माग्निवाक्यं तिथिह्रासवृद्धिवाक्यं शुक्लेतरपक्षवाक्यं पक्ष

क्षयवृद्धिवाक्यं कर्मकालव्याप्तिवाक्यं वा पक्षांतरप्रापकं भविष्यति। मैवं। पक्षक्षयवृद्धिवाक्यस्य खंडत्वपरत्वेन व्या
ख्यातत्वात् उक्तादिवाक्यं तु एवं निर्णयोक्तिध्योः शास्त्रांतराभ्यां साम्ये सति पुरुषेच्छानिवारणाय व्यवस्थापकमित्यु
क्तं। तिथिह्रासवृद्धी तु कर्मकाले न बाध्येते कर्मकालवाक्यं सदैव ह्रासवृद्धी न कारणमित्युक्तत्वात्। युग्मवा
क्यं तु न पित्र्यविषयं। कर्मकालश्चैकोद्दिष्टस्य नाप्यापि निर्णीतः। अतो न पक्षांतरसंभवः। उपन्यस्तेषु तु
पक्षेषु प्रथमं तावत् सामान्यविशेषशास्त्राभ्यामपराह्णव्यापिनीति प्रतिभाति। आपराह्णिकास्तथा हि
याः पित्रर्थं तु सुभावहा इति निगमवाक्यं पूर्वमुदाहृतं। हारीतोपि। अपराह्णः पितृणां तु याऽपराह्णा
नुयायिनी। सा ग्राह्या पितृकार्ये तु न पूर्वा स्वल्पयायिनीति। इह मनुरपि। यस्यामस्तं रविर्या
ति पितरस्तामुपासते। तिथिं तेभ्यो यतो दत्तो ह्यपराह्णः स्वयंभुवेति। तदेतत् सामान्यशास्त्रं
तिथिमात्रमुपजीव्य प्रवृत्तत्वात्। पक्षस्यैव विज्ञेया या भवेदापराह्णिकीति तु विशेषश
शास्त्रं तिथिविशेषमुपजीव्य प्रवृत्तत्वात्। ताभ्यामुभाभ्यां शास्त्राभ्यां प्रथमपक्षस्तिष्ठति। द्वि

तीयपक्षेप्यस्ति शास्त्रद्वयं। बोधायनः। उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ। द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययो
रिति। वचनार्थस्तु पूर्वं व्याख्यातः। तदेतत् सायाह्नव्याप्तिः सामान्यशास्त्रं। विशेषस्तु पैठीनसिना दर्शितः। पंचमी सप्तमी
चैव दशमी च त्रयोदशी। प्रतिपन्नवमी चैव कर्त्तव्या संमुखी तिथिरिति। न चात्र प्रतिपदः सांमुख्यमात्रं प्रतीयते। न तु
सायाह्नव्याप्तिरिति शंकनीयं। संमुखी नाम सायाह्नव्यापिनी दृश्यते यदिति स्कंदपुराणे सांमुख्यस्य व्याख्यातत्वात्।
अस्तमयव्यापित्वपक्षो वृद्धयाज्ञवल्क्येन दर्शितः। दैवकार्ये तिथिर्ज्ञेया यस्यामभ्युदितो रविः। पितृकार्ये तिथिर्ज्ञेया य
स्यामस्तमितो रविरिति। तथा दानव्रतक्रियायामुदाहृतेषु घटिकाव्याप्तिवाक्येष्वस्तमये घटिकाव्याप्तिः पित्र्ये प्रद
र्शिता। तदेतदुपन्यस्तं पक्षत्रयमेकोद्दिष्टपार्वणविषयं पित्र्यकर्मसामान्यमुपजीव्य प्रवृत्तत्वात्। एकोद्दिष्टे तु चतुर्थपक्षो
वाचनिकः। तथा च वृद्धगौतमः। मध्याह्नव्यापिनी या स्यात् सैकोद्दिष्टे तिथिर्भवेत्। अपराह्णव्यापिनी या पार्वणे सा तिथि
र्भवेदिति। शिवराघवसंवादेपि। मध्याह्नव्यापिनी या स्यात् सैकोद्दिष्टे तिथिर्भवेदिति। कर्मकालव्यापिशास्त्रेणा
प्ययमेव चतुर्थः पक्षः प्राप्यते। मध्याह्नस्यैकोद्दिष्टे कर्मकालत्वात्। तथा हारीतशातातपौ। आमश्राद्धं तु पूर्वा
ह्णे एकोद्दिष्टं तु मध्यमे। पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकमिति। स्मृत्यंतरं च। पूर्वाह्णे दैविकं श्राद्धमपरा

ह्णे तु पार्वणं। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति। मध्याह्नश्च सप्तमाष्टमनवममुहूर्तात्मकः। ते च मुहूर्ता
गांधर्वकुतपरौहिणसंज्ञकाः। तत्रैकोद्दिष्टस्योपक्रमे कुतपस्य पूर्वोत्तरभागौ विकल्पितौ। तदाह व्यासः। कु
तुपप्रथमे भागे एकोद्दिष्टमुपक्रमेत्। आवर्तनसमीपे वा तत्रैव नियतात्मवानिति। समाप्तिकालमाह श्लोकगौत
मः। आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः। विधिज्ञो विधिमास्थाय रौहिणं तु न लंघयेदिति। तदेवं कुतपरौ
हिणयोर्मध्याह्नगतमध्यमचरमभागयोः कर्मकालत्वेन व्यवस्थितयोस्तत्संमुहूर्तव्यापिनी तिथिरेकोद्दिष्टे
गृहीतव्येति स्थितं॥ अत्राप्येकभक्तवत्षोढावतारणीया। तत्र पूर्वेद्युरेव परेद्युरेव वा मध्याह्नव्याप्तिरित्यनयोः
पक्षयोः नैकोपि संदेहः। उभयत्र तद्व्याप्तिस्तत्स्पर्शाभावो वेत्यनयोः पक्षयोः पूर्वेद्युरेवानुष्ठापनं तथा सति पूर्वाह्ण
तान्यपराह्णसायाह्नास्तमयव्याप्तिविषयाणि पित्र्यसामान्यवचनान्यनुगृहीतानि भविष्यंति उभयत्र साम्येनैकदे
शव्याप्तौ खर्वादिवाक्यं द्रष्टव्यं तच्च पार्वणप्रस्तावे योदाहरिष्यते वैषम्ये त्वेकदेशव्याप्तौ तु यदा पूर्वेद्युर्महती तदा मह
त्त्वानुग्रहात्सामान्यवचनानुग्रहाच्च पूर्वेद्युरेवानुष्ठानं। यदा परेद्युरेव महती तदा सामान्यशास्त्रमुपेक्ष्यापि म ५२
हत्त्वमेकादरणीयमिति पार्वणश्राद्धनिर्णये वक्ष्यते। अतस्तेनैव न्यायेनात्रापि परेद्युरेवानुष्ठानं द्रष्टव्यं॥ ॥इत्येकोद्दिष्टनिर्णयः॥

स्व॥ अथ पार्वणश्राद्धं निर्णीयते॥ पर्वण्यमावास्यायां यद्विहितं पार्वणं तत्कालं शातातप आह। दर्शश्राद्धं तु यत्प्रो
क्तं पार्वणं तत्प्रकीर्तितं। अपराह्णे पितॄणां तु तत्प्रदानं विशिष्यत इति। यद्यप्येतादृशं पार्वणं प्रतिपद्दिने प्राप्नोति तथा
पि तद्विकृतिरूपतया त्रिपुरुषोद्देशेन कर्तव्यस्याब्दिककाम्यश्राद्धादेः पार्वणत्वं व्यवहर्तुं शक्यमत एव क एव वा कं
पूर्वमुदाहृतं त्रीनुद्दिश्य तु यद्विपार्वणं मुनयो विदुरिति। तथा सति प्रतिपद्दिने मृतस्य वत्सरांते तन्मासतत्पक्षवर्तिन्यां
प्रतिपद्याब्दिकं पार्वणं प्राप्नोत्येव। एतस्यार्थस्य प्रापकं वचनं मलमासप्रस्तावे दर्शितं। मासपक्षतिथिस्पृष्टे यो यस्मि
न्म्रियतेऽहनि। प्रत्यब्दं तु तथा भूतं क्षयाहं तस्य तद्विदुरिति। ब्रह्मपुराणेपि। प्रतिसंवत्सरं कार्यं मातापित्रोर्मृतेऽहनीति॥
पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हीति। काम्यं तु पार्वणमपरपक्षे सर्वासु तिथिषु प्रत्येकं विहितं। तथा च याज्ञ
वल्क्यः। कन्यां कन्यावेदिनश्च पशून्वै सत्सुतानपि। द्यूतं कृषिं च वाणिज्यं द्विशफैकशफांस्तथा॥ ब्रह्मवर्चस्विनः पुत्रा ति
न्स्वर्णरूप्ये सकुप्यके। ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा। प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीं॥ श
स्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयत इति। मार्कंडेयोपि। प्रतिपद्धनलाभाय द्वितीया द्विपदप्रदा। वरार्थिनी तृतीया च
चतुर्थी शत्रुनाशिनी॥ श्रियं प्राप्नोति पंचम्यां षष्ठ्यां पूज्यते नरः॥ गाणपत्यं च सप्तम्यामष्टम्यां बुद्धिमुत्तमां॥

श्रियंनवम्यांप्राप्नोतिदशम्यांपूर्णकामतां॥वेदांस्तथाप्नुयात्सर्वानेकादश्यांक्रियापरः।द्वादश्यांजयलाभंचप्राप्नोतिपितृपू
जकः।प्रजांमेधांपशून्पुष्टिंस्वातंत्र्यंपुष्टिमुत्तमां॥दीर्घमायुर्धनैश्वर्यंकुर्वाणस्तुत्रयोदशीं।अवाप्नोतिनसंदेहःश्राद्धंश्र
द्धापरायणः॥युवानःपितरोयस्यमृताःशस्त्रेणवाहताः।तेनकार्यंचतुर्दश्यांतेषांप्रीतिमभीप्सता॥श्राद्धंकुर्वन्नमावास्यांय
त्नेनपुरुषःशुचिः।सर्वान्कामानवाप्नोतिश्राद्धंस्वर्गंतुपुरुषःसदेति।अतोविहितरूपंपार्वणंसंभाव्यनेप्रतिपदि।तस्यचपा
र्वणस्योचितांतिथिंनिर्णेतुंप्रथमतोविधिनिषेधरूपाभ्यामन्वयव्यतिरेकाभ्यामनुष्ठानकालोनिरूप्यते।तत्रशातातपो
ऽपिविधिरुदाहृतः।अपराह्णेपितृणांत्विति।यथावाक्यांतराण्यपि।मनुः।तथाश्राद्धस्यपूर्वाह्णादपराह्णोविशिष्यतेइति॥
वृद्धमनुहारीतवचनेचैकोद्दिष्टप्रस्तावेउदाहृतेअपराह्णःस्वयंभुवेति।अपराह्णःपितृणामिति।श्रुतिश्च।अपराह्णःपि
तृणामिति।शंखः।पूर्वाह्णेदैविकंतत्त्वमपराह्णेपितृक्रिया॥ग्रहणेनिशिवाकुर्यान्नरात्रौपैतृकंपुनरिति।स्मृत्यंतरेऽपि॥
अपराह्णेउपेयंरक्तमिति॥ननुसायाह्नव्याप्तेःकर्मकालत्वंक्वचित्स्मर्यते।दिनांतेपंचनाड्यस्तुपुण्याःप्रोक्ताःमनीषि
भिः।उदयेचतथापित्र्येदैवेचैवचकर्मणीति।मैवं।यमेनप्रतिषिद्धत्वात्सायाह्नस्त्रिमुहूर्तकःस्याश्राद्धंतत्रनका ५७
रयेत्॥राक्षसीनामसावेलागर्हितासर्वकर्मस्विति॥तर्हिपंचनाडीवचनंनिर्विषयंस्यादितिचेत्।न।केनापिनिमि

त्तेनापराह्णासंभवेगौणकालत्वाभ्यनुज्ञापरत्वात्॥अतएवव्यासः॥स्वकालातिक्रमेकुर्याद्रात्रेःपूर्वंयथाविधीति।या
घ्रमादपीति।विधिज्ञःश्रद्धयोपेतःसम्यक्पात्रनियोजकः।रात्रेरन्यत्रकुर्वाणःश्रेयःप्राप्नोत्यनुत्तममिति।ननुसाया
ह्नेऽपियदाकथंचित्प्रत्यूहःस्यात्तदाश्राद्धस्यकिंलोपएवकिंवारात्रावपिकर्तुंशक्यते।तत्रलोपएवेतितावत्प्राप्तं।कुतः।मु
ख्यकालस्यगौणस्यचकालयोरपिनिषेधात्॥मुख्यकालंचप्रतिषेधतिमनुः।रात्रौश्राद्धंनकुर्वीतराक्षसीकीर्तिताहिसा॥
संध्ययोरुभयोश्चैवसूर्येचैवाचिरोदितइति।नचैवंसतिग्रहणश्राद्धमपितत्रप्रतिषिध्येतेतिशंकनीयंशातातपेन
विशेषितत्वात्।रात्रौश्राद्धंनकुर्वीतराहोरन्यत्रदर्शनात्।सूर्योदयमुहूर्तेचसंध्ययोरुभयोस्तथेति।गौणकालत्व
मपिव्यासवाक्यप्रयद्यापर्युदस्तं।रात्रेःपूर्वंरात्रेरन्यत्रेतिताभ्यामुक्तत्वात्॥तस्मादह्निःश्राद्धासंभवेलोपएवेतिप्राप्तेब्रू
मः॥नतावद्रात्रौसर्वात्मनाश्राद्धस्यनिषेधोवक्तुंशक्यः।आपस्तंबेनरात्रौश्राद्धस्यसमाप्त्यभ्युपगमात्॥नचनक्तं
वश्राद्धंकुर्वीतारब्धेचभोजनसमापनादिति॥ननुसंध्यासमीपेप्रारब्धस्यरात्रौसमाप्तिप्रसंगः।तोद्दश्राद्धस्यप्रा
रंभःस्कंदेनदर्शितःनिषिद्धः।उपसंध्यंनकुर्वीतपितृपूजांकथंचन॥सकालआसुरःप्रोक्तःश्राद्धंतत्रविव
र्जयेदिति॥मैवं॥संध्यासामीप्यस्यमुख्यकालत्वनिषेधात्॥गौणकालत्वेतुपूर्वमुक्तंतस्यप्रारब्धस्यरात्रा

वपि समाप्तिः श्राद्धे भाव्यते। न त्वेवमपि रात्रौ समाप्तिरेवाभ्यनुज्ञायते न त्वारंभ इति चेन्न। मैवं। आरंभस्यापि तया समा
प्यापलक्षणीयत्वात्। आह्निकश्राद्धपरित्यागे प्रत्यवायबाहुल्यस्मरणात्। तथा च भविष्यपुराणे मासखंडयोः
प्यते। मृते हनि पितुर्यस्तु न कुर्यात् श्राद्धमादरात्। मातुश्चैव वराहे वत्सरांते मृतेहनि। नाहं तस्य महादेवि
पूजां गृह्णामि नो हरिरिति। अन्यत्रापि मेउको यस्तु वै श्राद्धं न करोति खगाधिप। मातापितृभ्यां सततं वर्षे वि
र्वे मृतेहनि। स याति नरकं घोरं तामिस्रं नाम नामत इति। अन्यत्रापि। पंडितो ज्ञानिनो वापि मूर्खो वा यो पितुः
व वा। मृताहं समतिक्रम्य चांडालः कोटिजन्मस्विति। मारीचः। पंडितो ज्ञानिनो मूर्खो स्त्रियो वाथ ब्रह्मचारिणः।
मृताहं समतिक्रम्य चंडालेष्वभिजायत इति। रात्रेरन्यत्र कुर्वाणः श्रेयः प्राप्नोत्यनुत्तममिति स्मरणाद्यदा कु
तन्मुख्यत्वेन वा सायाह्नव्यापित्वेन वा प्रातःसंभवाच्चापि प्रयुज्येयातां। न्याये दोषः। शिवराघवसंवादे प्रातःका
लस्य निषिद्धत्वात् प्रातःकाले तु न श्राद्धं प्रकुर्वीत हि कुत्रचिदिति। नैमित्तिकेषु श्राद्धेषु न कालनियमः स्मृत इ
ति। यद्यपि सो वा न साक्षान्निषिद्धस्तथापि कुतपमुहूर्ते मुख्योपक्रमस्य गांधर्वमुहूर्ते गौणोपक्रमस्या ५५
भिधाने सत्यर्थान्निषेधः परिशिष्यते। उपक्रमद्वयं चोक्तं शिवराघवसंवाद एव दर्शितं। अपराह्णव्यतिरिक्त

स्य प्रक्रमे कुतपः स्मृतः। कुतपाद्यथवाप्यर्वाग् आसने कुतपे भवेदिति। ग्रहोपग्रहणं। आदिशब्देन संक्रांत्यादिनिमित्त
मुच्यते। तस्य च निमित्ताधीनत्वात् कुतपे। न नियंतुं शक्यत्वेऽपि तरस्य तु सांवत्सरिकादेरस्ति कुतपनियमः। स चोपक्रमनि
यमः। कदाचित्कार्यवशाच्छ्राद्धस्य सहकारिण्यभावे सति कुतपादर्वाचीनो गांधर्वेऽप्युपक्रमकालस्तयाभ्यनुज्ञायते। कुत
पमुख्यत्वमनेकवचनैर्विहितत्वादवगंतव्यं। तत्र कुतपस्वरूपं भविष्यपुराणेऽभिहितं। प्रविश्य भानुः स्वच्छायां शंकुवद्य
त्र तिष्ठति। स कालः कुतपो नाम मंदीभूतस्य संज्ञयेति। नारदः। संत्यज्य सप्तमं भागमष्टमं क्रमते यदा। स कालः कुत
पो ज्ञेयो मंदीभूतस्य संज्ञयेति। आपस्तंबः। सप्तमात्परतो यस्तु नवमात्पूर्वतः स्थितः। उभयोरपि मध्यस्थः कुतपः स
मुदाहृत इति। स च कुतपो मुख्यत्वाय वायुपुराणे प्रशस्यते। दिवसस्याष्टमे भागे मंदीभवति भास्करः। स कालः कु
तपो नाम पितॄणां दत्तमक्षयमिति। कुतपात्स्वर्वत्रिरयोर्गांधर्वरौहिणयोर्गौणोपक्रमकालत्वं सूचयितुं छत्रिमायेन मुहूर्त्त
त्रयं कुतपशब्देन व्यवजहार। नारदः। मध्याह्ने त्रिमुहूर्तेषु यदा भवति भास्करः। स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयमि
ति। कुतपे प्रक्रांतस्य सायाह्नादर्वाचीनः सर्वोपि मुख्यानुष्ठानकालः। तदुक्तं मत्स्यपुराणे। अह्नो मुहूर्त्ता विख्याता दश पंच च
सर्वदा। तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृत इति। अष्टमे भास्करो यस्मान्मंदीभवति सर्वदा। तस्मादनंतफलद
स्तत्रारंभो विशिष्यते। ऊर्ध्वं मुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयं। मुहूर्त्तपंचकं ह्येतत् स्वधाभवनमिष्यत इति। नन्वपराह्

स्यांतिमो भोगो निषिद्धः॥ तथा च यमः॥ चतुर्थे प्रहरे प्राप्ते यः श्राद्धं कुरुते नरः॥ आसुरं तु भवेच्छ्राद्धं दाता तु नरकं व्रजे
दिति॥ स्मृत्यंतरेपि॥ चतुर्थे प्रहरे प्राप्ते यः श्राद्धं कुरुते द्विजः॥ तद्दानं राक्षसो भुंक्ते निराशाः पितरो गता इति॥ सत्यं
अपराह्णस्यांतिमेन पादेन न्यूनमुहूर्तेन सह सायाह्णश्चतुर्थः प्रहरो भवति॥ तत्र सायाह्णभागकटाक्षेणायं निषेधः
न त्वपराह्णभागकटाक्षेण। तामेतां विवक्षां विशदीकर्तुं यमो वचनांतरे सायाह्णं निराचकार॥ तच्च वचनं सर्वमु
दाहृतं॥ तत्त्वपराह्णस्य मुख्यकालत्वेन प्रतिनियतं कुतपस्य व्यभिचारात्। तथा च मार्कंडेयः॥ कुतपे पूर्वतस्तु पूर्वा
ह्णे श्राद्धं कुर्याद्विचक्षणः॥ कुतपस्य परार्धे तु रौहिणं तु न लंघयेत्॥ नैष दोषः॥ अत्र कुतपरौहिणयोः शब्दयोर्दैवपि
त्र्यपरत्वात्। देवानुद्दिश्य क्रियमाणं श्राद्धं दैवं॥ तच्च फलकामिनामुत्साहेन तथा यथा चित्तप्रसादं जनयतीति कुत
पशब्देनाभिधीयते। एवं पितॄननुद्दिश्य क्रियमाणं पित्र्यं तदपि पितॄणां मरणादिस्मारकत्वेन तथा चित्तकालुष्यं जनयतीति
रौहिणशब्देनाभिधीयते। कुतपस्य दैवस्य कर्मणः प्रथमः कुतपः। यदा दैवं श्राद्धं करिष्यामीति बुद्धिस्तदा तत्र दैवस्य
र्थः। एवमितरत्र योजनीयं॥ एवं सत्यपराह्णे तु पार्वणश्राद्धं व्यभिचरति। रौहिणं तु न लंघयेदित्येकोद्दिष्टविषयं॥ यद्य
प्याप्ततः प्रतीत एवार्थो वचनस्यास्य परिग्रहे तत्तदा पूर्वोदाहृतं वचनजातं निखिलमपि व्याकुलीभवेत्। तदेवं पा
र्वणश्राद्धस्यापराह्णः कर्मकालः कुतपः प्रारंभकाल इति भवतामेतौ कर्मतदुपक्रमकालौ प्रवृत्ते कः सांवत्सरि ५६

कश्राद्धे किं प्रतिपत्पूर्वविद्धा या सोत्तरविद्धेति वीक्षायां देवस्वामी ब्रूते। यस्मिन्काले यद्विहितं कर्मोपक्रमोपसंहार
युक्तं तस्मिन्काले तस्यां तिथौ तस्मिन्नहनि संभावयितुं शक्यते तद्दिनं पूर्वं वा ग्राह्यमिति। यदा तु तयापराह्णो भय
व्यापिनी न संभवति तदा केवलापराह्णव्यापिन्यपि ग्राह्या तद्व्यापित्वं पित्र्येऽर्थे चापराह्णिकीति भविष्यपुराणेऽभिधानात्॥ हा
रीतोपि॥ पराह्णः पितॄणां तु या पराह्णानुयायिनी॥ सा ग्राह्या पितृकार्ये तु न पूर्वा स्वल्पानुयायिनीति॥ ननु केवलापरा
ह्णव्यापिनीवत् केवलमध्याह्नव्यापिन्यपि स्मृत्यंतरे प्रतीयते। मध्याह्नव्यापिनी या स्यात्सा तिथिः पूर्वापरापि वा॥ तया
कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति॥ मैवं॥ वचनांतरसंवादेनास्य वचनस्यैकोद्दिष्टविषयत्वेनैकभ
क्तविषयत्वेन वोपपत्तेः॥ अपराह्णव्याप्तिरप्येकभक्तन्यायेन षोढा भिद्यते। तत्र पूर्वेद्युरेवापराह्णव्याप्तौ यथो
क्तवचनेन सा ग्राह्या। परेद्युरेवापराह्णव्याप्तौ यथोक्तवचनात्सारंभकालसद्भावाच्च परेद्युः प्रशस्ता॥ उभयत्रापराह्ण
व्याप्तौ पूर्वैव। बोधायन आह॥ अपराह्णद्वयव्यापिन्यतीतस्य च या तिथिः॥ क्षये पूर्वा च कर्तव्या वृद्धौ कार्या तथोत्तरे
ति॥ अतीतस्य मृतस्य। अत्रेदं चिंत्यते। किं मृताहतिथेः प्रतिपदो वृद्धिक्षयाभ्यां निर्णयः उतोत्तरस्या द्वितीयाया वृद्धिक्षया
भ्यामिति॥ प्रतिपदो वृद्धिक्षयाभ्यामिति तावत्प्राप्तं। खर्वादिवाक्ये तु स्यैतया प्रतिभासमानत्वात्। तथा हि॥ खर्वो दर्प
स्तथा हिंसा त्रिविधं तिथिलक्षणं। खर्वदर्पौ परौ कार्यौ हिंसा स्यात्पूर्वकालिकीति। अत्रानुष्ठानोपयोगितिथेरेव धर्मः

एतच्च निर्णये स्पष्टीकरिष्यते खर्वादिवाक्यवदत्रापि याम्यत्रितिथिगतावेव वृद्धिक्षयाविति प्राप्ते अत्रमतः उत्तरतिथिगतावेवात्र
वृद्धिक्षयौ न त्वाद्यतिथिगतौ। अतः अपराह्णद्वयव्यापित्वाभिधानात् पूर्वेद्युरामध्याह्नावसानममावास्या प्रवृत्ता तत
परा अह्नोपक्रममारभ्य परेद्युरपराह्णावसानपर्यन्तत्वे सति प्रतिपदोप्यपराह्णव्यापित्वं भवति तच्च त्रिमुहूर्त्तवृद्ध्या संपद्य
ते। तथाहि। यस्मात् द्वितीयापरेद्युः सायाह्ने प्रविशति तदा तिथिवृद्धिस्तत्र परेद्युः स्थाने न्याय्यं। अतएव मारभ्याशेषमुख्यका
लव्यापित्वात् यदा द्वितीयापरेद्युरपराह्णेपि क्रियते तीक्षीयते तदा प्रतिपत्पूर्वविद्धा कर्त्तव्या। उत्तरविद्धायाः प्रतिपदो ज्यो
तिःशास्त्रप्रक्रियया पराह्णव्यापित्वेपि पारिभाषिकत्वात्स्मार्त्तप्रक्रियया तद्व्यापित्वात्। तथा च स्मर्यते तिथ्यादौ नवघा
वद्ध्रासो वृद्धिः परे हनि॥ तावानत्रापि यः स पूर्वेद्युरदृष्टोपि स्वकर्मणीति॥ तिथ्यादौ वित्यादिपदेन न तत्र योगे ग्र
त्योते तिथिनक्षत्रयोगेषु क्षीयमाणेषु सत्सु यो यावद्घटिकापरिमितो भवति तावद्घटिकापरिमितः क्षयस्तेभ्यः पूर्वे
षु तिथिनक्षत्रयोगेषु ज्योतिःशास्त्रेणादृष्टोपि स्मार्त्तपरिभाषया ग्रहीतव्यः। एवं वृद्धिरपि द्रष्टव्या। तथा सति प्र
प्रवृत्ते द्वितीयायाश्चापराह्णे यावान् क्षयस्तावान् पूर्वेद्युः प्रतिपदि योजनीयः। तथा सत्युत्तरविद्धा प्रतिपन्नापराह्ण ५
व्यापिनी पूर्वविद्धा तु व्यापिनीति सैव ग्रहीतव्या भवति। नन्वस्मिन्वचने स्वकर्मणीत्युच्यते ततः स्वकर्मनिमित्तो
वृद्धिक्षयप्रक्षेपः द्रष्टव्यः तं पद्यते न च प्रकृते तत्स्याद्यहिकं द्वितीयायाः स्वकर्मेति कथं तदीयवृद्धिक्षयोर्वचनस्या

स्यविषयो भवतः। नैष दोषः। मा भूत् तत्स्याद्यहिकं द्वितीयायाः स्वकर्म। प्रतिपदस्तु तद्भवत्येव तथा सति प्रतिपदो यत्कर्म
तस्मिन्निमित्तभूते सति तस्यां प्रतिपदि वृद्धिक्षयोः प्रक्षेपणीयाविति च वचनार्थः संपद्यते। तौ च वृद्धिक्षयौ प्रक्षेपाधिकरण
तिथ्यादेरुत्तरतिथ्यादिगताविति लभ्यते। ननु तिथ्यन्तरगतयोर्वृद्धिक्षययोस्तिथ्यन्तरप्रक्षेपे सति ज्योतिःशास्त्रप्रसिद्धिः
सर्वत्र विप्लवेत। ततस्तां प्रसिद्धिमुपजीव्य प्रवर्त्तमानः स्मार्त्तनिर्णयः सर्वोपि विप्लवेतेति चेत्। मैवं। न खल्वयं वृद्धिक्षय
प्रक्षेपोनुष्ठेयतिथिनिर्णयायोपन्यस्यते किं तर्हि शास्त्रान्तरेणानुष्ठेयतिथौ निर्णीतायां तदुपपादनायेत्यवापाद्योर्वृद्धि
क्षययोरुपन्यस्येत यथा यद्यानव्रतयोः शास्त्रान्तरेण त्रिमुहूर्त्तव्यापिन्यां तिथौ निर्णीतायां कर्मकालव्याप्त्यभावशंकामप
नेतुं सा तिथिः सकलाह्नेयस्य विद्यमानमपि साकल्यमापाद्यते एवमत्राप्यपराह्णद्वयव्यापिनीत्यनेन बोधायनवच
नज्योतिःशास्त्रप्रसिद्धद्वितीयायाः क्षयमुपजीव्य पूर्वविद्धायां प्रतिपदि निर्णीतायां अतएवादिकृत्स्नकर्मकालव्यापित्व
उत्तरविद्धा प्रतिपत् उक्ता न ग्राह्येति त्रिकामपनेतुं तिथ्यादावित्यादिवचनेनोत्तरविद्धायां प्रतिपद्यपराह्णक्षय आपद्यते। अतो
ज्योतिःशास्त्रप्रसिद्धेः स्मार्त्तनिर्णयस्य वा न कापि विप्लवः। यदा दिनद्वयेप्यपराह्णमस्पृश्यावासिष्ठेकं चित्कालं व्याप्नो
ति तदा पूर्वविद्धा प्रतिपद् ग्रहीतव्या तदाह मनुः। अहन्यव्यापिनी चेत्स्यान्न तदा हेत्तु यदा तिथिः। पूर्वविद्धैव कर्त्तव्या त्रिमु

मुहूर्त्तो भवेद्यदीति। सुमंतुरपि। न ह्यहव्यापिनी चेत्स्यान्मृताहे च यदा तिथिः। पूर्वस्यां निर्वपेत्पिंडमित्यांगिरसभाषितमि
ति। नन्वपराह्णस्पर्शिन्युभयत्र समाने प्रारंभकाले तु परेद्युः ^स्य^ कुतपसत्त्वाद्वा विशिष्यते ततश्च रविविद्धैव कुतो न ग्रा
ह्येति चेन्न। गुणाधिक्यादि ब्रूमः। परेद्युः कुतपव्याप्तिरेको गुणः। पूर्वेद्युस्तु तिथिमूलत्वं चमस्तमयव्याप्तिश्चेति गुणद्व
यं। मूलस्य प्राशस्त्यं नारदीयपुराणे दर्शितं। पितृमूले तिथेः प्रोक्तं शास्त्रज्ञैः कालकोविदैरिति। शिवरहस्यसौरपुरा
णयोरपि। आयः प्रातस्तयोष्या हि तिथिर्दैवफलस्तुभिः। मूले हि पितृकृत्यार्थं पित्र्यं चोक्तं महर्षिभिरिति। अस्तमयव्या
प्तेः प्राशस्त्यमाह मनुः। यस्यामस्तं रविर्याति पितरस्तामुपासते। सा पितृभ्यो यतो दत्ता ह्यपराह्णः स्वयंभुवेति। एतत्
प्राशस्त्यमेवोत्तरविद्धां प्रतिषेधति व्यासः। अस्तमयवेलायां कलामात्रापि या तिथिः। सैव प्रत्याब्दिके श्राद्धे नेतरा पु
त्रहानिदेति। न चापराह्णवेलायामविद्यमानतया कर्मकालव्याप्तिरहिता या तिथिः सानुपादेयत्वमिति शंकनीयं। आप
घायास्तद्यामेर्विद्यमानत्वात्। अत एव वसिष्ठः। पित्र्ये स्तमयवेलायां स्पृष्टा पूर्णा निगद्यते इति। नारदीयपुराणेपि पा
रणे मरणे नॄणां तिथिस्तात्कालिकी स्मृता। पित्र्ये स्तमयवेलायां स्पृष्टा पूर्णा निगद्यत इति। न ह्यस्तत्ताभ्यामस्तमयस्य ५८
र्शित्वस्वरूपाभ्यां कलामात्रावाक्येन च पूर्वेद्युः सायंकाले कालव्याप्तिर्विवक्षिता। परेद्युरपराह्णस्पर्शि

नस्य पूर्वदिने सायंव्याप्तेरवश्यंभावादन्यथा षण्मुहूर्त्तेत्यादिनिषेधसंगतेः। एतदेवाभिप्रेत्य गोभिलः। सायाह्नव्यापिनी
या तु पार्वणे सा उदाहृतेति। ईदृशे विषये पूर्वविद्धायाः कर्तव्यता शिवरहस्यब्रह्मवैवर्तसौरनारदीयपुराणेषुच्य
तिरेकमुखेन दर्शिता। वर्ज्या चेयोर्णमासं पितुः सांवत्सरं दिनं। पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यत इति। नन्वस्ये
वमुभयत्रापराह्णस्पर्शाभावे तथापराह्णद्वयव्यापिन्यामुत्तरतिथिगतवृद्धिक्षयाभ्यां निर्णयोस्तु। उत्तरतिथेः साम्ये
तु कथं किं तिथिमूलत्वास्तमयव्याप्तिगुणद्वयवशात्पूर्वविद्धा कर्तव्या किं वा कुतपसत्त्वगुणवशादुत्तरविद्धा त
त्रापराह्णद्वयस्पर्शाभावविषयन्यायेन पूर्वविद्धायां प्राप्तायां देवस्वामिवचनादुत्तरविद्धेति निश्चयः। वचनं हि न्याया
द्बलीयः। यदा तु दिनद्वयेप्यपराह्णैकदेशव्याप्तिस्तदापि वैषम्येण तथा साम्येन च निर्णेतव्यो। तदाह मरीचिः। द्व्यप
राह्णव्यापिनी चेदाब्दिकस्य यदा तिथिः। मृततीयत्र तद्विद्धां प्रशंसंति महर्षय इति। साम्येनोभयत्र व्याप्तिश्च तत्रापि
गते वृद्धिक्षयसाम्यैस्त्रिधा भिद्यते। तथाहि पूर्वेद्युरपराह्णस्य द्वितीयघटिकामारभ्य परेद्युरपराह्णस्य पंचघटिका
सु यदा तिथिर्वर्तते तदा पूर्वापराह्णस्य प्रथमघटिकां द्वितीयापराह्णस्य चरमघटिकां च विहायावशिष्टासु पंच
सु वर्तमानत्वात्साम्येनैकदेशव्याप्तिर्भवति। तिथिश्च तदा घटिकाचतुष्टयेन वर्धते। यदा पूर्वापराह्णस्य चरमघ

टिकायामुत्तरापराह्णस्य प्रथमघटिकायां च वर्तेत तदापि साम्येनैकदेशव्याप्तिर्भवति घटिकाचतुष्टयेन न तदा तिथिः क्षीय
ते यदा पूर्वापराह्णस्य चरमघटिकात्रये द्वितीयापराह्णस्याद्यघटिकात्रये च वर्तेत तदा साम्येनैकदेशव्याप्तिस्तदवस्थातिथि
स्तु न वर्धते नापि क्षीयते किं तु सममेव। ईदृशे विषये खर्वदर्पवाक्यान्निर्णयः। तदेवं प्रतिपदि पार्वणरूपमाह्निकं निर्णय
तत्पार्वणरूपस्य काम्यस्य तु दर्शविकारत्वात्प्रातिस्विकविशेषाभावाच्च वक्ष्यमाणदर्शनिर्णयेनैव निर्णयोऽवगंतव्यः॥
इति माधवीये कालनिर्णये प्रतिपन्निर्णयाख्यं तृतीयप्रकरणं॥ ॥अथ द्वितीयामारभ्य पर्वावसानाश्चतुर्दश तिथयो
ऽस्मिन्प्रकरणे निर्णीयंते। प्रथमं द्वितीयादीनां पंचदशकलानां क्रमेण चंद्रमंडलप्रवेशनिर्गमाभ्यां शुक्लकृष्णपक्षयोः
प्रतिपद्द्वितीयादिनामधेयास्तिथयो भवंति। तत्र प्रतिपदो निर्णयः पूर्वप्रकरणेऽभिहितः। स एवोत्तरासु सर्वासु तिथि
षु साम्येन संचारणीयः। विशेषस्तु तत्राभिधास्यते। प्रतिपदि दैवं पित्र्यं च व्यवस्थापितं दैवं षड्विधं उपवासैकभक्तनक्तायाचि
तदानव्रतभेदेन स्नानजपहोमादयस्तु व्रतशब्देनैव संगृहीताः। पित्र्यं द्विविधं एकोद्दिष्टं पार्वणं चेति तत्र सर्वत्र
कर्मकालव्याप्तिर्युक्ता या एव तिथेरनुष्ठानांगत्वे स्मृतिष्वभिप्रेते कर्मकालश्च द्विविधो मुख्यो गौणश्च। तद्यथा एकभ ५९
क्ते मध्याह्नो मुख्यः। आसायमवशिष्टः कालो गौणः। तिथिव्याप्तिश्च द्विविधा स्वाभाविकी तिथिव्याप्तिः साकल्याया

दिता तिथिव्याप्तिश्चेति। तद्यथा यदा संगवपर्यंतामावास्या तदानीमुपरितनो मध्याह्नो मुख्यया प्रतिपदा व्याप्तो भवति यदा
चापराह्णादिमारभ्य तिथिक्षयवशात्परेद्युः संगवांता प्रतिपद्भवति तदा पूर्वेद्युर्गौणकालव्याप्तिमुपजीव्यैकभक्तानु
ष्ठानाय तत्स्वीकारे सति मध्याह्नव्याप्त्यनुच्छेद्यत्वात्तत्र स्वाभाविकप्रतिपद्व्याप्त्यभावे साकल्यवचनापादितप्रतिप
द्व्याप्तिः स्वीकृता। एवं च सति कर्मकालव्याप्तौ सर्वस्मृतीनामत्यंतनिर्बंधदर्शनात्कर्मकालव्याप्तिशास्त्रमितरेभ्यः प्र
बलमिति निश्चीयते तदनुसारेण द्वितीयाद्यास्तिथय उपवासवद्दैवैकोद्दिष्टादौ पित्र्ये च कर्मकालव्याप्तियुक्ताः स्वी
कर्तव्याः। उपवासश्च सर्वतिथिषु नारदीये दर्शितः। शुक्लान्वा यदि वा कृष्णान्प्रतिपत्प्रभृतींस्तिथीन्। उपोष्यैव ब
लिं दत्वा विधिना स्वपरे दिने। ब्राह्मणान्भोजयित्वा तु सर्वपापैः प्रमुच्यत इति। उपवासस्याहोरात्रः कर्मकालः
तत्र तद्व्यापिनी ग्राह्या। तदसंभवे खंडतिथिर्ग्राह्येति निरूप्यते। तत्र यदा सूर्योदये त्रिमुहूर्ता ततोऽधिका वा प्रतिपद्भ
वति। उत्तरदिने स्तमयादर्वाक् त्रिमुहूर्ता ततोऽधिका वा तृतीया भवति सेयमुभयविद्धा द्वितीया। तत्र वेधकतिथे
रुदये स्तमये वा त्रिमुहूर्तत्वं वेधप्रयोजकं न तु ततो न्यूनत्वं तदेव पैठीनसिवाक्येन पूर्वमुदाहृतं। वेध्यति
थेश्च त्रिमुहूर्तसद्भावोऽपेक्षितः द्विमुहूर्तत्रिरह्नश्चेत्यनेन समंतुवचनेन प्रदर्शितं। उदयास्तमय
रेव वेधद्वयमर्थं उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके इत्यादिभिः कात्यायनवचनैरवगंतव्यः। एवं

चसतियथोदाहृते पूर्वेद्युस्त्रिरविद्धे येद्वितीये तयोरुत्तरविद्धा द्वितीयोपोष्या युग्माग्निवाक्येनान्वयव्यतिरेकाभ्यामुत्तर
विद्धायाः प्राशस्त्याभिधानात्॥ यद्यप्येकपोष्यत्वं साक्षान्नाभिहितं तथापि कर्मांतरविशेषस्यानुपादानादुपवासविषय
त्वं परिशिष्यते। तथाहि व्रतांतरस्याविषयत्वं संभवति यासे न युग्मादिशास्त्रस्य खंडतिथिशास्त्रस्य च दैवपित्र्यविषयत्वेन
व्यवस्थापितत्वात्। नाप्येकभक्तनक्तविषयत्वं। तयोर्मध्याह्नप्रदोषव्याप्त्यधीनत्वे युग्मादिशास्त्रानधीनत्वात्। अयाचित
स्याप्युपवासवदननुष्ठेयत्वेन नष्टस्याग्निविषयत्वं न च दानादिविषयत्वं दानादेः पूर्वाह्णादिकृतिथौ कर्तव्यतया नियतत्वात्। अ
त उपवासविषयत्वं परिशिष्यते। कदाचिदेकभक्तादितिथौ युग्मादिशास्त्रस्य संवादो भवति तथा तच्छास्त्रमुपोद्बलकं न
तु नवयं वारयामः वचनांतरेषु युग्मतिथेरुपोष्यत्वं साक्षात्प्रतीयते तथा च प्रतिपत्त्रकरणे प्रतिपदमावास्या युग्मस्यो
पोष्यत्ववचनमुदाहृतं। अत्रापि युग्मवाक्याभिप्रायेणैव द्वितीया परविद्धा पोष्या चं। र‍ऽगुस्मृतिविज्ञधर्मांत्रे दर्शितं। ए
कादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी। त्रयोदशी चतुर्थी च उपोष्याः परान्विताः इति। यदा पूर्वेद्युरुदयमारभ्य परेद्युरुदय
स्यापरि त्रिमुहूर्तं वर्धते तदा पूर्वेद्युरेवोपवासः। न चोदाहृतेन परान्विताः इति वचनेन विरोधः शंकनीयः। परान्वितपूर्वा
न्वितयोः प्रसक्तयोः सतोरस्य वचनस्य नियामकत्वात्। न चात्र परान्वितत्वं प्रसक्तमस्ति पूर्वेद्युस्य दिनस्य संपूर्णतिथि
त्वात् संपूर्णखंडयोः संपूर्णस्या संदेहत्वेन प्रबलत्वात्। असंजातविरोधित्वेन तस्य कर्मकालव्यापित्वाभ्यां पूर्वदिनस्ये

व प्राबल्यं तस्मात्तत्रैवोपवासः॥ ननु पूर्वदिनोपवासं प्रतिषेधति व्यासः। तृतीयायुता कार्या द्वितीया न तु पूर्वयेति। मैवं।
अस्य वचनस्य खंडतिथिविषयत्वेन संपूर्णतिथावप्रवृत्तेः। खंडतिथिविषयत्वं च पूर्वया युता नैव कार्येत्यभिधानाद
वगम्यते। ननु खंडतिथावपि द्वितीया पूर्वविद्धैवोपोष्या प्रतिपत्सद्वितीया स्याद्द्वितीया प्रतिपद्युतेत्यापस्तंबवचनेन प्रतिप
द्द्वितीययोर्युग्मत्वाभिधानात्॥ एतदेव वचनमुपजीव्य कृत्स्नप्रतिपत्परविद्धा पोष्येति पूर्वं निर्णीतं। एवं तर्हि द्वितीयापि कचि
त्पूर्वविद्धा भवतु। तदुक्तं स्कंदपुराणे॥ प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी॥ पूर्वाह्णिकीति च कर्तव्या द्वितीया तादृशी
विभोऽप्रतिता तादृशी संमुखी पूर्वयुतेत्यर्थः। पूर्वेद्युरुदये मुहूर्तपरिमाणावशिष्टा पूर्वाह्णसंबंधिनी यदा भवति तदा वेधकारिण्याः
पूर्वतिथेर्मुहूर्तत्रयावच्छिन्नसामर्थ्यात्त्वयं खंडापि सती संपूर्णवत्पूर्वत्रोपवासे युज्यते। अत्र द्वितीयानवधाभिधेते। पूर्वे
द्युरुदयमारभ्य प्रवृत्तायास्तस्याः परित्यज्य प्रवृत्ता पूर्वाह्णसंबंधपरित्यज्य प्रवर्तत इति त्रयो भेदास्तेष्वेकैकस्य परेद्युस्त्रिमुहूर्तत्वे
तन्न्यूनत्वं चैकस्यत्वे त्रैविध्ये सति मिलितत्वान्नवविधत्वं संपद्यते। अत्र पूर्वेद्युरुदयमारभ्य प्रवृत्तायाः संपूर्णत्वेन परे
द्युर्मुहूर्तत्रयत्वन्यूनत्वैश्न्यत्वे पुत्रिष्वपि पक्षेषु विवादाविषयत्वात् पूर्वत्रैवोपवासो युक्तः। उदयं परित्यज्याक्रि

यत्सर्वाह्णभागं प्रक्रम्य प्रवृत्ताध्ययाः परेद्युस्त्रिमुहूर्त्ततायां सत्यपि परयुतोपवाससंभवे तत्परित्यज्य पूर्वाह्णिकवचनेन
न पूर्वेद्युरेवोपवासो विधीयते परेद्युस्त्रिमुहूर्तेन्यूने न चैकभक्तफले च वचनकारिण्यास्तृतीयायाः सत्यपि वेदं तु साम
र्थ्ये विध्याद्द्वितीयायास्त्रिमुहूर्त्तत्वाभावेन वेध्यायोग्यत्वात्तत्रोपवासो न प्रसक्तः। अतः परिशेषात्पूर्वाह्णवा
क्याच्च पूर्वत्रैवोपवासः पूर्वेद्युः पूर्वाह्णे सर्वं परित्यज्य प्रवृत्तायाः परेद्युस्त्रिमुहूर्त्ततायां न यत्र तिथिसत्वात्कु
त्रोपवास इति संदेहे सति व्यासेनोत्तरदिनविधानात्पूर्वदिननिषेधाच्चोत्तरत्रोपवासः। न चात्रउं केरूर्भ
ध्यवस्त्राशंकनीया युग्मवाक्येनैकपक्षे परदिनविधानात्। तथापरेपि तत्प्रवृत्तौ बाधो नावाच्च।
श्रेत्ययोस्त्वेकपक्षयोः पूर्ववद्विधानस्तुत्यौ पूर्वेद्युः पूर्वाह्णिकव्याभावेपि परिशेषादापस्तंबोक्तयुग्म
वाक्याच्च पूर्वत्रैवोपवास इति सिद्धं। एकभक्तादि पार्वणश्राद्धं तेषु कर्मसु द्वितीयायां युक्तस्य विशेष
स्य क्वचिदप्यस्मरणात्पूर्वोक्तन्यायो योजनीयः॥ ॥इति द्वितीयानिर्णयः॥ ॥अथ तृतीयानिर्णय
ते। तत्र त्रिविधानि वचनानि स्मर्यन्ते कानिचित्पूर्वविधायकानि कानिचित्सर्वविद्धा कुत्रैरविद्धाविधा ६१
यकानि। तत्र युग्मवाक्येन तावत्पूर्वविधाविधायकं प्रसिद्धं। पूर्वविद्धानिषेधकं तु आपस्तंबः तृतीयान्तु
न कर्तव्या द्वितीयोपहिता विनो इति। द्वितीययायुतां नान्तु यः करोति नराधमः॥ संवत्सरकृतं तेनेह

सत्कृतं धर्मेण लुप्यते। द्वितीयाशेषसंयुक्तां तृतीयां कुरुते यदि तु। स याति नरकं घोरं कालसूत्रं भयंकरं। द्वितीयाशेषसं
युक्तां या करोति विमोहिता। सा वैधव्यमवाप्नोति प्रवदंति मनीषिण इति। स्कंदपुराणेपि। तृतीयान्तु न कर्तव्या द्वितीया
संयुता तिथिः। या करोति विमूढा स्त्री पुरुषो वा शिखिध्वजः। द्वितीयासंयुतां नात्र पूर्वधर्मात्प्रलुप्यते। विधवात्वं
दुर्भगात्वं न वेन्नात्यत्र संशयः। कालिकायामपि वाचैव द्वितीया सप्रदृश्यते। सा तृतीया न कर्तव्या कर्तव्या गणसंयुता॥
पदी कृत्यरमं पुण्यं व्रतकर्त्रो शिवध्रुवेति। अत्र पूर्वविद्धानिषेधवत् तुल्यासाम्यादाय युग्मवाक्यं तु रंभाव्रतविषयं
भविष्यति रंभाव्रतं च भविष्योत्तरे दर्शितं। नदेक्तरुधयफलेन रंभाख्यं व्रतमुत्तमं। उपोष्य तु तृतीयायां स्नाता नियमन
तत्परेति। तत्र वा परं रंभाव्रतपठितं। रंभातृतीयायां च रूपाणि सर्वपापप्रणाशिनी। मार्गशीर्षे तथा मासि तृतीयां या
नराधिप। शुक्लायां प्रातरुत्थाय दंतधावनपूर्वकमित्यादिना व्रतमभिधायोपसंहृतं सौभाग्यारोग्यदा ची
र्णेन पाराउसत्तमा। तन्नरेभ्यस्तृतीयेयं परसौभाग्यदायिनी॥ एतत्परं भाव्रतस्य सर्वविद्धायां कर्तव्यत्वं स्कंदपुराणे
दर्शितं। बृहत्तपा तथा रंभा सावित्रीवटपैतृकी। कृष्णाष्टमी च भूता च कर्तव्या संमुखी तिथिरिति। तत्रैव पूर्वविद्धानिषेधा
रंभाव्रतव्यतिरिक्तविषयत्वेन पठ्यते। द्वितीयया तु विद्धा च तृतीया न कदाचन॥ कर्तव्या व्रतिभिस्तात धर्मकामा
र्थतत्परैः। रंभाविनात्वेकां च रंभां च तृतीयां पुण्यवर्द्धिनीमिति। उत्तरविद्धाविधायकं तु ब्रह्मवैवर्ते दर्शितं। चतुर्थ

संयुतायां च सा तृतीया फलप्रदेति ॥ आपस्तंबोपि ॥ चतुर्थीसंयुता या च सा तृतीया फलप्रदा । अवैधव्यकरी स्त्री
णां पुत्रसौभाग्यवर्द्धिनीति ॥ बृहस्पतिरपि ॥ एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ॥ अमावास्या तृतीया च ता
उपोष्याः परान्विता इति ॥ अस्यैवोत्तरार्द्धं विधायकस्य रंभाव्यतिरिक्तविषयत्वेऽप्यसंवेद्यवर्द्दर्शितं । रंभाख्यां
वर्जयित्वा तु तृतीयां द्विजसत्तम ॥ अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यत इति । क्वचित्तु सर्वत्रैतेषु पूर्वविद्धैव ॥
तदाह वसिष्ठः ॥ एकादशी तृतीया च षष्ठी चैव त्रयोदशी । पूर्वविद्धा तु कर्तव्या यदि न स्यात्परेहनीति । अत्र परेह
न्यसत्त्वं त्रिधा । संघटते सर्वथैवासत्त्वं द्विमुहूर्तासत्त्वं त्रिमुहूर्तासत्त्वं चेति । सर्वथैवासत्त्वे पूर्वदिनेनुष्ठानमसक्ता ।
यदा तु परेह्नि घटिकात्रयं घटिकापंचकं च भवति तदा कथं । अस्ति हि महान् संदेहः त्रिमुहूर्तसद्भावस्य
मुख्यकालत्वात्पंचघटिकापक्षे मुख्यासंभवः । द्विमुहूर्तसद्भावस्यानुकल्पत्वात् घटिकात्रयपक्षे तस्या
प्यसंभवः । तदा किं मुख्यानुकल्पयोरभावात्पूर्वेद्युरनुष्ठानं किं वा पूर्वविद्धायानिषेधबाहुल्यात्परेह्न्य
ल्पमपि सत्त्वमाश्रित्यानुष्ठानं । नन्वत्र किंचिन्नियामकं वचनमस्ति नापि न्यायेन निर्णेतुं शक्यते । न तावत्पू ॥६२॥
र्वदिने न्याय्यं प्रापकाभावात् नापि मुख्यानुकल्पव्यतिरिक्तकल्पांतरं संभवति येनात्र प्रापकमाशंक्येत नापि परे

द्दिने न्याय्यं निषेधबाहुल्यात् वसिष्ठवचनोक्तप्रतिप्रसवेन निषेधो बाध्यत इति चेत् । मैवं । तस्य वचनस्य परेद्यु
रत्यंतासत्त्वपक्षोपपन्नत्वात् तस्मादागमन्याययोरत्राप्रवृत्तेरयोगिनोऽसर्वज्ञस्य धर्मतत्त्वसाक्षात्कारासंभवा
च्छिष्टाचार एवात्र शरणं । अत एव व्यासः । तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना नवानृषेर्दर्शनमस्ति किंचित् ॥
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पंथा इति । शिष्टाश्च मुहूर्तमात्रसद्भावमाश्रित्य गौरीव्रतं
परेद्युरनुतिष्ठंति अतो गौरीव्रतं परेद्युरेवानुष्ठेयं । अन्येषु भविष्यत्पुराणाद्युक्तेषु विनेशपूजादिषु मुख्यक
ल्पे गौणानुकल्पेन वा परेद्युर्विद्यमानायां परेद्युरेवानुष्ठानं तद्विषयाश्च पूर्वविद्धानिषेधाः । कल्पद्वयासत्त्वे तु वि
द्यमानायामपि परेद्युः स्वल्पायां तृतीयायां तां परित्यज्य वसिष्ठवचनेन पूर्वेद्युरनुष्ठानं । एकभक्तनक्तादिव्रतानां
गे भक्तानुसारेणानुष्ठेयमित्युक्ते त्रयोस्तकमध्याह्नप्रदोषव्याप्तिवशेनानुष्ठानं । रंभाव्रतेप्यस्तमयादर्वाक् तृतीया
यास्त्रिमुहूर्तसद्भावे तस्यामेव पूर्वविद्धायामनुष्ठानं तद्विधायकवाक्येषु संमुखेत्यभिधानात् सा मुख्य
स्य च सायाह्नव्याप्तिरूपत्वात् । मुहूर्तत्रयान्यूनत्वे सति पूर्वविद्धायाः प्रापकाभावात् रंभाव्रते परविद्धाया
अनिषिद्धत्वाच्च सामान्यवचनैः परविद्धाप्रशंसकैः परेद्युरनुष्ठानं । यानि द्वितीयायां विद्धायां निषेधका

निवाक्यानि तेषु द्वितीया कियती विवक्षितेति चेत्। मुहूर्त्तत्रयपरिमितेति ब्रूमः। वेधशास्त्रे तथाभिधानात्। यत्तु कला

काष्ठाप्यपीति वचनं तत्कैमुतिकन्यायेन त्रिमुहूर्त्तत्वं द्रढयति॥ ॥इति तृतीयानिर्णयः॥ ॥अथ चतुर्थी निर्णीयते॥ सा

च युग्मवाक्यात्परविद्धा ग्राह्या॥ न च शुक्लपक्षे तथा चेपि कृष्णपक्षे पूर्वैव स्यादिति शंकनीयं युग्मवाक्यस्य पक्षद्वयसा

धारणत्वात् चतुर्दश्याश्च पूर्णिमेत्येतच्छुक्लपक्षविषयत्वे लिंगमिति चेन्न। तस्यैकयुग्मस्य शुक्लपक्षविषयत्वेपि

द्वितीयादीनां युग्मानां पक्षद्वयसाधारणत्वस्य वक्तुं शक्यत्वात्। साहचर्यात्तान्यपि शुक्लपक्षविषयाण्येवेति चेत्

न। प्रतिपदाप्यमावास्येत्यनेन पक्षद्वयस्पर्शिना युग्मेन साहचर्यादितरेषामपि पक्षद्वयस्पर्शित्वं किं न स्यात्। ए

वं तर्हि साहचर्ययोर्द्वयोः परस्परकलहादनिर्णय एवेति चेन्न। कारणांतरेण निर्णीतत्वात्। तथाहि चतुर्दशी

पूर्णिमायुग्ममेकपक्षवर्त्तितिथिद्वयात्मकत्वाद्द्वितीयादिकयुग्मैः सदृशं प्रतिपदमावास्यायुग्मं तु भिन्नपक्ष

द्वयवर्त्तितिथिद्वयरूपत्वाद्विलक्षणं। अतः पूर्णिमायुग्मसाहचर्यमेव निर्णायकमिति चेत्। मैवं। श्रुत्या साहचर्य

स्य बाध्यमानत्वात्। द्वितीयादिशब्दो मुख्यया वृत्त्या पक्षद्वयवर्त्तिनं तिथिं ब्रूते। सोयं श्रुतिलिंगादिषु षट्सु प्र ॥६३॥

थमं प्रमाणं। साहचर्यं तु सन्निधिः स च स्थानापरनामधेयत्वात्पंचमं प्रमाणं। तच्च प्रथमादत्यंतं दुर्बलं। सोय

मर्थः पूर्वमीमांसायां तृतीये ध्याये श्रुतिलिंगादिसूत्रे महता ग्रंथेन प्रपंचि

तः। तत्र चैतत्। श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौ

र्बल्यमर्थविप्रकर्षादिति। इममेव श्रुतिसन्निध्योर्विरोधमुदाहृत्य तन्त्रमीमां

सायां गुणोपसंहारे विरचितं। तथाहि। तांडिशाखायां श्रूयते। उर्गित्येतद

क्षरमुद्गीथमुपासीतेति। अस्यायमर्थः। पंचभक्तिके सप्तभक्तिके साम्न्युद्गीथाख्या

भक्तिः कश्चिदवयवः। तेषां [illegible] काले गायति गीयमानं चैतमु

द्गीथं सर्वोद्गातांडिशाखागतोपनिषद्विहितेन रेकेणोंकाररूपेणोपासीतेति। न

च गुणस्तांडिशाखायामेव विधीयते। उद्गीथमात्रस्य तांडिशाखा मूलजैमिनीयतलव

कारादिषु सर्वासु सामशाखासु [illegible]। तन्न तदिदं तांडिशाखोक्तगुणमुपासनं तत्किं

तांडिशाखागत एवोद्गीथे विनिवेशयितव्यमुत विशिष्टते। किं वा सर्वशाखागतउद्गीथसामान्येषु

चरतीति संशयः। तत्र सन्निधिबलादुद्गीथविशेषे व्यवतिष्ठत इति पूर्वपक्षः। उद्गी

थत्राद्धे मुख्यया स्वेत्योद्गीथसामान्यं ब्रूते न च संनिधिना पंचमप्रमाणेन प्रथमप्रमाणस्य संकोचो युक्तः तस्मादुपा
सन मुद्गीथसामान्ये सचरतीति राद्धांतः। अनेन न्यायेन प्रकृतेपि साहचर्यस्येन संनिधिना द्वितीयाश्रुतेः संकोचो योगा
त्युग्मादिशास्त्रं पंचद्वयविषयं द्रष्टव्यं। यद्वितु [illegible] दर्शी कृष्णामयोन्तरस्यपक्षविषयत्वेन संभाव्येतेन हितैवे कन्त्रेत्र शुक्लप
क्षविषयत्वमस्तु। तथाद्युप्रतिपच्छुक्लमपिगृह्यतां राभावात्पक्षद्वयसाधारणविषया। एवं च व्यवस्थितौ सत्यां युग्मवाक्येन पक्षद्वये
पि चतुर्थ्यपरविद्धे प्राप्नोति। ननु वचनांतरेण चतुर्थद्वयस्य व्यवस्था प्रतीयते तथा च माधवीये उदयः शुक्लपक्षे तिथिर्ग्राह्या य
स्यामभ्युदितो रविः। कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति। अत्र वक्तव्यं किमिदं शुक्लादिवाक्यं युग्मादिशास्त्रनि
यमद्वारा एकवाक्यतया तिथीनां व्यवस्थापकं उत स्वातंत्र्येण यदि नियमद्वारा तर्हि पूर्वतिथीनामुत्तरविद्धानां प्राप्त्यर्थं न शु
क्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविरिति तत्पूर्वार्धं न विरोधि। उत्तरार्धं तु विरोधि। तथा तेष्वेव युग्मेषु चरमतिथीनां पूर्व
विद्धानां प्राप्त्यर्थे न कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति तूत्तरार्धमविरोधि पूर्वार्धं तु विरोधि। तथा द्वितीयाप्रतिपद्युग्मे
पि कृष्णपक्षगा तस्या स्वर्णस्मिन्ह्येव परत्वं च कृष्णपक्षगा तासा प्रतिपदोस्तमये परत्वं चैतथा सति तत्रोभयत्र विरोधः स्फुटतरः ६४
तस्मान्न युग्मादिशास्त्रमनेन नियंतुं शक्यं। नापि स्वातंत्र्येण तिथीनां व्यवस्थापकं तत्र युग्मादिशास्त्रविरोधस्यापरिहार्य

त्वात्। अविरोधे न शुक्लादिवाक्यस्य दर्शासीविषयत्वं प्रतिपत्प्रकरणे प्रसंगादुदाहृतं। तस्माच्छुक्लेतरपक्षयोः कृत्स्नयोरपि युग्मादि
शास्त्राच्चतुर्थ्यपरविद्धा ग्राह्या। हेमाद्रिस्मृतौ कोपि एकादश्यां तथाष्टमी अमावास्या चतुर्थिका। त्रयोदश्या गमसंयुक्ताः पराः पूर्वे
ण संयुता इति। ननु परविद्धोपवासः कैश्चित्स्मर्यते। द्वितीया पंचमी वेधाद्दशमी च त्रयोदशी। चतुर्थ्यां नोपवासेन हन्युः पू
र्वेत्तरे तिथी इति। अयमर्थः। पंचमीद्वितीयेन पूर्वयांचतुर्थ्या तिथिमुत्तरां च षष्ठीं तिथिमुपवासविषये हंतातः पंचमी विद्धा पं
चतुर्थ्यां नोपवासयुता। न षष्ठ्यां। [illegible] नु केवल स्कन्दपुराणे। संतिहि चतुर्थ्यादि निर्देवतानां विषयाणि बहूनि व्रतानि। तत्राविं
शुधर्मोत्तरप्रोक्ते च लक्ष्मी नृसिंहव्रते मध्ये चतुर्थ्यां गणपतिर्देवता। स्कंदपुराणोक्ते अंगारक चतुर्थीव्रते सोमो देवता। कूर्मपु
पुराणोक्ते यमव्रते सोमो देवता। स्कंदपुराणादिप्रोक्ते कुंददर्पणव्रतादिके गणपतिर्विनायको देवता। कूर्मपुराणे एव प्रो
क्ते नागव्रतचतुर्थीव्रते शेषपृश्नवासुकीदयः सर्पा देवता। स्कंदे विनायकनागपातिनिरुक्तानां केनाप्येवमुपवासः। विनाय
कनागयोः सूत्रधारत्वाद्वारं प्यावास्त्रोपवासः। कदाचित्स्वयं बहुरुपवासः प्राप्नोति नान्यो विशेषेण स्मृतिमार्गनिषेधोव्य
वस्थापनीयः। तथा पूर्वविद्धाप्रशस्ताः चतुर्थ्या नवमी विषयोक्ता। अतएव ब्रह्मवैवर्ते परविद्धयोस्तिथि निषेधा
र्थेति। चतुर्थ्या संयुता कार्या तृतीया च चतुर्थिका। तृतीयया युताने न पंचम्याकारयेत्कचिदिति। तथा तत्रैव पूर्वतंति
द्धा प्रशस्यते। चतुर्थी संयुता यात्वसा तृतीया फलप्रदा। चतुर्थ्यां तृतीयायां महापुण्यफलप्रदेति। तस्याश्चविना

इ व्रतविषयत्वं तत्रैव सूचितं॥ कर्त्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणी॥ स्कंदपुराणेपि। विनायक
व्रते कार्ये सिंहमासे शुभप्रमुखे॥ चतुर्थी तु जयायुक्ता गणनाथसुतोषिणी॥ विनायकव्रतानुष्ठाने
चतुर्थ्या मध्याह्नव्यापित्वं मुख्यं पूजोक्तं तदाह बृहस्पतिः॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्य
ते। मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेहनि॥ यदा पूर्वेद्युरेव कर्ममध्याह्नव्यापिनी तदा मुख्यप्रयोज
कस्य विद्यमानत्वात् मातृविद्धत्वगुणसंग्राह्या साध्या तादृशविषये परेद्युः सत्यामपि मध्याह्नव्या
पित्वं साधारण्यात् तरत्वप्रशस्यत इत्यर्थः। परेद्युरेव पूर्वा मध्याह्नव्यापिनी तदा मातृविद्धत्वगुणाभावे
पि प्रधानप्रयोजकानुसारेण परदिने कर्तव्या॥ तथा च स्मृत्यंतरं॥ मातृविद्धा प्रशस्ता स्यात् चतुर्थी गण
नायके। मध्याह्नात्परतश्चेत्स्यान्नागविद्धा प्रशस्यत इति॥ ननु बहुषु वचनेषु पूर्वविद्धाया गणनायस्य
तोषहेतुत्वमुक्तं। अतः पूर्वविद्धत्वस्यैव मुख्यप्रयोजकता युक्ता। मैवं। मध्याह्नव्यापित्वस्यैवं वैय
र्थ्यप्रसंगात्॥ अवश्यं हि तदा मध्याह्नव्यापित्वं प्रसंगाद्भवत्यतस्तद्विधानेयार्थ्यं [illegible] स्यादेवात् ॥ ६५ ॥ श्रीः
प्रयोजके तत्पक्षांतरे वा अनेकवचनैर्विहितस्य पूर्वविद्धत्वस्य वैयर्थ्यं तदवस्थं। मध्याह्नव्यापि
त्वेनैव तन्निर्णयादिति तन्न। यदा तिथिक्षयवशादुभयत्र मध्याह्नव्याप्तिर्नास्ति यदा चोभ

यत्रास्त्यमध्याह्नव्यापित्वं तदेकदेशव्यापित्वं वा समानं तत्र सर्वत्र मध्याह्नव्याप्त्या निर्णयाभावे सति पूर्वविद्धवचनैरेव निर्णेतव्यत्वा
त्। एवं तर्हि सावकाशनिरवकाशयोर्निरवकाशं बलीय इति न्यायेन मध्याह्नव्यापित्वस्य निरवकाशत्वात् प्राबल्यमित्येव वक्तव्यं न
तु मुख्यत्वमिति चेन्न। मुख्यत्वस्यापि संभवात्। शिष्टनिर्णये कर्मकालव्याप्तिशास्त्रस्य मुख्यत्वमस्य प्रकरणस्यारंभे दर्शि
तो। कर्मकालश्च विनायकव्रतस्य मध्याह्नः। प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप इति तत्कल्पविधानात्। अतो मुख्यत्वा
दपि मध्याह्नव्यापित्वस्य बलवत्त्वमिति। ननु कस्यचित्त्वेन पूर्वविद्धवचनेन मध्याह्नव्यापित्वबाधस्तूपलभ्यते। जयायां यदि संपूर्णा
चतुर्थ्यस्तं यदि [illegible] यासे वहिः कर्तव्या नागविद्धा न कारयेदिति स्मरणात्। अस्य वचनस्य दिनद्वये मध्याह्नस्पर्शाभा
वविषयत्वेनाप्युपपत्तेः। तथाहि पूर्वदिने विनायकप्रयोजके मध्याह्ने जयायां संपूर्णायां परेद्युर्मुहूर्तत्रयं [illegible] यवशात् मध्याह्नादर्वा
गेव चतुर्थ्याः समाप्तौ तदा दिनद्वये कर्मकाले व्याप्त्यभावे तिथेश्चतुर्थ्याः अभावाद्विनायकव्रतं किं दिनद्वये कार्यमिति वीक्षायां
धा पूर्वदिने नागविद्धा यपरदिनं निषेधयति। अथोच्यते जयायां यदि संपूर्णेत्यनेन कर्मकालरूपमध्याह्नसमाप्तिपर्यंतं व्या
प्तिर्विवक्षिता किं तर्हि अस्तमयपर्यंतमिति। एवं तर्हि पूर्वविद्धवचनानां विषयाधिक्यात् पूर्वतिथेः संपूर्णत्वे सति वैध्यायाश्च
तुर्थ्या निरवकाशत्वात्। अथ मातृविद्धत्वं तथापि मध्याह्नव्यापिन्यां प्रायः पायां विहितायां परेद्युर्मध्याह्नव्यापित्व
बाध्यत एवेति चेत् मैवं। नेदं खलु परदिने हेयत्वे मध्याह्नव्यापित्वं कारणं तयोरन्यत्वं किं तु नागविद्धत्वमतो नागविद्ध

वनिर्णयाद्वचनस्य तात्पर्यनिर्णुः चतुर्थ्यरहितत्वया विधाने अन्यथा चतुर्थीनिर्णयामपि तात्पर्यप्रसङ्गेन तत्र तत्फलं नहि वरघाता
यकन्यासुहृदंनिवचनछायासुकैर्मुतिकन्यायेनेपराकृष्यते यदि शङ्कप्रयोगात् तत्रापि तया संपूर्णतिथापि नागविद्धाद्रुयाकिंतु
तत्त्वयायुक्तायाचतुर्थ्यासिमंतेत्यामितिद्विवचनव्यक्तिःमध्याह्नव्यापिनीयतीमन्त्रिः-कृतस्तेवतिन्वेतञ्चतुर्थ्यरहितावास्तु
तृतीयायानवापि कुतोमन्त्रिरिति समानः पर्यनुयोगः वचनबलादित्युत्तरमस्माकमपि वचनयोःपरस्परकलहे प्रवे
क्त्योर्निरवकाशत्वाभ्यांमध्याह्नव्यापित्ववचनमेवातिप्रबलेसिद्धिविनायकव्रतेतस्यप्रतियदोक्तवाद्यपिप्रबलत्वे तयावच
नंतुगौर्यादिव्रते चरितार्थमतश्च वचनं भविष्यत्पुराणेपि हि तं विनायकं समभ्यर्च्य चतुर्थ्यां यदुनन्दन सर्वविघ्नविनिर्मुक्तः
कार्यसिद्धिमवाप्नुयादित्यभिधायानंतरमिदंयथ्यतेनिडांरतिशिवांनञ्जांकीर्तिमेधांसरस्वतीं तत्र तुष्टिं तथा कांतें
तत्रैदाहनिसूयेत्या विद्याकामोविशेषेण पूजयेच्च सरस्वतीमिति लिंगपुराणेपि चतुर्थ्यांतु गणेशस्य गौर्याश्चैव विधा
नतःउरजांक्रन्दालनेतसिद्धिंसौभाग्यंचनरःक्रमादिति नारदीयपुराणेपि माघशुक्ले चतुर्थ्यां तु गौरीमाराधयेद्बुधः
चतुर्थ्यदिरतानाममोरीतन्त्रशुभ्रजितेति अतोयथोक्तरीत्या विनायकव्रते मध्याह्नव्यापिन्येवेति निर्णयः गौरीव्रते तु तथा ६६
वचनेद्रष्टव्या तत्रयदिदिनद्वयेपि विषम्येण मध्याह्नैकदेशव्यापिनी तदा पूर्वदिने तन्महत्त्वंचेत्तदेवोपादेयमुत्तरदिने तन्म
हत्त्वेकिंमहत्त्वगुणेनतत्कुमारेयंकिं वा मारविद्धत्वगुणेन पूर्वमुपादेयमिति संशये पूर्वमिति क्रमःापरस्य नागविद्धत्वदो

षोपेतत्वात्पूर्वस्य च तदनाभावात्।। एतदेवाभिप्रायेस्कंदपुराणेप्यते।। ज्येष्ठावनदृष्टसावित्री
तथानंगत्रयोदशी।। विनायकचतुर्थी च कर्तव्यासंमुखीतिथिरिति विनायकव्रतवन्ना
गव्रतेपि चतुर्थी मध्याह्नव्यापिनी ग्राह्या नागव्रतं च कूर्मपुराणे दर्शितं। तिथौ युगाह्वया
यां वस्तु पोषयेद्यथाविधि। शंखपालादिनागानां नाशेषश्चेमस्तनः। तथा कार्य रिपुघ्नं ग
धस्त्रीराघ्याय न पूर्वकं। विशालितस्यनश्यंतिन च तान्दूभ्रंतिपन्नगा इति विनायकचतुर्थी
नागचतुर्थ्योरियान्विशेषः। एकनक्तन्यायेन मध्याह्नव्याप्तेः घोढान्वेदसतियद्यपरद्युरे
व मध्याह्नव्यापिनी तदा विनायकचतुर्थी पराइतरेषुतु पंचसु नेदेषु पंचमीयोगस्य प्र
शस्तत्वात्पूर्वेद्युरेव सा भवति। यदा तु पूर्वेद्युरेव मध्याह्नव्यापिनी तदा नागचतुर्थी पू
र्वा इतरेषु तु पंचसु नेदेषु पंचमीयोगस्य प्रशस्तत्वादुत्तरा भवति।। तत्प्राशस्त्यं च युग्माद्धरे
दिति वचनादवसीयते।। इति चतुर्थीनिर्णयः।। छ।। ।।अथ पंचमी निर्णीयते।। ।।छ।।
युग्मवाक्येन पंचमी पूर्वविद्धा गृहीतव्या। ननु प्रायः प्रातरुपोष्या हि तिथिर्दैवे फले स्मृतेति
निशिवरहस्यसौरपुराणयोस्तिथ्यन्ते नागस्योपवासांगत्वाभिधानत्वात्तद्योगे पंचम्युपवासा

परेद्युः प्राप्नोति। हारीतेन परविद्धायाः प्रतिषिद्धत्वात्। वह्निर्युक्तसंयुता कार्या पंचमी परतया न तु। दैवे कर्मणि पित्र्ये च
शुक्लपक्षे तथासित इति। नैवं तावता प्रायः प्राप्त इति वचनस्य निर्विषयत्वं शंकनीयं। निर्णीतस्य तु निर्णेयमात्रस्तु
चतिथिषु यत्र यत्र परविद्धोपवासः शास्त्रात् तेन प्राप्तस्य सर्वस्य तद्विषयत्वोपपत्तेः। न च तेन शास्त्रेण तत्तेद्
गतस्य सिद्धेः क्व तमनेन वचनेनेति शंकनीयं सामान्यविशेषरूपस्य शास्त्रद्वयस्यापि चरितार्थत्वात् तस्य च सामा
न्यशास्त्ररूपस्य प्राप्तो यः प्राप्तवचनस्य विरोधिनाधयुक्तपंचमीनिषेधकेन विशेषशास्त्ररूपेण हारीतवच
नेन बाधो युज्यते॥ एतादृशं बाधमभिलक्ष्यैव प्रायः प्राप्त इत्यपि चेति प्रायःशब्दः प्रयुक्तः प्रतिपन्नायेन पौर्वाह्नि
का इति वचनबलात् चतुर्थ्याम पित्र्यान्तयोः परेद्यु नानुष्ठानं प्राप्नोति स्यादिति चेत् हारीतवचने दैवे कर्मणीत्युच्य
मानं च दैवकर्मणि पूर्वाह्णस्य कर्मकालत्वात् कर्मकालशास्त्रप्राबल्यस्य च वक्ष्यमाणत्वाद् बाधो न युक्त इति शंकनीयं।
विधेर्निषेधस्य वा प्रतिपदोक्तस्य प्रबलतरत्वात्॥ न च पूर्वदिने पूर्वाह्णस्याप्यस्तमकर्मकालत्वे साकल्यवचना
पादितकर्मकालत्वस्य सद्भावादीदृशमेव विषयमभिलक्ष्य साकल्यवचनस्य प्रवृत्तत्वात्। स्वाभाविकतिथि ७०
व्याप्तियुक्ते विषये साकल्ययुक्ते विषये साकल्यवचनस्य निरर्थकत्वात्। तस्माद्दैवकर्मणि परविद्धायाः पंच

म्या निषेधो न विरुध्यते॥ नन्वेवमपि पित्र्ये कर्मण्यपराह्णव्यापिन्या ग्राह्यत्वात् निषेधो निरर्थकः। पित्र्यस्य स्वतः एव परविद्धाया
मप्राप्तत्वात्। मैवं दृष्टांततयापि च तदुपन्यासोपपत्तेः। यथा पित्र्ये कर्मण्यपराह्णविद्धाया न ग्राह्या तथा दैवेपीति विवक्षया दैवपि
त्र्योः सहोपन्यासः। ननु व्यासनिगमगतेषु ग्रंथशास्त्रमुदाहृत्य नवता पूर्वविद्धत्वं पंचम्या अभिधीयते। अपस्तंबादयस्तु त
द्विपर्ययेण युग्माग्न्यादिषु। प्रतिपत्सद्वितीया स्याद्द्वितीया प्रतिपद्युता। चतुर्थी संयुता या च सा चतुर्थी फलप्रदा। पंचमी च
प्रकर्तव्या षष्ठ्या युक्ता च नारद इति। अत एतद्युग्मशास्त्रपर्यालोचनेन पंचम्याः परविद्धत्वं प्राप्नोति। वाढं। अतएवात्र तु तत्त
स्य शास्त्रेण व्यवस्थाप्रसक्तौ तन्निषेधः हारीतेन स्वल्पपक्षेतथास्मिते इत्युक्तं। न च साध्ववस्था वचनेन निषेधस्य शक्या किंहि
वचनेन न कृपालनात् स्यादिति निषेधस्यात्। तस्माद्धारीतवचनेन पंचमी पूर्वविद्धा ग्राह्या। स्कंदपुराणेपि पंचमी
च नी च न कार्या चतुर्थी संयुता विभो। इति। तथा पद्मपुराणभविष्योत्तरपुराणयोः पूर्वोत्तरविद्धाविषयौ विधिनिषेधौ सम
र्थितौ। पंचमी तु च चतुर्थ्यां च कार्या षष्ठ्या न संयुता। इति। यत्तु अस्तंगते निहितं पंचमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारद इति व
चनात्तत्त्व दीपवद्यो स विषयतया संकोचनीयं। वाक्यशेषे तथाभिधानात्। स्कंद उपवासस्त्री कार्यो पंचमी परसंयुते तिथि
वाक्यशेषः। न चासंजातविरोधिना वाक्योपक्रमस्य संजातविरोधिना वाक्यशेषेण कथं संकोच इति शंकनीयं। अत्र संदिग्धो

पक्रमस्य प्राबल्येपि संदिग्धोपक्रमे परविद्धान्यत्र पूर्वविद्धेति स्थितं ॥ ॥इति पंचमीनिर्णयः॥ ॥अथ षष्ठीनिर्णयः॥
सा च युग्मशास्त्रद्वये न हि द्विविधा प्रतिभा×स्य वाक्यशेषेण निर्णीतत्वात् । अत एव जैमिनिनापि स्मृतं संदिग्धेषु वाक्यशे
षादिति । अतः स्कंदोपवासे पंचमी×तिन्न षण्मुन्योरिति एकं युग्मशास्त्रं तेन षष्ठ्याः सप्तमीविद्धत्वं प्रतीयते । पंचमी तु प्रक
र्तव्या षष्ठीयुक्ता तु नारदेति । अपरं युग्मशास्त्रं तेन षष्ठ्याः पंचमीविद्धत्वं प्रतीयते । तयोः शास्त्रयोः किं शुक्लकृष्णपक्षभे
देन व्यवस्था कार्या किं वा देवपित्र्यभेदेन उत स्कंदव्रतान्यव्रतभेदेन । तत्र न तावत्प्रथमः पक्षः सुमंतुनापि तद्द्वयव्यवस्था
निराकृतत्वात् देवपित्र्यभेदेन व्यवस्थापितत्वात् ॥ तथा च तद्वचनं । नागविद्धा न षष्ठी स्यात् पक्षयोरुभयोरपि । दैवे कर्मणि
नामत्यापित्र्ये पूर्वेण संयुता इति । नापि द्वितीयः । दैवपित्र्यभेदेन व्यवस्थाया अयुक्तत्वात् । तथाहि । यदेतत्सुमंतुना दैवे
कर्मणि शुक्लेतत्पक्षद्वयगतायाः षष्ठ्याः नागविद्धत्वं प्रतिषिध्यते तत्र तथास्तु । यत्तु नागविद्धायाः पित्र्ये व्यवस्थाप
नेतत्र वक्तव्यं किं पूर्वविद्धवाक्यमेकोद्दिष्टविषयं किं वा पार्वणविषयं । नोभयमप्युपपद्यते । मध्याह्नपराह्णव्याप्तिन्यासे ६८
व तयोर्निर्णीतत्वात् पूर्वविद्धताया अकिंचित्करत्वात् । न चैवं मंतव्यं परेद्युः सत्यामपि मध्याह्नापराह्णव्याप्तौ तत्परित्या
गाय पूर्वविद्धत्वविधानमिति । मुख्यकर्मकालव्याप्तेः परित्यागायोगात् । अन्यथा स्वकर्मणि यास्त्वग्रहं हरतीतिन्या

यश्रापतेत् । तर्हि सुमंतुवचनस्य का गतिरिति चेत् ॥ उच्यते । न खल्वेतद्वचनं पित्र्ये पूर्वविद्धां प्रत्याहत्तं किंतर्हि दैवे ताम्नि
वारयितुं तत्प्रवृत्तिः । तत्रार्थवादवचनेन पित्र्ये साभ्यनुज्ञायते । तत्रेयं वचनव्यक्तिः । यदि नाम कथंचित् पूर्वविद्धा भवेदद्य व
तु नाम सा पित्र्ये तिथिमूलस्य प्रायेण पितृतुष्टिहेतुत्वात् दैवे सर्वथा पूर्वविद्धा न ग्राह्येति तस्मात्तृतीयः पक्षः परिशि
ष्यते स्कंदव्रते पूर्वविद्धा व्रतांतरेषूत्तरविद्धेति । न च स्कंदषष्ठ्याः पूर्वविद्धत्वमाह वसिष्ठः नक्तोपोष्टमी स्कंदषष्ठी शिव
रात्रिश्चतुर्दशी । एताः पूर्वयुताः कार्याः तिथ्यंते पारणं भवेदिति स्कंदषष्ठी लिंगपुराणे दर्शिता । प्रत्युदाहृतमपि स्कंदाच
षष्ठ्याः कार्तिकेयस्य चादौ तृप्तिः सम्मुखी चस्या तेस्मिन्नागामि वत्सर इति । यानत्र वरविधि षष्ठी दर्शिता षष्ठ्यामुपो
ष्यविधिवत्सम्यग्भास्कं समर्चयेत् । सद्भक्त्याभोगरूपैश्चैव संप्राप्नोतीप्सितं फलमिति । फलषष्ठी मंदारषष्ठीत्यादि व्र
तानि च भविष्योत्तरे प्रोक्तानि तत्र व्रतेनरत्वादिव्रतेषु परविद्धा ग्राह्या तदुक्तं विष्णुधर्मोत्तरे । एकादश्यष्टमी षष्ठी
पौर्णमासी चतुर्दशी । अमावास्या तृतीया च ता उपोष्याः परान्विता इति । यद्यप्यत्र व्रतविशेषो नोपात्तस्तथापि स्कं
दव्रतस्य पूर्वविद्धायां विहितायां परिशेषादन्येषामुत्तरविद्धा भवति । नेषामप्याविरोधात् पूर्वविद्धास्त्विति चेत् न
प्रतिषेधात् । तथा च निगमः । नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः । कामविद्धो न वै ह्विष्णुर्नेत्रा ग्राह्यास्ते वासराः ।

नागः पंचमी। रुद्रः षष्ठी। दिवाकरः सप्तमी। कामस्त्रयोदशी। विष्णुर्द्वादशी। शिवरहस्यसौरपुराणयोः। नागविद्धा तु या
षष्ठी शिवविद्धा तु सप्तमी। दशम्येकादशी विद्धा नोपोष्या तु कदाचनेति। तथा पूर्वविद्धाप्रतिषेधात्परविद्धाविधिश्च
त्य. नेयं स्कंदे व स्कंदपुराणेपि षष्ठ्यां ... कर्तव्या सप्तमी न कदाचन। सप्तमी सपुत्रकाचो षष्ठ्यां धर्मार्थिनि
नैकेरिति। अस्त्रकैवर्तेपि न हि षष्ठी नागविद्धा कर्तव्या तु कदाचन। नागविद्धा तु या षष्ठी हन्ता पुण्यस्य या न वेत्ता।
सप्तम्या सह कर्तव्या कृता पुण्यफलप्रदेति। पुण्यस्य तत्क्षयाय स्यात्सा पुण्यस्य तथा। यदि कश्चित्तिथिक्षयवशादुत्त
रविद्धा न लभ्येत तदा स्कंदव्रतवदन्यान्यपि व्रतानि नागविद्धाया कर्तव्यानि। तदाह वसिष्ठः। एकादशी तृतीया च ष
ष्ठी चैव त्रयोदशी। पूर्वविद्धा तु कर्तव्या यदि न स्यात्परेहनीति। नागवेधश्च षण्मुहूर्तात्मकः। तथा च स्कंदपुराणे।
नागो द्वादशनाडीभिर्दिक् पंचदशभिस्तथा। भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति। ॥इति षष्ठीनिर्णयः॥
अथ सप्तमी निर्णीयते॥ ॥ संति हि सप्तम्यां नानादेवताकानि बहूनि व्रतानि। तत्र माघशुक्लसप्तमी आरोग्यकामस्य
सूर्यदैवत्यकामसमुद्धिकरणे सप्तमीव्रते तथा भविष्यपुराणे सूर्यदेवताकं विजयसप्तमीव्रतमुक्तं। सूर्यदेवताक
मारोग्यसप्तमीव्रतं वाराहपुराणे विहितं। विष्णुदेवताकं मंगल्यव्रतं गरुडपुराणे विहितं। एवमन्यान्यप्युदाहर

णीयानि। तत्र कश्चित्तिथयो देवताभेदेन व्रतभेदे भिद्यमाना लक्ष्यन्ते तद्यथा स्कंदषष्ठी पूर्वविद्धा ... षष्ठी परविद्धा कश्चित्त
त्यसमयेकस्यां देवतायां व्रतभेदेन व्यवतिष्ठंते। तद्यथा गौरीव्रते चैव रंभातृतीया पूर्वविद्धा ... तृतीया परविद्धा। कश्चि
त्तिथयो देवताभेदे व्रतभेदे ... न व्यवतिष्ठंते। तद्यथा दिनाद्यकव्रते ... पूर्वविद्धा ...
दुर्व्यापिनी ग्राह्या ... एकादश्यां ... भेदेन व्यवतिष्ठंते तद्यथा शुक्लप्रतिपत् पूर्वविद्धा ... प्रतिपत्परविद्धेति। तत्र
केनाप्यनेन सप्तमी व्यवस्थापनीयेति चिंतायां न केनापीति प्रतिजानीमहे। सप्तम्याः पूर्वविद्धानिंदकस्योत्तरविद्धाविधा
यकस्य वचनस्य कस्यचिददर्शनात्। तद्विपर्ययेण पूर्वविद्धाविधायकस्योत्तरविद्धानिषेधकस्य सर्वत्रोपलंभात्
सर्वासु देवतासु सर्वेषु व्रतेषु शुक्लकृष्णयोः पक्षयोः तयोरपि सर्वा सप्तमी पूर्वविद्धैव ग्राह्या युग्मादिशास्त्रेणानु
न्यारित्यभिधानात्। स्कंदपुराणेपि सप्तमी च न कर्तव्या ... सर्वदा। षष्ठ्या तु सप्तमी यत्र तत्र संनिहितो रविरि
ति भविष्यत्पुराणब्रह्मपुराणयोः। षष्ठी तु सप्तमी ... संमाश्रिते। पूर्वविद्धा हि ... कर्तव्या सप्तमी
तिथिरिति पैठीनसिः। पंचमी सप्तमी चैव दशमी च त्रयोदशी। प्रतिपन्नवमी चैव कर्तव्या संमुखी तिथिरिति॥
उत्तरविद्धाप्रतिषेधः स्कंदपुराणे दर्शितः। षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाष्टमी। सप्तमी परविद्धा च नोपो
ष्या तिथिपंचकमिति। न च वचनविशेषेणाप्युत्तरविद्धायामाशा कर्तव्या। तदुक्तं ब्रह्मकैवर्ते सप्तमी नाष्टमीयुक्ता

न सप्तम्यां युताष्टमी॥ सर्वेषु व्रतकल्पेषु अष्टमी परतः शुभेति। यदा पूर्वेद्युस्त्रिमुहूर्तपर्यंता षष्ठी परेद्युस्तिथिक्षयवशेन सप्तम्या
दर्वाग् अष्टमी त्रिमुहूर्ता तदा पूर्वविद्धाया अलाभादुत्तरविद्धायाश्च प्रतिषिद्धत्वात् कुत्रानुष्ठानमिति चेत्। निषेधस्तु सत्या
मुत्तरविद्धायामनुष्ठानमिति ब्रूमः। यद्यप्यस्मिन्नर्थे वचनं नोपलभ्यते तथापि निषेधविधिलोपस्यान्याय्यत्वादुत्तरविद्धा गौण
कालत्वेन स्वीकर्तव्या॥ अस्ति चात्र दृष्टान्तः स्कन्दव्यतिरिक्तव्रतेषु पूर्वविद्धायाः षष्ठ्या निषेधमुल्लंघ्य यदि न स्यात्
रहनीति वाक्येन परविद्धा गृहीता तथा रंभाव्यतिरिक्तगौरीव्रतेषु द्वितीयायुता स्वीकृता तेन न्यायेनाप्यष्टमी
विद्धायाः स्वीकारोस्तु॥ ॥इति सप्तमीनिर्णयः॥ ॥अथाष्टमी निर्णीयते॥ द्विविधो हि तत्र निर्णयः॥ व्रतसामा
न्यविषयो व्रतविशेषविषयश्चेति॥ व्रतसामान्ये तु शुक्लकृष्णपक्षभेदाद्व्यवतिष्ठते तत्र शुक्लाष्टमी परा। अत एव
युग्मान्योर्वसुरंध्रयोरिति शास्त्रात् यद्यप्येतच्छास्त्रं पक्षद्वयसाधारणमिति वक्तुं प्रस्तावे प्रतिष्ठापितं तथापि शास्त्रां
तरबलाच्छुक्लपक्षे पर्यवस्यति तथा च निगमः शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी। पूर्वविद्धा न कर्तव्या कर्त
व्या परसंयुता। उपवासादिकार्येषु धर्म एष सनातन इति ब्रह्मवैवर्ते सप्तमी नाष्टमी युक्ता न सप्तम्या युताष्ट ७०
मी। सर्वेषु व्रतकल्पेषु अष्टमी परतः शुभेति पद्मपुराणेपि। नाष्टमी सप्तमी युक्ता सप्तमी नाष्टमी युता। नवम्या

सह कार्या स्यादष्टमी नात्र संशय इति। स्कंदपुराणेपि। अष्टमी नवमीमिश्रा कर्तव्या भूतिमिच्छता॥ सप्तम्या चाष्टमी
चैव न कर्तव्या शिखिध्वजेति। तान्येतानि ब्रह्मवैवर्तादिवचनानि यद्यपि पक्षद्वयसाधारण्येन पूर्वविद्धानिषेधमुत्तर
विद्धाविधिं च वदंति तथापि पूर्वोदाहृतनिगमानुसारेण शुक्लपक्षविषयतया योजनीयानि तथा शुक्लपक्षाभिप्रायेणै
व पूर्वविद्धाप्रतिषेधः तिथौ ब्राह्मे। नागविद्धा तु या षष्ठी नानुविद्धा महेश्वर। चतुर्दशी कामविद्धा तिस्रः स्युर्मलि
नाः स्मृता इति। स्कंदपुराणेपि। नागविद्धा तु या षष्ठी सप्तम्या तु यदाष्टमी। भूतविद्धा अमावास्या न ग्राह्या मुनि
पुंगवैरिति। तथा शुक्लपक्षमेवाभिप्रेत्योत्तरविद्धाविधौ पठितो विष्णुधर्मोत्तरे। एकादश्यष्टमी षष्ठी शुक्लपक्षे चतु
र्दशी। अमावास्या तृतीया च ता उपोष्याः परान्विता इति। शंकरगीतायां तु साक्षादेव शुक्लपक्षे परविद्धा वि
हिता। एकादश्यष्टमी षष्ठी शुक्लपक्षे चतुर्दशी। एताः परेण संयुक्ताः पराः पूर्वेण संयुता इति। कृष्णपक्षे तु
पूर्वविद्धाविधिरुत्तरविद्धानिषेधो निगमे पठ्यते। कृष्णपक्षेष्टमी यत्र कृष्णपक्षे चतुर्दशी। पूर्वविद्धा तु कर्त
व्या परविद्धा न कस्यचित्। उपवासादिकार्येषु एष धर्मः सनातन इति। नारदीयेपि। कृष्णाष्टमी तथा रंभा
तृतीया वटपैतृकी। बृहत्तपा तथा भस्त न कर्तव्या संमुखी तिथिरिति। अत्राष्टम्याः शुक्लकृष्णपक्षव्यवस्थास

मान्येन सर्वव्रतविषयाव्रतविशेषस्यानुपादानात्। व्रतानि वीरादिकृयंते। तत्र वामनपुराणे। नभोमासे तु कृष्णाष्ट
म्यां कालाष्टमीव्रतं परिकीर्तितं विष्णुधर्मोत्तरे। जन्मनक्षत्रसंयुता नाष्टमीव्रतं तेषां दुर्नयं ययोः कारी। त्या पूर्वविद्धायामनुष्ठेयं देवी
पुराणे श्रावणमासे शुक्लाष्टम्यां देवीव्रतं गारुडपुराणे शुक्लाष्टम्यां नृसिंहव्रतं एतद्द्वयमुत्तरविद्धायामनुष्ठेयं एव
मन्यान्यप्युदाहरणीयानि। व्रतविशेषादष्टमीनिर्णयो द्विविधः। व्रतविशेषमात्रोपाधिकैकेन प्रवृत्त एकः। नक्षत्रादियो
गव्रतविशेषैश्चोपाधिका व्यपरस्तोपरः। तत्र दूर्वाष्टमीव्रतमाद्यः। कश्चिद्व्रतविशेषो भविष्यपुराणे पठ्यते। व्रतं तु भाद्रपदे मा
सि शुक्लाष्टम्यामुपोषितः। महेश्वरी पूजयेद्यस्तु दूर्वया सहितं मुने इत्यस्मिन्व्रतविशेषे शुक्लपक्षवर्तित्वेनोत्तरविद्धा यात्रा
प्रायामपवादमाह नारदः। धन्याः शुक्लाष्टमी दूर्वा सावित्री वटपैतृकी। अनेनगात्रयोदशी रंभाकर्त्तव्या संमुखी तिथिरिति।
पद्मपुराणेपि। श्रावणी दौर्गनवमी तथा दूर्वाष्टमी च या। पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति। तथा शिवरात्रिम
होत्सवो नाम कश्चिद्व्रतविशेषस्तस्य पूर्वन्यायेन शुक्लपक्षव्यवस्थायां बाधायां तदपवादः पद्मपुराणे पठ्यते। अ
ष्टमी नवमीविद्धा नवम्या चाष्टमीयुता। अर्धनारीश्वरप्राया उमामाहेश्वरी तिथिः। अष्टमीनवमीयुग्मे महोत्साहे महो
त्सवः। शिवशक्त्योः शिवक्षेत्रे पक्षयोरुभयोरपीति। महानुत्साहो यस्मिन्निति बहुव्रीहिः। तत्पदं तिथियुग्मस्य क्षेत्रस्य ७१
वा विशेषणं। यदा तिथियुग्मस्य विशेषणं तदा तादृशी तिथियुग्ममुपलक्ष्य सूर्यग्रहणाधोदयादाविव मनस्यु

त्साहं प्राप्य देवतोत्सवः कर्त्तव्य इत्युक्तं भवति। यदा तु क्षेत्रविशेषणं तदा काशी श्रीगिर्यादौ यस्मिन् क्षेत्रे मनस्युत्साहो जायते तत्रोत्स
वः कर्त्तव्य इत्युक्तं भवति। नक्षत्रादियोगव्रतविशेषोपाधिको निर्णय उदाहृयते।। स्कंदपुराणे व्रतविशेषः पठ्यते। मासि भाद्रपदे शुक्लेप
क्षे ज्येष्ठर्क्षसंयुता। यस्मिन्कस्मिन्दिने कुर्यात् ज्येष्ठायाः परिपूजनमिति। तस्य ज्येष्ठाव्रतस्य नक्षत्रयोगवशेनाष्टमी गृहीतव्या। नाष्ट
मी सप्तमीविद्धा सप्तमी नाष्टमीयुता।। नवम्या सह कार्या स्यादष्टमी नात्र संशयः। मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता।। रा
त्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति।। अयमर्थः अष्टम्या नक्षत्रयोगाभावे शुक्लपक्षवर्त्तित्वात्परेवाष्टमी ग्राह्या।।
यदा तु पूर्वदिने रात्रौ नक्षत्रयोगो भवति तदा पूर्वविद्धा ग्राह्या। सोयं शुक्लपक्षयुक्तस्य सामान्यशास्त्रस्य नक्षत्रविशेषशास्त्रेणापवा
द इति। योयं पूर्वदिने रात्रौ नक्षत्रयोगः सोपि क्वचिदपोद्यते। तथा च स्कंदपुराणे। यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः।।
तस्मिन्नहनि पूजा च न पूर्णा चेत्पूर्वदासर इति। अत्र केवलतिथितो नक्षत्रयोगस्य प्राशस्त्यात्केवलतिथिप्रयुक्तं निर्णयमपो
ह्य यथा नक्षत्रप्रयुक्तो निर्णय आदृतस्तथा नक्षत्रयुक्ततिथौ वारविशेषयोगस्य ततोपि प्राशस्त्यात्तेन योगेन निर्णयः कर्त्तव्यः
एतदेवाभिप्रेत्य स्कंदपुराणे पठ्यते ततोष्टम्यां यदा वारो भानोर्ज्येष्ठर्क्षमेव च। नीलज्येष्ठेति सा प्रोक्ता दुर्लभा बहुकालिकेति। त
देवं त्रिधा निर्णयः संपन्नः। नृसिंहव्रतं संतानाष्टमीव्रतादौ शुक्लकृष्णभेदेन निर्णयः।। दूर्वाष्टम्यां व्रतविशेषेण निर्णयः।।
नीलज्येष्ठाष्टम्यां योगविशेषेण निर्णय इति।। तदेतन्निर्णयत्रयं स्पष्टीकृत्य जन्माष्टमी विचार्यते।। सा किं पक्षत्रेदेन भिद्ये

तव्याप्तत व्रतविशेषेणाहोस्विद्योगविशेषेणेति॥ अत्रैवेदमपरं चिंत्यते किं जन्माष्टमीमेव जयंतीव्रतं उत ता
नयोर्भेद इति॥ तथान्यच्चिंतनीयं। किं तिथ्यंतरवदहर्वेध उत मध्यरात्रवेध इति॥ प्रथमं व्रतस्वरूपे निश्चिते पश्चादस्मि
न्व्रते कीदृशी तिथिरित्याकांक्षोदेति॥ तिथौ च पूर्वविद्धत्वेन परविद्धत्वेन वा निश्चितायां पश्चात्कीदृशो वेध इत्याकांक्षा तस्मा
दादौ व्रतं निश्चीयते। जन्माष्टमीजयंतीशब्दाभ्यां व्यवह्रियमाणं व्रतमेकमेवेति तावत्प्राप्तं॥ कुतः। रूपाभेदाभावात्। यथा
यागस्य द्रव्यदेवते स्वरूपं यथा चोपासनस्य गुणविशेषयुक्ता देवता॥ तथा च तच्चविधायां वेघं तत्स्वरूपं तथा व्रते नियम
विशेषः स्वरूपं नियमश्चात्रोपवासो जागरणं कृष्णपूजा चंद्रार्घदानमित्यादिलक्षणः स चोभयत्र न भिद्यते। अथो
च्येत। रूपाभेदेपि नित्यकाम्ययोरिव भेदो भविष्यतीति नित्या जन्माष्टमी अकरणे प्रत्यवायस्मरणात्। तथा च स्मर्यते। गश्रमं
संखगं काकं श्येनं च मुनिसत्तम॥ मांसं वा द्विपदां भुक्ते कृष्णजन्माष्टमीदिने॥ जन्माष्टमीदिने प्राप्ते येन भुक्तं द्विजोत्तम॥
त्रैलोक्यसंभवं पापं तेन भुक्तं द्विजोत्तमेति॥ भविष्यपुराणे श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतं। न करोति नरो यस्तु
भवति क्रूरराक्षस इति॥ कृष्णजन्माष्टमीं त्यक्त्वा योन्यद्व्रतमुपासते॥ नाप्नोति सुकृतं किंचिद्दृष्टमन्यत्तमथापि वा॥ ७२
वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतं॥ न करोति महामोहा व्याली भवति कानने इति॥ स्कंदपुराणेपि॥ ये न कुर्वंति
जानंतः कृष्णजन्माष्टमीव्रतं॥ ते भवंति नराः प्राज्ञ व्याला व्याघ्राश्च कानने इति॥ रटंतीह पुराणानि भूयो भूयो महामुने॥

अतीतानागतं तेन कुलमेकोत्तरं शतं॥ पातितं नरके घोरे भुंजता कृष्णवासरे इति। जयंती च काम्या फलविशेषस्मरणात्॥ विष्णुधर्मोत्तरे।
जयंती ब्रह्मत्वपद्यते। यद्बाल्ये यच्च कौमारे यौवने वार्धके तथा। बहुजन्मकृतं पापं हंति सोपोषिता तिथिरिति। वह्निपुराणे
पिमप्रजन्मकृतं पापं राजन्य त्रिविधं नृणां॥ तत्क्षालयति गोविंदस्तिथौ तस्य सुभावितः। उपवासश्च तत्रोक्तो महापातक
नाशनः। जयंत्यां पृथिवीपाल विधिना नात्र संशय इति। पद्मपुराणेपि। प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः॥ यैः
कृता श्रावणे मासि अष्टमी रोहिणीयुता॥ किं पुनर्बुधवारेण सोमेनापि विशेषत इति। स्कंदपुराणे। महाजयार्थं कुरु तां ज
यंतीं मुक्तये नघ। धर्ममर्थं च मोक्षं च कामं च मुनिपुंगव इति॥ ददाति वांछितानर्थान्नानार्थं नाति दुर्लभमिति। भविष्योत्तरे
जयंतीकल्पमतिवर्षं विधानेन महद्भक्तो धर्मनंदन। नरो वा यदि वा नारी यथोक्तफलमाप्नुयात्। पुत्रसंतानमारोग्यं सौभाग्य
मतुलं भवेत्। इह धर्मरतिर्भूत्वा मृतो वैकुंठमाप्नुयात्। एकं जन्माष्टम्या अकरणे प्रत्यवायात्। जयंत्याः फलविशेषेण
चोभयोः क्रमेण नित्यत्वं काम्यत्वं चाभ्युपेतव्यमिति। मैवं। गुणफलाधिकत्वाभ्युपगमेपि जयंत्याः फलविशेषो चोप
पत्तेः। गोदोहनदध्यादि तत्र दृष्टांतः। चमसेनापः प्रणयेत् गोदोहनेन पशुकामस्येति नित्ययोर्दर्शपूर्णमासयोरपाम्प्रण
यनं विधाय तदेवाश्रित्य पशुफलाय गोदोहनपात्रं विहितं दध्नेन्द्रियकामस्येति। अत्र यथैव प्रकृते नित्याश्रितेन फला
य दधि विधीयते। एवं नित्यां जन्माष्टमीमाश्रित्य फलविशेषाय जयंती नामकं रोहिणीयोगो विधीयते। ननु रोहिणी
लक्षणस्य कालविशेषस्यानुपादेयत्वाद्विधेयत्वं शंकनीयं। कालविशेषस्य स्वरूपेण पुरुषैरनुत्पाद्यत्वेप्युष्ट

नांगत्वेंशास्त्रेणावगत्यार्थमनुष्ठानाय तत्रातीन्द्रियार्थः कर्तुंशक्यत्वात्।अन्यथावसंतेज्योतिषायजेतेत्यादिकःसर्वोपि
कालविधिर्लुप्येत।रोहिणीयोगस्यजयंतीनामकत्वंजयंतीलक्षणप्रतिपादकैःस्मृतिवाक्यैरध्यवसेयं।तानिचवाक्या
न्युदाहरामः।विष्णुधर्मोत्तरे।रोहिणीचयदाकृष्णपक्षेष्टम्यांद्विजोत्तम।जयंतीनामसाप्रोक्तासर्वपापहरातिथिरिति।
सनत्कुमारसंहितायां।शृणुष्वावहितोराजन्कथ्यमानंमयानघ।श्रावणस्यचमासस्यकृष्णाष्टम्यांनराधिप।रोहिणी
यदिलभ्येतजयंतीनामसातिथिरिति।स्कांदेप्राजापत्येनसंयुक्ताअष्टमीतुयदाभवेत्।श्रावणेबहुलेसातुसर्वपा
पप्रणाशिनी।।जयंपुण्यंचकुरुतेजयांपुण्यांचतांविदुरिति।विष्णुरहस्येअष्टमीकृष्णपक्षस्यरोहिणीऋक्षसंयुता।।
नवेत्प्रोष्ठपदेमासिजयंतीनामसास्मृतेति।पौर्णमास्यंतेषुस्वीकृतेषुश्रावण्यांपौर्णमास्यांश्रावणमासस्यसमाप्तत्वा
दुपरितनीप्रतिपदमारभ्यभाद्रपदमासइत्यभिप्रेत्यप्रोष्ठपदइत्युक्तं।विष्णुधर्मोत्तरेप्राजापत्यर्क्षसंयुक्ताकृष्णा
नभसिचाष्टमीसोपवासोहरेःपूजांकृत्वातत्रनसीदतीति।वसिष्ठसंहितायां।श्रावणेवानभस्येवारोहिणीसहि
तीसहिताष्टमी।यदाकृष्णानरैर्लब्धासाजयंतीतिकीर्तिता।श्रावणेनभवेद्योगोनभस्येतुभवेध्रुवं।तयोरन्या
वेयोगस्यतस्मिन्वर्षेनसंपदइति।अत्रश्रावणइतिमुख्यःकल्पःनभस्यइत्यनुकल्पः।यदिश्रावणेयदिवानभस्ये ३२
सर्वथापिरोहिणीकृष्णाष्टमीयोगोजयंतीत्येतदविवादं।पुराणांतरेरोहिण्यांसायदाकृष्णपक्षेष्टम्यांद्विजोत्तम।
जयंतीनामसाप्रोक्तासर्वपापहरातिथिरिति।तदेवमेतैःस्मृतिवाक्यैर्जयंत्याःकृष्णाष्टमीरोहिणीयोगस्वरूपेस

तिपूर्वोदाहृतफलकामिनस्तादृशोयोगोगोदोहनदध्यादिवद्गुणत्वेनविधीयते।काम्येतुज्योतिष्टोमेगुणविशेषोनकोपिफ
लायविहितः।अतःकाम्यज्योतिष्टोमेवैषम्याद्गोदोहनदध्यादिसाम्यात्पूर्वोदाहृतफलवाक्यानिप्रवृत्तेनित्येजन्माष्टमीव्रते
गुणफलप्रतिपादकत्वेनोपपद्यंते।तथासतियथादर्शपूर्णमासाभ्यामन्यःकश्चित्पशुफलकोगोदोहनसंज्ञकोयागोनास्तिकिं
तुगुणएवकेवलंगोदोहनंतथानजन्माष्टमीव्रतादन्यज्जयंतीव्रतंकिंप्रवृत्तएवव्रतेफलायगुणविधिरित्येवंप्राप्तेब्रूमः।
व्रतद्वयमिदंभवितुमर्हति।कुतः।नामभेदान्निमित्तभेदाद्रूपभेदात्पुरुषमिश्रत्वभेदान्निर्देशभेदाच्च।तथाहिपूर्वोदाहृतेषु
करणेप्रत्यवायप्रतिपादकस्मृतिवाक्येषुजन्माष्टमीव्रतमित्येवनामव्यवहृतंतथापूर्वोदाहृतेषुजयंतीव्रतमितिनाम
व्यवहारः।नामभेदाच्चकर्मभेदोज्योतिरधिकरणेव्यवस्थितः।अस्यचाधिकरणस्यसंग्राहकमेवेतौश्लोकौभवतः।अथैव
ज्योतिरित्यत्रगुणोवाकर्मवापृथक्।गुणःसहस्रदानात्माज्योतिष्टोमेविधीयते।अथेतिप्रकृतेच्छिन्नएतच्छब्दोगवांवदेत्।
संख्यायेवान्यकर्मत्वमुत्पत्तिगतसंज्ञयेति।अयमर्थः।अथैषज्योतिरथैषविश्वज्योतिरथैषसर्वज्योतिरेतेनसहस्रदक्षि
णेनयजेतेतिश्रुतंतत्रसंशयः।किंप्रकृतएवज्योतिष्टोमेसहस्रदक्षिणाख्यगुणविधिःउतयागांतरविधिरिति।एषज्योति
रेतेनेत्येतावन्मात्रेतच्छब्दाभ्यांप्रकृतंज्योतिष्टोममनूद्यतत्रगुणविधिरितिपूर्वपक्षः।अथेतिरथोतकेनाथशब्देनप्रकृ
तस्यज्योतिष्टोमस्यविच्छेदःक्रियतेएतच्छब्दश्चप्रत्यासन्नंब्रूतेप्रत्यासत्तिश्चद्विविधाअतीताआगामिनीचेतितत्रातीतायाः
प्रत्यासत्तेर्विच्छेदेसत्यागामिप्रत्यासत्तिपरत्वेनैतच्छब्दोनुपपन्नः।अथाप्येककर्मत्वंमाभूत्कर्मभेदेतुकिंप्रमाणमिति

वेत्। अपूर्वसंज्ञेति। एवं रामः। एषज्योतिरित्यस्मिन्नुत्पत्तिवाक्ये पूर्वप्रकृतिकर्मविशेषायां ज्योतिष्टोमसंज्ञायां अन्याज्यो
तिरित्येषा संज्ञा श्रूयते। तत्र यथा पूर्वाधिकरणे सप्तदश प्राजापत्यान्पशूनालभत इत्यत्रोत्पत्तिवाक्यगतया संज्ञया त्वया
कर्मभेदो निरूपितः। तथात्राप्युत्पत्तिगतयानूतनसंज्ञया कर्मभेदोऽभ्युपगंतव्य इति। एवं च सति प्रकृतेऽप्यनेन न्या
येनोत्पत्तिवाक्यगताभ्यां जन्माष्टमीव्रतजयंतीसंज्ञाभ्यां व्रतभेदोऽभ्युपगंतव्यः। तथा निमित्तभेदादपि व्रतभेदः। जन्माष्टमीव्र
ते तिथिरेव निमित्तं जयंतीव्रते तु रोहिणीयोगः। ननु जन्माष्टम्यामस्मिन्नपि व्यवहारे योग एवादिविहितव्यः। न तत्र पुत्रा
यानेव तिथौ देवकीनंदनस्योत्पत्तेः। मैवं। तत्र अष्टम्या एव प्रधानप्रयोजकत्वात् रोहिणीतद्योगयोर्विद्यमानयोरपि
बुधवारादिवदुपलक्षणत्वात्। अत एव शास्त्रेषु सर्वेषु जन्माष्टमीत्येव समाख्यायते। अन्यथा जन्मरोहिणीति वा जन्म
योग इति वा समाख्यायेत। न तत्सद्भावमात्रेण प्रयोजकत्वे बुधवारेऽपि प्रयोजकत्वं स्यात्। अस्त्विति चेत्। न। अतिप्रसं
गात्। जन्मकाले ह्यपरावसानस्य संवत्सरविशेषस्य च सद्भावेन तयोरपि प्रयोजकत्वं केन वार्येत। तस्माज्जन्मन्यष्टम्या एव
प्राधान्यं तत्प्राधान्ये श्रुतिलिंगादिषु षट्सु समाख्यारूपं षष्ठं प्रमाणमनुपपन्नं वेदितव्यं। तथा प्रत्यक्षादिषु संभवे
ति स्यात्तेष्वष्टसु प्रमाणेष्वैतिह्यरूपमागमरूपं वा प्रमाणमनुकूलं भवति। ननु निरर्थकोऽयं वाग्जाललक्षणः को ७४
लाहलः। एकमेव व्रतं यदि वा व्रतद्वयमुभयथाप्यनुष्ठाने को नाम महानतिशयः स्यात्। उच्यते। अस्त्येव महा
नतिशयः। यस्मिन्संवत्सरे श्रावणबहुलाष्टमीं परित्यज्यान्यस्मिन्नवम्यादौ रोहिणी भवति तस्मिन्संवत्स

रे जयंतीस्वरूपेणैव नास्तीत्यतो जयंतीव्रतस्य तत्राप्राप्तत्वात्तस्यैव जन्माष्टमीव्रतत्वेऽपि तदपि न प्राप्नुयात्। भेद
पक्षे तु असत्यामपि जयंत्यां जन्माष्टमीव्रतं तत्र प्रवर्तते। तदुत्पत्यमनुष्ठानेति न्यायः। ननु एवं चेत्तथापि नोपपन्नो निमि
त्तभेदो व्रतभेदमावहति कर्मभेदहेतुषु शब्दांतराभ्याससंख्यागुणप्रक्रियानामधेयेषु षट्सु प्रमाणेषु निमि
त्तस्यानंतर्भावादिति चेत्। मैवं। तथाहि। पूर्वोक्तसंज्ञाभेदस्योपादितं व्रतभेदं निमित्तभेदो दृढयति तस्माद
प्रनिमित्तभेदाद्व्रतभेदः। तथा रूपभेदादपि व्रतभेदोऽवगंतव्यः। रूपभेदस्य कर्मभेदहेतुत्वमामिक्षाधिकार
णे निर्णीतं तस्य चाधिकरणस्य संग्राहकाविमौ श्लोकौ भवतः। गुणः कर्मांतरं वास्या वाजिभ्यो वाजिनं त्विति। गु
णो देवानपेक्षत्वात्। तत्र पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रुतौ। अत्र दधिसंबंधा
त्क्षीरनीरयोर्विभेदे सति योऽघनीभूतः क्षीरांशः सामिक्षा तस्याश्च विश्वे देवा देवता। तत्र पृथग्भूतं नीरं तद्वा
जिनं तस्य च वाजिनो देवताः। तत्र चामिक्षाद्रव्यकं विश्वेदेवदेवताकमेकं कर्म तथा सति किमनुपरितनेन वा
जिभ्यो वाजिनमित्यनेन वाक्येन पूर्वस्मिन्नेव कर्मणि वाजिनं गुणो विधीयते। उत कर्मांतरं विधीयते इति संशय

यः। तत्र वाजोन्नमामिक्षा सा येषां विश्वेषां देवानामस्ति ते वाजिन इति व्युत्पत्त्या प्राप्तां देवतामनूद्य वाजिन
गुणो विधीयते सन्वामिक्षया सह विकल्प्यते समुच्चीयते वेति पूर्वपक्षः। उत्पत्तिशिष्टामिक्षागुणावरुद्धस्य
कर्मणो गुणाकांक्षाभावाद्वाजिनस्य तत्र प्रवेशासंभवे सत्यनुपपन्नो वाजिनो गुणो वाजिशब्दार्थस्य प्रत्न तदेव
ताव्यतिरिक्तदेवत्वं कल्पयित्वा कर्मभेदः पर्यवस्यतीति राद्धान्तः। अत्र यथा द्रव्यदेवतालक्षणस्य यागरूपस्य
भिन्नत्वात्कर्मनिर्देशस्तथा प्रकृतेपि रूपभेदात्कृतभेदोऽभ्युपगम्यतां। उपवासमात्रं जन्माष्टमीस्वरूपं तदुत्पत्ति
वाक्ये तन्मात्रस्य प्रतीयमानत्वात्। ननु जयंतीव्रत एवोपवासं ज यदि तूत्पत्तिवाक्यं स्मर्यते। ननु जन्माष्ट
मीव्रते। बाढं। तथाप्यत्र विधिरुन्नेतव्यः। अन्यथा भोजने प्रत्यवायस्मरणानुपपत्तेः। स चोन्नीयमानो वि
धिरुपवासमात्रविधत्ते न तु मंडपनिर्माणजागरणप्रतिमादानादिकं। विधेरुन्नयनहेतुभूतकरणे प्रत्यवा ७५
यवाक्ये भोजननिषेधमात्रस्मरणात्। न हि तत्र निशायां दानाभावे प्रत्यवायः स्मर्यते। अत उपवासमा
त्रं तस्य स्वरूपं न तु दानादिकं। अत एवाकरणे प्रत्यवायवाक्यशेषे जयंतीप्रयुक्तदानादीनां काम्यत्वं तत्र ये

केवलश्चाद्युपवासविशेषणत्वेन पठ्यते। केवलेनोपवासेन तस्मिन्जन्मदिने मम। सप्तजन्मकृतात्पापान्मुच्यते ना
त्र संशय इति॥ तस्माज्जन्माष्टमीव्रतस्योपवासमात्रं स्वरूपं। यद्यपि शिष्टास्तत्रापि जागरणदानादिकमनुतिष्ठंति
अनुतिष्ठंतु नाम। अविरुद्धः। वपुष्येव विशेषे व्रतस्योपोद्बलमसंभवात्। शास्त्रेण तु ज्ञापितमुपवासमात्रं। जयं
तीव्रतस्य तु दानादिसहितमुपवासः स्वरूपं तद्विधायके तु शास्त्रे तथा विधानात्। तथा च पुराणे। उदये दे
वकीसूनोर्जयंतीसंभवव्रते। कर्त्तव्यं वित्तमानेन भक्त्या भक्तजनेरपीति भविष्योत्तरेपि। मासि भाद्रपदेष्टम्यां निशी
थे कृष्णपक्षगे। शशांके वृषराशिस्थे ऋक्षे रोहिणिसंज्ञके। योगेस्मिन्वसुदेवाद्धि देवकी मामजीजनत्। तस्मा
न्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः। ब्राह्मणान्भोजयेद्भक्त्या ततो दद्याच्च दक्षिणां॥ हिरण्यं मेदिनीं गावो वा
सांसि कुसुमानि च। यद्यदिष्टतमं तत्तत्कृष्णो मे प्रीयतामिति। भविष्यद्विष्णुधर्मोत्तरयोः। जयंत्यामुपवासश्च
महापातकनाशनः। सर्वैः कार्यो महाभक्त्या पूजनीयश्च केशव इति। वह्निपुराणेपि कृष्णाष्टम्यां भवेद्यत्र कलैका
रोहिणी यदि। जयंती नाम सा प्रोक्ता उपोष्या सा प्रयत्नत इति। स्मृत्यंतरेपि। प्राजापत्यर्क्षसंयुक्ता श्रावण

स्यासिताष्टमी॥ वर्षे वर्षे तु कर्तव्या तुष्ट्यर्थं चक्रपाणिन इति॥ नारदीयसंहितायां जयंतीं प्रकृत्य स्मर्यते। उपोष्य
जन्मचिह्नानि कुर्याज्जागरणं तु यः। अर्धरात्रयुताष्टम्यां सोश्वमेधफलं लभेदिति। एवमेतेषु विधिवाक्ये
षु दानादियुक्त एवोपवासो जयंतीव्रतरूपत्वेन प्रतीयते अतो रूपभेदाद्व्रतभेदः। तथा तु ध्वनिश्रवणे स्यादपि
दृष्टव्यः। अकरणे ऽप्रत्यवायस्मरणात् शुद्धं नित्यं जन्माष्टमीव्रतं। करणे फलविशेषस्मरणात्। अकरणे प्रत्यवा
यस्मरणाच्च नित्यत्वेन काम्यत्वेन च मिश्ररूपं जयंतीव्रतं। तत्र फलवाक्यानि पूर्वपक्ष एव प्रसंगादुदाहृ
तानि॥ अकरणे प्रत्यवायश्च जयंतीं प्रकृत्य कस्मिंश्चित्पुराणे स्मर्यते। अकुर्वन्याति नरकं यावदिंद्राश्चतु
र्दशेति। स्कंदपुराणेपि। श्रद्धाहीनेन तु यस्मात्पंक्त्या बहुत्वस्य भोजने। तत्पापं लभते कुंति जयंतीविमुखो नरः।
ब्रह्मघ्नस्य सुरापस्य गोवधे स्त्रीवधेपि च। न लोको यदुशार्दूल जयंतीविमुखस्य च। क्रियाहीनस्य मूर्खस्य ७९
परान्नं भुंजतोपि वा। न लभत्यस्य लोकोस्ति जयंतीविमुखस्य च। न करोति यदा विष्णोर्जयंतीसंभवव्रतं।
यमस्य वशमापन्नः सहते नारकीं व्यथां॥ जयंतीवासरे प्राप्ते करोतु दस्मरलीं। संपीड्यते तिमात्रं तु यम

दूतैः कलेवरं॥ यो भुंजीत विमूढात्मा जयंतीवासरे नृपेति॥ तैस्तैरकरणप्रत्यवायवाक्यैर्नित्यत्वं च जयंत्याः॥
न चैवमुक्तैरकरणप्रत्यवायवाक्यैः केवले नोपवासेनेति पापक्षयवाक्याच्च जन्माष्टमीव्रतमपि नित्यकाम्यं
स्यादिति वाच्यं॥ पापक्षयफलत्वमात्रेण काम्यत्वे संध्यावंदनादेरपि काम्यत्वप्रसंगात्॥ अतः सत्यपि पापक्षये
फलं तेषामकरणे न केवलनित्यं च जन्माष्टमीव्रतस्य युक्तं। ततः केवलमिश्रत्वेन स्वरूपभेदः॥ तथा निर्देशभेदाद
पि व्रतभेदो द्रष्टव्यः। निर्देशभेदश्च तत्तद्वाक्येषु दृश्यते॥ जन्माष्टमी जयंती च शिवरात्रिस्तथैव च॥ पूर्वविद्धैव क
र्तव्या तिथिभांते च पारणमिति वचनात्॥ यत्र जन्माष्टमी रोहिणीति वै पाठस्तत्रापि रोहिणीशब्देन तद्युक्ता ति
थिर्विवक्षिता न केवलरोहिणी॥ तस्मिन्वाक्ये निर्दिष्टयोः पूर्वेत्तरयोर्जन्माष्टमीशिवरात्र्योस्तिथिबोधके
कमेव यतस्तयोर्निर्देशभेदो नोपपद्यते। ननु व्रतभेदेप्यस्ति दोषः। यदा दिनद्वयेऽष्टमी वर्तते रोहिणी चोत्तरदि
न एव तदा पूर्वदिने जन्माष्टम्युपवासः परेद्युर्जयंत्युपवासः इति नैरंतर्येणोपवासद्वयप्रसक्तेः प्रसक्तौ तां
नाम प्रमाणवचनादिति चेत्। न। परदिने भोजनोपवासलक्षणविरुद्धधर्मप्रसंगात्॥ उपवासस्यांगं पार

णमिति हि वक्ष्यते॥ तथा च जन्माष्टम्युपवासांगस्य पारणस्य जयंत्युपवासस्यैकत्र प्राप्तिः सोयमेको दोषः॥
व्यतिरेकासंभवाख्यमपरो दोषः। तथा हि यथा जयंती व्यतिरिक्ता जन्माष्टमी लभ्यते तथा जन्माष्टमी व्यतिरिक्तापि
जयंती क्वचिद्वत्सरे नुपलभ्येत न त्वेवमुपलभ्यते अतो व्रतभेदपक्षोपि दुष्ट एव॥ अत्रोच्यते। न तावत्पारणोपवा
सयोः सांकर्यलक्षणो दोषोस्ति॥ आप्राणोदकपानादिना पारणे संपादितेपि उपवासभंगाभावात्॥ अन्यथा ह्यादशी
पारणत्रयोदशीनक्तयोः क्वचित्सांकर्यं केन वार्यते॥ नाप्युपवासद्वयनैरंतर्यं रोहिणीयोगसंभवे जन्माष्टम्यामे
पि तत्रैव कर्तव्यत्वात् सर्वत्र तिथिलभ्ययोगस्य केवलतिथेरुत्कृष्टत्वेन केवलायास्तिथेस्तत्रोपेक्षणीयत्वा
त्॥ अत एव व्यतिरेकानुपलंभोप्यलंकारायन तु दोषाय॥ जन्माष्टम्या रोहिणीनिरपेक्षत्वेन व्यतिरेक उपलभ्य
तां नाम जयंत्यास्तु योगरूपत्वेन रोहिण्यामिवाष्टम्यामपि सापेक्षत्वेन कथं केयं व्यतिरेकशंकावकाशः। तस्मा ७१
द्व्रतद्वयपक्षे न कोप्यस्ति दोषः॥ किं च यदा रोहिणीयोगोस्ति तदा जन्माष्टमीजयंत्योः सहप्रयोगस्यावश्यंभावित्वे
न जयंत्या अत एव जन्माष्टमीव्रतमंतर्भवति तस्मादपि नोपवासद्वयप्रसंगः। तदेवं व्रतभेदे दोषाभावात्तत्सा
धकानां हेतूनां सद्भावाच्च व्रतभेद एवावश्यमभ्युपेयः॥ व्रतैक्यं त्वसमस्तं तयोरुक्तयुक्त्यनुसंधानाभावादुष्ट

म्युपवाससादृश्यात्केषांचिद्दुदेति। सादृश्यं च गुणविकृतिद्वारा आश्रयाश्रयिभावाच्च संभाव्यते। यथा दर्शस्य
गुणविकृतिः सांकंप्रस्थापीयको यागः। तत्र दर्शयागे ये यावंतो गुणविषयाः प्रयोगास्ते सर्वेपि सांकंप्रस्थायीये
विद्यंते भेदस्तु स्वल्प एव भवति दर्शयागे सांनाय्यहविषी दधिपयसी पृथग्वदाने सांकंप्रस्थायीये तु सह
वप्रस्थाने एतावता भेदेन गुणविकृतिरित्यभिधीयते तथाग्निष्टोमस्य गुणविकृतिरुक्थ्यः। अग्निष्टोमे द्वा
दश स्तोत्राणि उक्थ्ये त्वधिकानि त्रीणि ततो गुणाधिक्याद्गुणविकृतिस्त्वमेवमत्रापि जन्माष्टम्या अनुपवासो
नुष्ठेयः॥ जयंत्यां तु दानादिरधिको गुणः। अतः सा गुणविकृतिः। आश्रयाश्रयिभावस्तु ज्योतिष्टोमे तदंगा
ववद्धोपासने दृष्टः। तत्र ज्योतिष्टोम आश्रयः तस्यांगान्युक्थ्योद्गीथानि तत्रोक्थ्यं नाम बह्वृचाध्यायिनो हो
त्रा शस्यमानं श्रा उमरुत्वतीयनिष्केवल्यादिनामकं शस्त्रं तत्रोक्थमाश्रित्य बह्वृचब्राह्मणोपनिषद्यु
पासनानि विहितानि तथा च श्रुतिः। उक्थमुक्थमिति वै प्रजा वदंति तदिदमेवोक्थमियमेव पृथिवीत्य
हमुक्थमस्मीति विद्यादिति च उद्गीथो नाम वेदिजो छंदोगा योगीयमानः साम्नो भागविशेषः। तं चोद्गी
थमाश्रित्य छांदोग्योपनिषद्युपासनानि विहितानि॥ ओमित्येतदक्षरमुद्गीथमुपासीतेति। एवं प्रकृते

पि जन्माष्टमीव्रते येयं श्रावणकृष्णाष्टमी तामाश्रित्य रोहिणीयोगनिमित्तं दानादिकं जयंतीव्रते विधीयते॥ अतो गुण
विकृतित्वेनाश्रयाश्रयिभावेन साहश्य सद्भावात्तयो व्रतैक्यभ्रमो मेदबुद्धेर्जायतां नाम। प्रमाणान्याद्यदर्शिनिस्तत्सर्व
थैव व्रतभेदे योगी कार्य इति सिद्धं यद्येतद्विचारत्रयं पूर्वमुपसिद्धं व्रतभेदे तिथिनिर्णये वेधे चेति। तत्र व्रतभेदो निरू
तः। अथ तिथिनिर्णीतिर्वा निर्णीयश्च वेधाधीनः। अतो वेधः पूर्वमभिधीयते। तिथ्यंतरेष्वहूर्त एव प्रायेण कर्मकालत्वात
दस्यास्तमयवेलायां त्रिमुहूर्त्तविद्धः सामान्येन निरूपितः। पंचम्यां तु विशेषतः षण्मुहूर्त्तवेधो दर्शितः जन्माष्टम्यां ज
यंत्यां चार्धरात्रिप्रधानत्वाद्रात्रियोगोऽत्र प्रशस्तः। एतच्च जाबालिवृद्धगौतमाभ्यां दर्शितं। अहस्तु तिथयः पुण्याः कर्मा
नुष्ठानतो दिवा। नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यत इति। यद्यप्युपवासव्रतत्वादहनि रात्रौ च मुख्यत्वे युक्तितः
समर्थं तथाप्यर्धरात्रस्य मुख्यकालत्वमुक्तं वसिष्ठसंहितायां। अष्टमी रोहिणीयुक्ता निशार्धे दृश्यते यदि। मुख्य
कालइति ख्यातस्तत्र जातो हरिः स्वयमिति एवं सत्यर्धरात्रसद्भाव एवात्र कर्मकालव्याप्तिरित्यभिधीयते। एतदेवाभि ७८
प्रेत्य विष्णुरहस्ये पठ्यते रोहिण्यामर्धरात्रे तु यदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजमिति। तस्मि
न्नर्धरात्रे कियत्परिमाणमपेक्षितमित्याकांक्षायां मार्कंडेयपुराणे दर्शितं। अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत्॥

जयंती नाम सा प्रोक्ता सर्वपापप्रणाशिनी॥ इति॥ वाराहसंहितायामपि॥ सिंहार्के रोहिणीयुक्ता नभःकृष्णाष्टमी यदि॥ रात्र्यर्धपूर्वाप
रगा जयंती कलयापि चेति॥ रात्रेरर्धं रात्र्यर्धं॥ पूर्वं चापरं च पूर्वापरे रात्र्यर्धं च ते पूर्वापरे च रात्र्यर्धपूर्वापरे तयोर्गच्छति वर्त्तत इति रा
त्र्यर्धपूर्वापरगा घटिकाया अशीत्यधिकतमो भागः कला॥ तावता परिमाणेन पूर्वार्धावसाने उत्तरार्धादौ च वर्त्तमाना गृहीतव्या॥
एवं च तिथिरूपा कृष्णाष्टमी द्विविधा पूर्वेद्युः सप्तमीयुक्ता परेद्युर्नवमीयुक्ता चेति। तत्र सप्तमीयुक्तायां रात्रिपूर्वार्धावसाने कला
सद्भावो विधीयते॥ उत्तरार्धादौ स्वतः सिद्धत्वेनाविधेयत्वात्। द्वितीयपर्यायेण नवमीयुक्तायामुत्तरार्धादौ कलाके विधीयते। पूर्वार्धाव
सानकलायाः सप्तमीयुतविषयत्वं विष्णुधर्मोत्तरे स्पष्टमभिहितं। रोहिणीसहिता कृष्णा मासि भाद्रपदेऽष्टमी। सप्तम्यामर्धरात्रा
धः कलयापि यदा भवेत्॥ तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः॥ तमेवोपवसेत्कालं कुर्यात्तत्रैव जागरमिति। इयमष्टमी कृष्णम
न्तादिमासविवक्षया भाद्रपदे भवति सैवाष्टमी शुक्लपक्षान्तमासविवक्षया श्रावणे भवति। अत एव योगीश्वरः। रोहिणीसहिता कृ
ष्णा मासे च श्रावणेऽष्टमी॥ अर्धरात्रादधो र्ध्वं कलयापि यदा भवेत्। जयंती नाम सा प्रोक्ता सर्वपापप्रणाशिनी॥ कलाया अतिसू
क्ष्मत्वेनातिदुर्लक्ष्यत्वात्स एव पक्षान्तरमाह। अर्धरात्रादधश्चोर्ध्वमेकार्धघटिकान्विता॥ रोहिणी चाष्टमी ग्राह्या उपवासव्रतादि
ष्विति। एका चार्धघटिका चैकार्धघटिके ताभ्यामन्विता कलामपेक्ष्यार्धघटिका स्थूला तामपेक्ष्य घटिका स्थूला। तत्रायमर्थः सं
पद्यते पूर्वभागावसाने एका घटिका उत्तरभागादौ चैका मिलित्वा तस्मिन्निशीथशो द्वाभ्यां मुहूर्त्तस्तावत्परिमाणं सर्वैरपि सु
लक्ष्यत्वान्मुख्यः कल्पः तदसंभवेऽर्धघटिकान्वेष्टव्या तस्याप्यसंभवे कलेति। तत्र मुख्यं पक्षमभिप्रेत्य भविष्योत्तरे निशी

थेऽरुणमपत्तगा इत्युक्तं तद्वचनं साकल्येन सर्वमेवोदाहृतं॥ अत्र जयंत्यां चंद्रार्धस्यावश्यकत्वबलात्तस्य चंद्रोदयकालीनत्वान्निशीथे योगः
प्रशस्तः॥ एतदेव विष्णुधर्मोत्तरेऽभिहितं॥ अर्धरात्रे तु योगोऽयं तारापत्युदये तथा। नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्त्तयेदि
ति॥ सोयमर्धरात्रयोगो मुख्यः कल्पः यस्तु कृत्स्नाहोरात्रयोगः सोयं मुख्यतरः यश्च यदा कदाचिदीषद्योगः सोऽनुकल्पः स च
वसिष्ठसंहितायां दर्शितः अहोरात्रं तयोर्योगो ह्यसंपूर्णो भवेद्यदि। मुहूर्त्तमप्यहोरात्रे योगश्चेत्तामुपोषयेदिति। पुराणांतरेपि॥
रोहिणी च यदा कृष्णपक्षेऽष्टम्यां द्विजोत्तम। जयंती नाम सा प्रोक्ता सर्वपापहरा तिथिः॥ वासरे वा निशायां वा यत्र स्वल्पापि रो
हिणी॥ विशेषेण नभोमासे सैवोपोष्या मनीषिभिरिति॥ योयं जयंतीव्रतयोगनिर्णयः स एव जन्माष्टमीव्रतेपि द्रष्टव्यः॥
यस्मिन्वत्सरे योगो नास्ति तस्मिन्वत्सरे जन्माष्टमीव्रतमेकमेव प्रवर्त्तते। तत्रापि नेतराष्टमीवद्दिवसे वेधः किंत्वर्धरात्र
वेधः तथा तस्मिन्नेव पुराणांतरे। दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणी कला॥ रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुनायुतामि
ति। अन्यत्रापि। अष्टमी शिवरात्रिश्च ह्यर्धरात्रादधो यदि॥ दृश्यते घटिकाप्येका सा पूर्वविद्धा प्रकीर्तितेति॥ इति वेधो निरूपितः॥
अथ ग्राह्या तिथिर्निरूप्यते॥ सा च संवत्सरभेदेन द्विधा भवति रोहिणीरहिता रोहिणीयुक्ता चेति। तत्र या रोहिणीरहिता ७९
ष्टमी सापि सापि द्विविधा॥ शुद्धा॥ सप्तमीविद्धा च॥ सूर्योदयमारभ्य वर्त्तमाना अष्टमी शुद्धा। निशीथादर्वाक् सप्तम्यां वि
यत्यापि युक्ता विद्धा॥ शुद्धापि पुनर्निशीथव्याप्त्यव्याप्तिभ्यां द्विविधा॥ तत्र निशीथव्यापिनी जन्माष्टमीव्रते मुख्या। विशे
षेदुसंयुतामिति वचनात्। निशीथव्याप्तिरहितापि रात्रियुक्तां प्रकुर्वीतेति वचनेन गृहीतव्या भवति॥ ननु पूर्वेद्युर्नि

शीथादूर्ध्वमारभ्य परेद्युर्निशीथादर्वाग्वा समाप्यते॥ तस्यां जन्मयत्र रात्रिसंबंधित्वात् कुत्रोपवास इति चेत्। परेद्युरिति ब्रूमः॥ जन्मयत्र निशी
थव्याप्त्यभावस्य रात्रिसंबंधस्य च तुल्यत्वेपि परेद्युः प्रातःसंकल्पकालमारभ्य वर्त्तमानतया प्राशस्त्यं द्रष्टव्यं। सप्तमीविद्धापि त्रिवि
धा॥ पूर्वेद्युरेव निशीथव्यापिनी परेद्युरेव निशीथव्यापिन्यव्यापिनी। जन्मयत्र निशीथव्यापिनी चेति। तत्र प्रथमद्वितीययोः पक्ष
योर्निशीथव्याप्तेः प्रयोजकत्वेन या निशीथव्यापिनी सा विशेषेणेंदुसंयुतामिति वचनेन ग्रहीतव्या भवति। या तु दिनद्वयेपि नि
शीथव्यापिनी तस्यां जन्मयत्र निशीथव्याप्तेः रात्रियोगस्य च तुल्यत्वात् नानेन वचनेन निर्णयः संभवति। नापि कृष्णपक्षे
ष्टमी चेद्वेत्यादिभिरष्टमीमात्रमुपजीव्य प्रवृत्तैर्निर्णेतुं शक्यते। तेषामहर्वेधविषयत्वात्। अन्यथा व्रतोत्तरेद्युरपि निशीथवे
धः प्रसज्येत। तस्मान्न्यायः परिशिष्यते न्यायश्च परेद्युरुपवासं प्रापयति संकल्पकालमारभ्य तिथिसद्भावात्। न च सा
कल्याभिधायिवचनेन पूर्वेद्युरपि संकल्पकालो[illegible]स्तीति शंकनीयं। तस्यां मुख्यातिथित्वाभावात्॥ किंच सा तिथिः
सकलाहोरात्रव्यापिनी तस्यामस्तमितोदितरविरिति वचनं निशीथव्यापिनीमष्टमीं न विषयीकरोति तस्मात्परेद्युरुपवासः तदेवं च
तुर्विधा रोहिणीरहिताष्टमी निरूपिता॥ रोहिणीसहिताष्टमी निरूप्यते॥ सापि चतुर्विधा॥ शुद्धा विद्धा शुद्धाधिका विद्धाधिका
चेति। तत्र शुद्धायां संपूर्णयोगो निशीथयोगो यत्किंचिन्मुहूर्त्तयोगश्चेति त्रैविध्यं भवति। एवं विद्धायामपि द्रष्टव्यं।
एतेषु षट्सु पक्षेषु दिनांतरे योगाभावात् पूर्वापरसंदेहो नास्ति किंतु केवलं योगतारतम्यात् प्राशस्त्यतारतम्यं
भवति। यत्किंचिन्मुहूर्त्तयोगः प्रशस्तः। अर्धरात्रयोगः प्रशस्ततरः। संपूर्णयोगः प्रशस्ततमः। सर्वेष्वपि यो
गेषु योगमुपजीव्योपवासो विष्णुरहस्ये॥ प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी। मुहूर्त्तमपि लभ्येत सो

पोष्या सु महाफला। मुहूर्त्तमप्यहोरात्रे यस्मिन्युक्तं हि लभ्यते। अष्टम्या रोहिणीऋक्षं तां सुपुण्यामुपवसेदिति॥ अर्द्धा
धिकालस्य र्येदियमारभ्य प्रवृत्ताप रेद्युः सूर्योदयमतिक्रम्य यद्वर्धते। सा च त्रिविधा। पूर्वेद्युरेव रोहिणीयुक्ता प
रेद्युरेव रोहिणीयुक्ता दिनद्वयेपि ... रोहिणीयुक्ता चेति। तत्राद्ययोर्द्वयोः पक्षयोर्नास्त्युपवासस
न्देहः। रोहिणीयुक्ताया द्वितीयकोटेरसंभवात्॥ तृतीयपक्षे तु रोहिणीयोगस्योभयत्र समानत्वेपि गुणाधिक्या
त्पूर्वैवोपोष्या। गुणाधिक्यं च दर्शयि ... ष्यते। येयमत्रोपोष्यत्वेनोक्ता पूर्वा तिथिः सापि रोहिणीयो
गात्त्रिधा भिद्यते। अष्टमी सूर्योदयमारभ्य प्रवृत्ता रोहिणी कदाचित्परेद्युरपि कियती वर्धते। कदाचित्पूर्वे
द्युर्निशीथमारभ्य रोहिणी प्रवर्तते॥ कदाचिन्निशीथादूर्ध्वमारभ्य प्रवर्तते। तत्र प्रथमपक्षे संपूर्णयोग
त्वमेको गुणः। संकल्पकालमारभ्य तत्तत्कर्मकालव्याप्तिरपरो गुणः। निशीथव्याप्तिस्तृतीयो गुणः।
न चैते त्रयो गुणाः परेद्युः संभवंति॥ द्वितीयपक्षे निशीथे जयंतीसद्भावो गुणः। न च परेद्युः सोस्ति। तृतीय ८०
पक्षे दिनद्वयेपि निशीथे जयंतीयोगो नास्ति॥ पूर्वेद्युः केवलाष्टमी परेद्युः केवला रोहिणी तत्राष्टम्याः प्राधा
न्यात्प्राबल्यमभ्युपेत्य॥ सर्वत्र हि जयंती वाक्येषु रोहिणीसहिताष्टमीति व्यवहारो दृष्टमी सहिता रोहि
णीति व्यवहारो नाव्ची। तिथिनक्षत्रयोः क्रमेण प्रधानोपसर्जनभावो वगंधैतव्यः। ततो गुणाधि

क्याद्युक्ताधिक्यात्पूर्वैवोपोष्या॥ निशीथादर्वाक्सप्तम्यायुक्ता परेद्युरपि विद्यमाना विद्धाधिका। न चात्र निशीथवेधो यथाहुरुक्त
तं। वाद। वेध्याया अष्टम्या निशीथसद्भावोत्र निशीथवेधः। ननु वेधाधिकायाः सप्तम्या निशीथसद्भावः॥ विद्धाधिकायामपि पूर्व
यं द्वयोः संदेहो नावश्यं पूर्वैव ग्राह्यात्र नो यः। तत्र या पूर्वेद्युरेव रोहिणीयुक्ता विद्धाधिका तस्यामुपवासमादित्यपुराणे स्मर्यते॥
विनाऋक्षेण न कर्त्तव्या नवमी संयुताष्टमी॥ कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमीति। विष्णुधर्मेनरपि। जयंती शिव
रात्रिश्च कार्ये भद्रा जयान्विते। कृत्वोपवासं तिथ्यंते तथा कुर्याच्च पारणमिति। गरुडपुराणे पि। जयंत्यां पूर्वविद्धायामुपवा
सं समाचरेत्। तिथ्यंते वोत्सवांते वा व्रती कुर्वीत पारणमिति। या परेद्युरेव रोहिणीयुक्ता विद्धाधिका तत्रोपवासः पू
र्वे तिथौ न युक्तः। रोहिणीयोगाभावात् परेद्युस्तु नक्षत्रभावात्पूर्वोदाहृतेन प्राजापत्यर्क्षसंयुक्तेत्यादिना विष्णुरहस्य वचनेनो
पवासो विधीयते। या तु नयत्र रोहिणीयुक्ता विद्धाधिका सापि निशीथे जयंतीयोगमपेक्ष्य चतुर्द्धा भिद्यते। पूर्वेद्युरेव नि
शीथयोगवती। परेद्युरेव तादृशी। उभयत्रापि तादृशी। उभयत्र निशीथयोगरहिता चेति। तत्र या पूर्वेद्युरेव निशी
थयोगवती। सा पूर्वैवोपोष्या। तदुक्तं पद्मपुराणे। कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी। तत्रोपवासं कुर्वीत तिथि
भांते च पारणमिति। तत्रोदाहृत वशिष्ठविष्णुपद्मपुराणैः परदिन एवोपवासः। तत्र दिनद्वये निशीथयोगमनिच्छत्स्वल
वेवर्त्तेप्युच्यते। वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी। सामर्क्षापि न कर्त्तव्या सप्तमीसंयुताष्टमी॥ अविद्धायां तु सर्क्षायां जातो
देवकीनंदन इति। यदि दिनद्वयेपि निशीथयोगः परस्योपवासस्तदा विष्णुवल्लभ्यपरेद्युरेव निशीथयोगे दिनद्वयेपि निशीथयो

गराहित्यं बहुधायते॥ तद्यथा॥ पूर्वेद्युर्निशीथादूर्ध्वं तिथिनक्षत्रद्वयं प्रवृत्तं तच्चापरेद्युर्निशीथादर्वागेव समाप्तमित्येकः प्र
कारः॥ पूर्वेद्युर्निशीथादर्वागेव नक्षत्रं प्रवृत्तं अष्टमी तु निशीथादूर्ध्वं प्रवृत्ता परेद्युर्निशीथादर्वागेव द्वयं निवृत्तमि
त्यपरः। अष्टमी निशीथादर्वाक्प्रवृत्ता नक्षत्रं च निशीथादूर्ध्वं प्रवृत्तं अष्टम्याश्च परेद्युर्निशीथादर्वागेव समाप्तिरि
ति तृतीयः। त्रिष्वेतेषु प्रकारेषु पूर्वेद्युरेवोपोष्या। दिनद्वयेप्यर्धरात्रयोगविषये पूर्वमुदाहृतस्य वर्द्धनीया प्रयत्नेनेति
वचनस्यात्रापि संचारयितुं शक्यत्वात्। किं च प्रथमे प्रकारे न्यायोप्युपोद्बलकोस्ति संकल्पकालमारभ्य तिथि
नक्षत्रयोगस्य बहुकालव्यापित्वात् प्रशस्तत्वं द्रष्टव्यं। द्वितीये प्रकारे परेद्युरष्टमीबाहुल्येपि नक्षत्रयोगस्याल्प
त्वादनुपादेयत्वमित्याशंका न कर्तव्या। अत एव स्कंदपुराणे पठ्यते। सप्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजो
त्तम। प्राजापत्यं द्वितीयेह्नि मुहूर्तार्धं भवेद्यदि। तदाष्टयामिकं ज्ञेयं प्रोक्तं व्यासादिभिः पुरेति। तृतीये प्रका
रे परेद्युर्नक्षत्रबाहुल्येप्यष्टमीयोगस्याल्पत्वादनुपादेयत्वमित्याशंका न वर्तितव्या सा च पद्मपुराणे नानिवर्त्यते
पूर्वविद्धाष्टमी या तु उदये नवमीदिने। मुहूर्तमपि संयुक्ता संपूर्णा साष्टमी भवेत्। कलाकाष्ठामुहूर्ता ८१
पि यदा कृष्णाष्टमी तिथिः। नवम्यां सैव ग्राह्या स्यात्सप्तमीसंयुता न हीति। तदेवं जन्माष्टमीभेदा जयंतीभेदा
श्च निरूपिताः। तत्र जयंत्यामुपवासदिने यदि सोमवासरो बुधवासरो वा भवति तदा प्राशस्त्याधि
क्यं भवति। तदुक्तं पद्मपुराणे। प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः। यैः कृता श्रावणे मासि अष्टमी रो

हिणीयुता॥ किं पुनर्बुधवारेण सोमेनापि विशेषतः। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति। स्कंदपुराणेपि। उद
ये चाष्टमी किंचिन्नवमी सकला यदि। भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता॥ अपि वर्षशतेनापि लभ्यते यदि वा न वेति।
विष्णुधर्मोत्तरेपि॥ अष्टमी बुधवारेण रोहिणीसहिता यदा। भवेत्तु मुनिशार्दूल किं कृतैर्व्रतकोटिभिरिति। यथोक्तरीत्या
विहिततिथावुपवासं कृत्वा परेद्युः पारणेनोपवासं समापयेत्। पारतीरकर्मसमाप्ताविति अस्माद्धातोर्निष्पन्नः पार
णशब्दः। यद्यप्यसौ समाप्तिमात्रमभिदधाति तथाप्युपवाससमाप्तावेव लोकशास्त्रयोः प्रयोगात्पंकजादिशब्दवद्यो
गरूढोऽवगंतव्यः। तथा च योगरूढ्योपवासस्य चरमांगं भोजनमभिधीयते। अंगत्वं चोपवासविधिवाक्ये श्रुतिथि
नांते च पारणमिति विधानादवगंतव्यं। न च रागप्राप्तस्य भोजनस्यानेन वचनेनोपवासांगतिथिनक्षत्रशेषयो
र्निषेधः क्रियते न तु पारणं नाम किंचिदंगं विधीयत इत्याशंकनीयं। तथा सति पारणशब्दयोगानुपपत्तेः। राग
प्राप्ते हि अभ्यवहरणे भोजनशब्दः। तत्र पारणशब्देन रागप्राप्तभोजनविवक्षायां मुख्यार्थो बाधितः स्यात्। किंच य
दि पारणमंगं न स्यात्तदा प्रतिनिधिविधानं नोपपद्येत तद्विधानं च द्वादशीप्राप्तावेव देवलेनास्मर्यते। संकटे वि
षमे प्राप्ते द्वादश्यां पारयेत्कथं। अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृदिति। अतः पारणशब्दबलात्प्रतिनिधिब
लाच्च पारणस्यांगत्वं द्रष्टव्यं। अत एवादित्यपुराणे। पारणांतं व्रतं ज्ञेयं व्रतांते द्विजभोजनं। असमाप्ते व्रते पूर्वे
नैव कुर्याद्व्रतांतरमिति॥ तच्च पारणमुपवासदिनात्परदिने प्रातः कर्तव्यं। उपवासेषु सर्वेषु पूर्वाह्णे पारणं

नवेदिति॥ देवलस्मरणात्। एवं सामान्यतः सर्वाहि पारणप्राप्तौ क्वचिदपवादाय तिथ्यंते च पारणमित्यभिधीयते॥
शुद्धाधिकायां पूर्वेद्युरेव जयंतीयोगः॥ अन्यत्रापि जयंतीयोगरहितयोः शुद्धयोः पूर्वेद्युरेवोपवासविधा
नात्परेद्युः केवलतिथ्यंते तिथिनक्षत्रयोर्वासिद्धावान्तदंते पारणविधिः। तथा शुद्धाधिकाविद्धाधिकयोरुभयोरपि य
दा परेद्युरेव जयंतीयोगस्तदा परतिथौ उपवासविधानात्पारणदिने तिथ्यंतो वापि कदाचिन्नक्षत्रावशेषः सन्नवति
तदंते पारणं विधीयते। तिथ्यंते वा नक्षत्रस्य चाशेषकाले पारणं ब्रह्मवैवर्ते निषिध्यते। अष्टम्यामथरोहिण्यां न कुर्या
त्पारणं क्वचित्॥ हन्यात्पुराकृतं कर्म उपवासार्जितं फलं। तिथिरष्टगुणं हंति नक्षत्रं च चतुर्गुणं॥ तस्मात्प्रयत्नतः कु
र्यात्तिथिभांते च पारणमिति। स्कंदपुराणेपि। तिथिनक्षत्रनियमे तिथिभांते च पारणं। अतोन्यथा पारणे तु व्रतभं
गमवाप्नुयादिति। तिथिभांतश्च द्विविधः उभयांत एकांतश्चेति। दिनद्वये जयंतीयोगवत्यां शुद्धाधिकायां परदि
ने अष्टमीमुहूर्तत्रयेनातिक्रांतरोहिण्यां पूर्वेद्युर्निशीथादर्वाग्यदाकदाचित्स्वमतानुसारेण परेद्युः स
माप्येत। तत्र यदि दिवैव समाप्येत तदा तामतिक्रम्यैव पारणं कुर्यात्। उभयांतस्य मुख्यत्वात्। यदि रात्रौ समा ८२
प्तिः तदा तत्समाप्तिर्न प्रतीक्षणीया॥ रात्रिपारणस्य निषिद्धत्वात्। तथा ब्रह्मवैवर्ते। सर्वेष्वेवोपवासेषु दिवा
पारणमिष्यते॥ अन्यथा पुण्यहानिः स्याद्दृते धारणपारणादिति। अन्यतिथ्यागमो रात्रौ तामसस्तेजसा दिवा।
तामसे पारणं कुर्वंस्तामसीं स्तामसीं गतिमाप्नुयादिति। दिवा पारणं कुर्वन्नपि नाष्टमीवेलायां कुर्यात्। एकतरां

तस्याप्यनायात्॥ अष्टमीमतिवाह्य रोहिण्यां वर्तमानायामपि पारणं कुर्यात्॥ अतएव नारदीये। तिथिनक्ष
त्रसंयोगे उपवासो यदा भवेत्॥ पारणं न तु कर्तव्यं यावन्नैकस्य संक्षयः॥ संयोगिके व्रते प्राज्ञैर्यत्रैकोपि वि
युज्यते। तत्रैव पारणं कुर्यादेवं वेदविदो विदुरिति॥ पूर्वेद्युरेव निशीथे जयंतीयोगवत्यां विद्धाधिकायां पारण
दिने तिथिभांतो बहुधा भाव्यते। अहन्युभयांत एकतरांतो वा। रात्रावेकतरांत उभयांतो वेति। तेषु चतुर्षु नेदृ
निर्णयः स्मर्यते। तिथ्यंतयोर्यदा छेदो नक्षत्रांतमथापि वा। अर्धरात्रेथवा कुर्यात्पारणं त्वपरेहनीति। दिवसे यद्युभयांतस्तदा
पारणमिति मुख्यः कल्पः। नक्षत्रांतमित्यनेनैकतरांतत्वं विवक्षितं। सोयमनुकल्पः। यदि रात्रौ निशीथादर्वागुभयांत एकतरां
तो वा भवति। तदा दिवसे मुख्यानुकल्पयोरुभयोरप्यसंभवात् रात्रौ च पारणस्य निषिद्धत्वात् अर्थादुपवासप्राप्तौ पारणस्य प्र
तिप्रसवः क्रियते। अर्धरात्रेथवा कुर्यादिति। ननु पारणेष्ट्यंतं प्रतीक्षणीयत्वे रोहिण्यंतो न प्रतीक्षणीयः। याः काश्चि
त्तिथयः प्रोक्ताः पुण्या नक्षत्रसंयुताः॥ ऋक्षांते पारणं कुर्याद्विना श्रवणरोहिणीमिति स्मरणात्॥ मैवं। नक्षत्रं च चतुर्गु
णमिति प्रत्यवायस्योदाहृतत्वात्। तस्माद्विना श्रवणरोहिणीमिति वचनं केवलनक्षत्रोपवासविषयं श्रवणानुकल्पविष
यं चेत्यवगंतव्यं। अथ कस्यचित्तु तिथिनक्षत्रयोरुभयोरनुवर्तमानयोरपि प्रातर्दिवसप्रत्यक्रियमाणं पारणं न कल्पति
तिथ्यंते वोत्सवांते वा व्रती कुर्वीत पारणमिति स्मरणात्॥ ॥इति जयंतीनिर्णयः॥ ॥अथ नवमीनिर्णीयते॥
सा च विधिनिषेधरूपाभ्यामन्वयव्यतिरेकाभ्यां पूर्वविद्धैव ग्राह्या॥ तद्विधिश्च युग्मादिशास्त्रे वसुरंध्रयोरिति पठ्यते

पद्मपुराणेपि। अष्टम्या नवमी विद्धा नवम्या वाष्टमी युता। अर्धनारीश्वरप्राया उमामाहेश्वरी तिथिरिति॥ भविष्यत्पुराणे दुर्गा
दशीकल्पेपि। नवम्या सह कार्या स्यादष्टमी नवमी तयेति। निषेधस्तु पद्मपुराणेभिहितः। न कार्या नवमी तात दशम्या तु क
दाचनेति। विधिनिषेधावुभावपि। तौ ब्रह्मवैवर्ते दर्शितौ॥ अष्टम्या नवमी विद्धा कर्तव्या फलकांक्षिभिः। न कुर्यान्नवमीं तात द
शम्या तु कदाचनेति। सेयं नवमी भविष्यत्पुराणोक्तदुर्गाव्रतादौ द्रष्टव्या। ननु शुक्लनवम्याः पूर्वविद्धत्वेपि शुक्लनवमी परविद्धा शु
क्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविरिति वचनात्। मैवं। पूर्वोक्तेषु वचनेषु दशमीविद्धायाः साक्षान्निषेधात्। न
नु तस्य निषेधस्य सामान्यरूपत्वाच्छुक्लपक्षे संकोचोस्त्विति चेत्। न। संकोचहेतोर्नवदुर्गाव्रतस्यापि सामान्यरूपत्वा
त्तस्मात्पक्षयोरुभयोरपि पूर्वविद्धैव ग्राह्या। रामनवमी तु चैत्रशुक्ला तु नवमी पुनर्वसुयुता यदि। सैव मध्याह्नयोगेन
महापुण्यतमा भवेत्। नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः। उपोषणं नवम्यां वै दशम्यां पारणं भवेत्। इति
वचनात् अष्टमीविद्धा सर्वत्रापि नोपोष्या॥ ॥इति नवमीनिर्णयः॥ ॥अथ दशमी निर्णीयते। तस्यां च तिथ्यं
तरवद्द्वैयोपादेयविभागो नास्ति। तिथ्यंतरे तु क्वापि पूर्वविद्धा ग्राह्या क्वापि तु परविद्धा। न तु तथा दशम्यां किंचिन्नियामक ८२
मस्ति। एतदेवाभिप्रेत्यांगिरा आह। संपूर्णा दशमी ग्राह्या परया पूर्वयाथवा। युक्ता न दूषिता यस्मात्तिथिः सा सर्व
तोमुखीति। यथा संपूर्णा दोषरहिता तथा विद्धापि प्रतिपत्संमुखी कार्या इत्याहौ तिथिषेछे खंडद्वयमुक्ते दशम्यास्तु मू
लाग्रयोरपि मुखत्वात्सर्वतोमुखत्वमत्र समानं। एवं स्थिते सत्यत्रेदं चिंत्यते। किं पुरुषेच्छया पूर्वोत्तरविद्धयोरन्यतरा

ग्राह्या॥ किं वा नियामकं शास्त्रमस्तीति। तत्र न तावच्छास्त्रं किंचिल्लक्ष्यामः। प्रत्युत सर्वतोमुखत्वकथनात्पूर्वोत्तरविद्धयोरुभ
योः समबलत्वं शास्त्रेण प्रतीयते। अतो व्रीहिभिर्यजेत यवैर्वेत्यादिवदैच्छिको विकल्पोवगंतव्यः। न चाष्टदोषग्रस्तत्वा
द्विकल्पो न युक्त इति शंकनीयं। गत्यंतराभावेन दोषग्रस्तस्यापि व्यवस्थाश्रयणीयत्वात्। तदुक्तमाचार्यैः। एवमेवाष्टदो
षोपि यद्व्रीहियववाक्ययोः विकल्प आश्रितस्तत्र गतिरन्या न विद्यत इति। तस्मादैच्छिको विकल्प इति प्राप्ते ब्रूमः। अस्त्य
त्र वचनं व्यवस्थापकं। तथा च मार्कंडेयः। शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः। कृष्णपक्षे तिथिर्ग्राह्या यस्या
मस्तमितो रविरिति। नन्वनेन वचनेन पक्षभेदेन विकल्प आश्रितः। तथा सति दोषाष्टकस्य तादवस्थ्यादैच्छिक एव विक
ल्प एवमुक्तो न स्वीक्रियत इति चेन्मैवं। सति व्यवस्थापके शास्त्रे पुरुषेच्छाया अप्रसरात्। अत एव स्मर्यते। न दासीनेतु
थे शास्त्रे पुरुषेच्छा नियामकेति। ननु पक्षभेदेन व्यवस्थानुपपन्ना। स्कंदपुराणे पूर्वविद्धाया एव ग्राह्यत्वाभिधानात्। द
शमी त्वेव कर्त्तव्या सदुर्गा द्विजसत्तमेति। सदुर्गा नवमीमिश्रा। मैवं। पक्षद्वये पूर्वविद्धास्वीकारे पूर्वया परयाथवेति
परविद्धाविधानस्य निरवकाशत्वप्रसंगात्॥ नवमीमिश्रत्ववचनं तु शुक्लपक्षे चरितार्थं॥ ननु परविद्धानिषेधो
ब्रह्मवैवर्त्तेपिदृश्यते। प्रतिपत्पंचमी भूतसावित्री वटपूर्णिमा। नवमी दशमी चैव नोपोष्या परसंयुता। इति। कूर्मपुरा
णे। नंदा विद्धा यदा पूर्णा द्वादशी मकरे स्थिता॥ प्रतिपन्नष्टचंद्रा च एता वै निःफलाः स्मृताः। अत्रैकादश्या नंदत्वाद्दश
म्याश्च पूर्णत्वादेकादशीविद्धा दशमी निःफलेति गम्यते। बाढं। अयमपि निषेधः पूर्वोक्तन्यायेन कृष्णपक्षविषय

तथा योजनीयः॥ तस्माद्वैष्णवरविद्धयोर्दशम्योः पक्षभेदेन व्यवस्था द्रष्टव्या॥ ॥इति दशमीनिर्णयः॥ ॥अथैकादशीनि
र्णयते॥ तत्रैकादश्यामुपवासो दानादिकं चेत्युभयं विवक्षितं। उपवासोऽयं तावन्नित्यकाम्यरूपः। द्वैविध्यं च तस्य द्विविध
प्रमाणबलादवसीयते। उपवासविधिवाक्येषु नित्यशब्दसद्भावादीनां नित्यत्वसाधकानां स्मरणान्नित्यत्वसिद्धिः॥
तानि च साधकानि संग्रहकारेण संगृहीतानि॥ नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत्। इत्युक्तातिक्रमे दोषश्रु
तेस्त्यागचोदनात्। फलाश्रुतेर्वीप्सया च तन्नित्यमिति कीर्तितमिति। अत्र च नित्यशब्दादीन्यष्टौ नित्यत्वसाधका
नि। नित्यशब्दस्तावद्गारुडपुराणे। उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि॥ सदाशब्द उक्तः सनत्कुमारसंहि
तायां। एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोरिति॥ यावदायुःशब्द उक्तो विष्णुरहस्ये। द्वादशी न त्यक्तव्या या
वदायुः सुवृत्तिभिरिति। आग्नेयपुराणेपि॥ उपोष्यैकादशी राजन् यावदायुः सुवृत्तिभिरिति। अतिक्रमनिषेधः क
ण्वेन दर्शितः॥ एकादश्यामुपवसेन्न कदाचिदतिक्रमेदिति॥ विष्णुनापि॥ एकादश्यां न भुंजीत कदाचिदपि मानव
इति। अकरणे दोषमाह सनत्कुमारः॥ न करोति हि यो मूढ एकादश्यामुपोषणं॥ स नरो नरकं याति रौरवं तमसा ८४
वृतं। एकादश्यां मुनिश्रेष्ठ यो भुंक्ते मूढचेतनः॥ प्रतिमासं स भुंक्ते तु किल्बिषं श्वादिविड्भवं। निष्कृतिर्मद्यपस्योक्ता
धर्मशास्त्रे मनीषिभिः॥ एकादश्यन्नकामस्य निष्कृतिः क्वापि नोदितेति॥ मद्यपानान्मुनिश्रेष्ठ पातैव नरकं
व्रजेत्। एकादश्यन्नकामस्तु पितृभिः सह मज्जतीति॥ नारदीये। यानि कानि च पापानि ब्रह्महत्यासमानि च
अन्नमाश्रित्य तिष्ठंति संप्राप्ते हरिवासरे। तानि पापान्यवाप्नोति संप्राप्ते हरिवासरे इति॥ स्कांदे॥ मारहापि

हा वैव भ्रातृहा गुरुहा तथा॥ एकादश्यां तु यो भुंक्ते पक्षयोरुभयोरपीति॥ अकरण इवासमापनेपि दोष उक्तो विष्णुरहस्ये॥
समाप्य विधानेन द्वादशीव्रतमुत्तमं॥ तस्य भंगं नरः कृत्वा रौरवं नरकं व्रजेत्॥ परिगृह्य व्रतं सम्यगेकादश्यादिकं नरः॥ न
समापयते तस्य गतिः पापीयसी भवेदिति॥ नारदीयेपि। द्वादशीव्रतमादाय व्रतभंगं करोति यः॥ द्वादशाब्दव्रतं चीर्णं निष्फलं
तस्य जायत इति। अत्यागचोदना दर्शिता विष्णुरहस्ये परमापदमापन्नो हर्षे वा समुपस्थिते॥ सूतके मृतके चैव न त्याज्यं द्वाद
शीव्रतमिति। फलाश्रवणं च केषुचिद्वचनेषु विस्पष्टं॥ तत्र कात्यायः। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति॥ स्कांदे। उ
पोष्यैकादशी सम्यक् पक्षयोरुभयोरपीति॥ कूर्मपुराणेपि। वदंतीह पुराणानि भूयो भूयो वरानने। न भोक्तव्यं न भोक्त
व्यं संप्राप्ते हरिवासर इति॥ वीप्सामाह सनत्कुमारः॥ पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणमिति॥ नारदोपि। नित्यं
भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः॥ पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणमिति॥ तदेवं नित्यशब्दादिभिर्हेतुभिरुप
वासस्य नित्यत्वं सिद्धं। काम्यत्वं च सायुज्यादिफलश्रवणादवगम्यते। उक्तं विष्णुरहस्ये॥ यदीच्छेद्विष्णुसायुज्यं सुतान्स्वपर
मात्मनः। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति। कूर्मपुराणेपि। यदीच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः। एकादश्यां
न भुंजीत पक्षयोरुभयोरपीति॥ कात्यायनः॥ संसारसागरोत्तारमिच्छन्विष्णुपरायणः॥ ऐश्वर्यं संततिं स्वर्गं मुक्तिं वा
यद्यदिच्छति। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति। स्कंदपुराणेपि। यदीच्छेद्विपुलान्भोगान्मुक्तिं चात्यंतदुर्ल
भां॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपीति॥ नारदीयेपि॥ एकादशीसमं किंचित्पापत्राणं न विद्यते। स्वर्गमोक्षप्रद

त्वेधाराज्यपुत्रप्रदायिनी॥ सुकलप्रदा त्वेधा शरीरारोग्यप्रदायिनीति। तदेवं फलश्रवणात्काम्यत्वं सिद्धं। ननु काम्यत्वमनित्यत्वे
असति कामे परित्यक्तुं शक्यत्वात्। तथा सत्येकस्य कर्मणो नित्यत्वे काम्यत्वाभ्यां द्वैरूप्यांगीकारे नित्यानित्यसंयोगविरो
धं प्राप्नोति। नायं दोषः खादिरत्वप्रमाणद्वयेन द्वैरूप्योपपत्तेः। तथाहि। खादिरो यूपो भवतीति क्रतौ नित्यः खादिरो वि
हितः। खादिरं वीर्यकामस्य यूपं कुर्वीतेति तस्मिन्नेव क्रतौ काम्यत्वेनानित्यः खादिरो विहितः। तत्र यथा प्रमाणद्वय
संबंधादेकस्यापि खादिरस्य द्वैरूप्यं किं न स्यात्। ननु विषमो दृष्टांतः। नित्यः खादिरः क्रत्वर्थः काम्यस्तु पुरुषार्थः
उपवासस्तु नित्योपि पुरुषार्थ एव। तस्य खादिरवत्क्रत्वंगता बोधकप्रमाणाभावात्। बाढं। अस्त्वेव विषमं।
प्रयोजकं तु द्वैरूप्ये प्रमाणद्वयमस्त्येव। सूत्रकारेण प्रमाणद्वयस्यैव द्वैरूप्यसाधकत्वोपन्यासात्। तथा च सूत्रं
एकस्य तूभयत्वे संयोगपृथक्त्वमिति। अतः केवलपुरुषार्थस्याप्युपवासस्य द्वैरूप्यमविरुद्धं। यदि त्वाधा
रोहस्य सदृशो दृष्टांतोपेक्षितः। तर्ह्यग्निहोत्रादि दृष्टांतोस्तु। नह्यग्निहोत्रं क्रत्वर्थं। तस्य स्वयमेव क्रतुत्वात्। तस्य च ८५
नित्यत्वकाम्यत्वे वाक्यद्वयादवगम्येते। यावज्जीवमग्निहोत्रं जुहोतीति नित्यत्वावगमकं वाक्यं। अग्निहोत्रं जुहुया
त्स्वर्गकाम इति काम्यत्वावगमकं। तस्य क्रत्वर्थत्वाभावेन केवलपुरुषार्थत्वे वातोग्निहोत्रवन्नित्यत्वे काम्यत्वे
चेति द्वैरूप्यमस्ति। तच्च शब्दांतराभ्यासादि कर्मभेदहेत्वभावेनैकस्यैव कर्मणः सतः प्रयोगभेदादवगंतव्यं॥
प्रयोगभेदश्च यावज्जीवाधिकरणे निर्णीतः। तस्य चाधिकरणस्य संग्राहकावेतौ श्लोकौ भवतः। यावज्जीवं

मध१
जुहोतीति धर्मः कर्मणि पुंसि वा॥ कालत्वात्कर्मधर्मोतः काम्य एकः प्रयुज्यतां। न कालो जीवनं तेन निमित्तत्वाविभागतः॥ काम्य
प्रयोगो भिन्नः स्याद्यावज्जीवप्रयोगतः इति। अयमर्थः। अग्निहोत्रं जुहुयात्स्वर्गकाम इति काम्याग्निहोत्रं श्रूयते। तथा वा
क्यांतरं पठितं। यावज्जीवमग्निहोत्रं जुहोतीति। तत्र संशयः॥ किं यावज्जीवमित्यनेनाधिकारांतरं चोद्यते किं वा काम्याग्नि
होत्रे गुणविधिरिति। तदर्थमर्थांतरचिंता॥ किं यावज्जीवमित्ययं॥ कर्मधर्म उत पुरुषार्थ इति। यावज्जीवशब्देन पुरुषा
युष्यपरिमितः कालो निधीयते। काम्येन चाग्निहोत्रेण कालविशेष आकांक्षितस्तस्य च कालस्यानेन समर्पणादयं क
र्मधर्मः। तस्मात्कालविधिः। तथा चाग्निहोत्रस्य काम्यस्य प्रयोग एव न त्वन्यो नित्यः प्रयोग इति प्राप्ते ब्रूमः। यावज्जी
वशब्दो न कालस्य वाचकः। किंतु लक्षकः। वाक्यार्थस्तु तत्त्वं जीवनं। तच्च न कर्मधर्मत्वेन विधातुं शक्यं पुरुषध
र्मत्वात्। तथा सति जीवननिमित्ते
नैत्याद्विति। स्वर्गकामेन वज्जीवनमपि किंचिन्निमित्तं। तस्मादधिकारांतरचोदना। इतः। अन्ये नाग्निहोत्रस्यायं न
नित्यप्रयोगः काम्यनानिमित्तः कृतार्थिकप्रयोगश्च परस्परं भिद्येते इति। न चैकस्य कर्मणः कालभेदेन क
कृतस्याप्युपवासस्य निमित्तभेदे न नित्यप्रयोगः काम्यप्रयोगश्चाभिन्नौ। न चैकस्य कर्मणः कालभेदेन कार्य
र्भेदेन वा विनाशोऽप्रयोगो न सत्त्वबमः। न चात्र कालभेदः संभवति नित्यकाम्योपवासयोर्द्वयोरप्येकार्य
स्यामेव विधानात्। नाप्यत्र कर्तृभेदोस्ति। यद्यपि काम्यपरित्यज्य केवलं नित्यमनुष्ठातुं शक्यं तथापि काम्य
मनुष्ठास्तु नानित्यस्य परित्यक्तुमशक्यत्वात्। अतः कर्त्रैक्यात्कालैक्याच्च नित्यकामस्तु पोष्यो प्रयोगो न घटे

ते॥नायं दोषः॥विविदिषाधिकरणन्यायेन सकृदेवानुष्ठिते प्रयोगद्वयसिद्धेः।तस्य चाधिकरणस्य संग्राह
कावेतौ श्लोकौ भवतः॥विद्यार्थमाश्रमार्थं च द्विः प्रयोगोथवा सकृत्।प्रयोजनविभेदेन प्रयोगोपि विभिद्यते
श्राद्धार्थं तु कृताद्वृत्तिः स्याद्विद्यार्थेनाश्रमस्तथा।अनित्यनित्यसंयोगन्यायं खादिरे मत इति॥अयमर्थः
तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति श्रुतिवाक्येन परमात्मविद्यार्थं
यज्ञादयो विहिताः।गृहस्थाद्याश्रमधर्मत्वं तु यज्ञादीनां सर्वैः श्रुतिस्मृतिषु प्रसिद्धं।तत्र संशयः किं य
ज्ञादीनां द्विः प्रयोग उत सकृदिति।तत्र प्रयोजनभेदात्प्रयोगभेद इति पूर्वः पक्षः।निमंत्रितेन ब्राह्मणेन क्रिय
माणस्य भोजनस्य द्वे प्रयोजने अन्यकर्तृकश्राद्धनिष्पत्तिः स्वतृप्तिश्च न च द्विर्भुज्यते तद्वद्विद्या
र्थमनुष्ठितेन यज्ञादिकर्मणा प्रयोजनद्वयं सिध्यति।न च नित्यानित्यसंयोगविरोधः।खादिरवद्
वयाद्वयेन तदुपपत्तेः।न च खादिरत्वमुपपादितं।तस्मात्सकृदेव प्रयोग इति।एवमत्रापि सकृदेवोपवा
सं कुर्वतः काम्यप्रयोगो नित्यप्रयोगश्चेत्युभयं सिध्यति।ननु सकृदनुष्ठानेन नानार्थसिद्धिर्द्वेधा भवति ८३
तंत्रेण वा प्रसंगेन वा॥तद्यथा दर्शपूर्णमासयोः षण्णां प्रधानयागानां मध्ये त्रयाणां त्रयाणां सकृत्सकृदनु
ष्ठितेन प्रयाजाद्यंगेनोपकारः सिध्यति।तदिदं तंत्रं।पश्वर्थमनुष्ठितेन प्रयाजादिना पशुतंत्रमध्यपाति
नः पुरोडाशस्याप्युपकारः सिध्यतीत्ययं प्रसंगः।एवं च सति प्रकृतेपि तंत्रप्रसंगयोः कैतरस्योपादान
त

वेधिनी दशमी सम्यग्वेध उच्यते॥यदास्तसूर्यस्य दर्शनात्पूर्वं घटिकाद्वयमेकादशी व्याप्तं पूर्वं तु घटिकाद्वयं दशमी व्याप्तं तदानीम
ति वेध इत्युच्यते।यदा सूर्यस्य दर्शनादर्शनसंदेहकालमेकादशी व्याप्नोति ततः प्राक्कृत्स्नोप्यरुणोदयकालो दशमी व्याप्तस्त
दा महावेधः॥यदा सूर्योदयस्य ऐ सति पश्चादेकादशी प्रवृत्ता ततः प्राच्यामुदयवेलायां दशमी विद्यते तदा योगः शास्त्रानि
षेध्यो दोषो भवति॥स च वेधश्चातुरीयो भवतीति॥नन्वरुणोदयात्पूर्वमपि यदि मध्यरात्रानंतरं दशमीकला विद्य
ते तदा नोपवासस्तदा वेत्युपवासः कर्त्तव्यः।तथा च स्मृतिः॥अर्धरात्रात्परा यत्र एकादश्युपलभ्यते॥तत्रोपवासः क
र्तव्यो न तु चित्तदशमीकलेति॥अतो यथानिर्दिष्टेभ्यस्त्रिभ्यो वेधेभ्योन्योपि कश्चिद्वेधोस्तीति चेत्।मैवं॥अर्धरात्रवेधोपि यद्यप्यव
र्ज्यस्तदा किंतु वक्तव्यमरुणोदयवेध इति वक्तुमर्धरात्रवेध उपन्यस्तो न तु वेधाभिप्रायेण॥तदेव ब्रह्मकैवर्ते शौनके
न स्पष्टीकृतं॥अर्धरात्रे तु केषांचिद्दशम्या वेध उच्यते।अरुणोदयवेलायां नावकाशो विचारणे।कपालवेध इत्याहुरा ८७
चार्या ये हरिप्रियाः॥नैतन्मम मतं यस्मात्त्रियामा रात्रिरिष्यते॥इति॥य एते वेधास्ते वेधमहावेधयोगाः पूर्वमभि
हितास्तेषु त्रयोरुणोदयवेधाश्चतुर्थस्तूदयवेधस्तं चोदयकाले वेधं कृत्वाप्याह॥उदयोपरिविद्धा तु दशम्यैकादशी
यदा॥दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासन इति॥स्मृत्यंतरेपि॥दशम्याः प्रांतमाराय यदोदेति दिवाकरः॥तेन स्पृ
ष्टं हरिदिनं दत्तं जंभासुराय वै॥इति॥पंचदशनाडीवेधस्तु स्कंदपुराणे दर्शितः॥नागोद्वादशनाडीभिर्दिक्पंचदशभि

मिति चेत्॥ प्रसंगस्येति ब्रूमः॥ काम्यप्रयोगेणैव नित्यप्रयोगस्यापि सिद्धत्वात्॥ तथा च स्मृतिः॥ काम्येपि नित्यसिद्धिः स्या
त्प्रसंगेनोभयात्मकं व्रतं॥ तदेवमेकादश्युपवासस्य नित्यत्वकाम्यत्वलक्षणं द्वैरूप्यं विरोधाभावाद्द्वैरूप्यमभ्युपेयमिति
स्थितं॥ अत्रोपवासांगतिथिनिर्णयस्य वेधाधीनत्वात्प्रथमं दशमीवेधो निरूप्यते॥ स च वेधस्त्रिविधः॥ अरुणोदयवे
धः सूर्योदयवेधः पंचदशनाडीवेधश्चेति॥ तत्रारुणोदयवेधो भविष्यत्पुराणे दर्शितः॥ अरुणोदयकाले तु दशमी य
दि दृश्यते॥ सा विद्धैकादशी तत्र पापमूलमुपोषणं॥ अरुणोदयवेलायां दशम्यागंधो भवेद्यदि॥ दुष्टं तदुपयत्नेन वर्जनी
यं नराधिपेति॥ गरुडपुराणेपि॥ दशमीशेषसंयुक्तो यदि स्यादरुणोदयः॥ नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमि
ति॥ अरुणोदयस्य प्रमाणं स्कंदनारदाभ्यामुक्तं॥ उदयात्प्राक्चतस्रस्तु नाडिका अरुणोदय इति॥ तस्मिन्नरुणोद
ये वेधा बहुविधास्ते च प्रश्नोत्तराभ्यां ब्रह्मवैवर्ते दर्शिताः॥ कीदृशस्तेन वेधो योगो विप्रेंद्र कीदृशः॥ योगवेधौ ममा
चक्ष्व याभ्यां दुष्टमुपोषणं॥ चतस्रो घटिकाः पूर्वमरुणोदयनिश्चयः॥ चतुष्टयविभागोत्र वेधादीनां किलोदितः॥
अरुणोदयवेधः स्यात्सार्धं तु घटिकात्रयं॥ अतिवेधो द्विघटिका प्रभासंदर्शनाद्रवेः॥ महावेधोपि तत्रैव दृश्यते को न
न दृश्यते॥ तुरीयस्तत्र विहितो योगः सूर्योदये बुधैरिति॥ अयमर्थः॥ वेधातिवेधमहावेधयोगाश्चत्वार उपवासस्य
दूषकाः॥ तत्र रवेः प्रभासंदर्शनाद्रवेः पूर्वं सार्धघटिकात्रयमेकादश्या व्याप्तं ततः प्राचीने घटिकार्धेऽरुणोदये स

त्या॥ ततोष्टादशनाडीभिर्दूषयंत्युत्तरां तिथिमिति॥ तदेवं वेधत्रयं निरूपितं॥ तत्र पंचदशनाडीवेधस्य वेधांतरस्य च विष
यव्यवस्था निगमे दर्शिता॥ सर्वप्रकारवेधोयमुपवासस्य दूषकः॥ सार्धसप्तमुहूर्तस्तु वेधोयं बाधते व्रतमिति॥ सर्वप्रका
र इत्यत्र प्रकारशब्देन कलाकाष्ठादयो वेधातिवेधादयो वा गृह्यंते नात्र तिथ्यंतरवत्त्रिमुहूर्तत्वं वेधे पेक्षितं किंतु लवकला
र्धादिकमपि पर्याप्तं॥ तदुक्तं नारदीये॥ लववेधेपि विप्रेंद्र दशम्यैकादशीं त्यजेत्॥ सुराया बिंदुना स्पृष्टं गंगांभ इव निर्मलमिति॥
स्कंदपुराणेपि॥ कलाकाष्ठादिगत्यैव दृश्यते दशमी विभो॥ एकादश्यां न कर्तव्यं व्रतं राजन्कदाचनेति॥ स्मृत्यंतरेपि॥ क
लार्धेनापि विद्धा स्याद्दशम्यैकादशी यदि॥ तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेदिति॥ सोयं कलाकाष्ठादिवेधोरुणोदयसू
र्योदये च समानः॥ तत्रारुणोदयवेधो वैष्णवविषयः॥ तच्च गारुडपुराणे विस्पष्टमवगम्यते॥ दशमीशेषसंयुक्तो य
दि स्यादरुणोदयः॥ नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमिति॥ वैखानसपंचरात्रवैष्णवागमोक्तदीक्षां प्राप्तो वैष्णवः॥
अत एव स्कंदपुराणे वैष्णवस्य रूपमभिहितं॥ परमापदमापन्नो हर्षे वा समुपस्थिते॥ नैकादशीं त्यजेद्यस्तु यस्य दीक्षा
स्ति वैष्णवी॥ समात्मा सर्वजीवेषु निजाचारादविप्लुतः॥ विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यत इति॥ विष्णुपुराणे
पि॥ न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे॥ न हरति न च हंति किंचिदुच्चैः सितमनसं तमवे
हि विष्णुभक्तमिति॥ यथोक्तगुणसंपन्नो वैष्णवदीक्षां प्राप्तो यस्तं प्रति तिथिरेवं निर्णेया॥ एकादशी द्विविधात्र

रुणोदयवेधवती शुद्धा चेति॥ तत्र वेधवती सर्वथा त्याज्या नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतमिति स्कंदपुराणे
सामान्येन प्रतिषेधात्॥ विशेषस्तु संपृक्तादिप्रतिषेधोऽद्रष्टव्यः॥ यद्यप्येते वेधातिवेधमहावेधयोगाख्या अष्टौ शास्त्रे ख्याता दो
षाः पूर्वमुक्तास्तेषु सत्सु एकादशी संपृक्त संदिग्ध संयुक्त संकीर्णनामभिर्व्यवह्रियते॥ अरुणोदयस्य प्रथमघ
टिकायां दशमीसद्भावो वेध उक्तः स च द्विविधः॥ घटिकाप्रारंभे तत्तद्घटिकायां च दशमीदृष्टिभेदात् तत्र प्रारंभमा
त्रदशमीयुक्तैकादशी संपृक्तेत्युच्यते॥ न तत्र घटिकाद्वित्रिदशमीसद्भावयुक्तैकादशी संदिग्धा॥ अरुणोदयप्रथममु
हूर्ते दशमीव्याप्तिर्वेधः तदुपेतैकादशी संयुक्तेत्युच्यते॥ सूर्यमंडलदर्शनसंदेहवेलायां दशमीसद्भावो वेधः तद्युक्ते
कादशी संकीर्णेत्युच्यते॥ सूर्यमंडलदर्शनसंदेहवेलायां ता एताः संपृक्ताद्य संपृक्ताद्यश्चैतास्तोपि त्याज्यास्त
था च गोभिलः॥ अरुणोदयवेलायां दशमी यदि संगता॥ संपृक्तैकादशीं तां तु मोहिन्यै दत्तवान् विभुरिति॥ गरुड ८८
पुराणे॥ उदयात्प्राक् त्रिघटिकाव्यापिन्यैकादशी यदा॥ संदिग्धैकादशी नाम वर्ज्येयं धर्मकांक्षिभिः॥ उदयात्प्राक्
त्रिमुहूर्तेन व्यापिन्यैकादशी यदा॥ संयुक्तैकादशी नाम वर्जये दुर्मतिद्वये॥ आदित्योदयवेलाया आरभ्य षष्टि
नाडिकाः॥ संकीर्णैकादशी नाम त्याज्या धर्मफलेप्सुभिः॥ पुत्रपौत्रार्थवृद्ध्यर्थं द्वादश्यामुपवासयेत्॥ तत्र क्रतुश

तं फलं त्रयोदश्यां तु पारणमिति॥ यद्यपि पूर्वत्र वेधवाक्ये सार्धं तु घटिकात्रयमित्युक्तं॥ अत्र तु संदिग्धैकादशीवाक्ये
त्रिघटिकेत्युक्तं तथापि नैतावता वैषम्येण विरोधः शंकनीयः॥ शास्त्रद्वयस्यापि दशमीवेधत्यागपरत्वात्॥ तदेवं
सामान्यविशेषाभ्यां प्रतिषिद्धत्वादरुणोदयविद्धैकादशी वैष्णवेन परित्याज्या यस्तु योगसंज्ञकश्चतुर्थो वेधस्त
स्य त्याज्यत्वमर्थात्सिद्धं॥ अरुणोदयवेधोपि यदा त्यज्यते तदा किमु वक्तव्यं सूर्योदयवेध इति॥ वचनं त्वत्र भग
वतोक्तं पूर्वमेवोदाहृतं॥ या तु चतुर्विधरहिता शुद्धैकादशी सापि द्विधा आधिक्येन युक्ता तद्रहिता च॥ आधिक्यं
च त्रिविधं॥ एकादश्याधिक्यं द्वादश्याधिक्यं त्रयाधिक्यं चेति॥ त्रिष्वप्येतेष्वरुणोदयमारभ्य प्रवृत्तां शुद्धाम
प्येकादशीं परित्यज्य परेद्युरुपवासः कर्तव्यः॥ तत्रैकादश्याधिक्ये नारद आह॥ संपूर्णैकादशी यत्र द्वादश्यां वृ
द्धिगामिनी॥ द्वादश्यां लंघनं कार्यं त्रयोदश्यां तु पारणमिति॥ स्मृत्यंतरेपि॥ एकादशी यदा पूर्णा परतः पुन
रेव सा॥ पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणमिति॥ विष्णुरहस्येपि॥ एकादशी कलाव्याप्ये न द्वादश्युपो
षिता॥ पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणमिति॥ द्वादश्याधिक्ये व्यास आह॥ एकादशी यदा लुप्ता पर
तो द्वादशी भवेत्॥ उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमिति॥ उभयाधिक्ये गुरुराह॥ संपूर्णैकादशी यत्र
प्रभाते पुनरेव सा॥ तत्रोपोष्या द्वितीया तु परतो द्वादशी यदीति॥ स्मृत्यंतरेपि॥ एकादशी तु संपूर्णा परतो द्वा
नारदेपि॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ सर्वैरेवोत्तरा कार्या परतो द्वादशी यदीति॥ २

ना दशी यदि॥ एकादशीं परित्यज्य द्वादश्यां समुपोषयेदिति। अन्याधिक्यरहितायां तु शुद्धायां न कोपि संदेहोऽस्ति॥ इति वे
धवर्जिता शुद्धा एकादशी निर्णीता॥ ॥ अथ श्रौतस्मार्तपर्यवसितानां पांचरात्रादिदीक्षारहितानामेकादशीनिर्णय
ते॥ अरुणोदयवेधस्य वैष्णवविषयत्वेन व्यवस्थितेस्सूर्योदयवेधः स्मार्तानुष्ठायिविषयत्वेन परिशिष्यते॥ अत एव
वस्मन्नैर्यते॥ इति वेधा महावेधा ये वेधास्तिथिषु स्मृताः॥ सर्वेष्ववेधा विज्ञेया वेधः सूर्योदये मत इति॥ एवं वस्त
र्येदियवेधमपेक्ष्यैकादशी द्विधा भिद्यते शुद्धा विद्धा चेति॥ तत्रैव तस्यां शुद्धायां पूर्ववच्चातुर्विध्यं भवति॥ एकादश्याधिक्यं
द्वादश्याधिक्यमुभयाधिक्यमनुभयाधिक्यं चेति॥ एवं च विद्धायामपि चत्वारो भेदा भवन्ते याः॥ शुद्धायामेकादश्याधि
क्ये द्वयोस्तिथ्योरुपवासयोग्यतामाह वृद्धवसिष्ठः॥ संपूर्णैकादशी प्रभाते पुनरेव सा॥ लुप्यते द्वादशी तस्मिन् न उपवा
सः कथं भवेत्॥ उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति॥ उभयोरधिकारिभेदेन व्यवस्था स्कंदपुराणे दर्शिता॥
प्रथमेहनि संपूर्णा व्याप्याहोरात्रसंयुता॥ द्वादश्यां च तथा तात दृश्यते पुनरेव च॥ पूर्वां कार्या गृहस्थैस्तु यतिभि ८९
श्चोत्तरा विभो इति॥ एतच्च परेद्युर्द्वादश्यभावविषयं तथा च स्मृत्यंतरे पुनः प्रभातसमये घटिकैका यदा
भवेत्॥ अत्रोपवासो विहितश्चतुर्थाश्रमवासिनां॥ विधवायाश्च तत्रैव परतो द्वादशी न चेदिति॥ गारुडपुरा
णेपि॥ पुनः प्रभातसमये घटिकैका यदा भवेत्॥ अत्रोपवासो विहितो वनस्थस्य यतेस्तथा॥ विधवायाश्च

तत्रैव परतो द्वादशी न चेदिति॥ द्वादश्याधिक्ये पूर्वेद्युरुपवासमाह नारदः॥ न चेदेकादशी विष्णोर्द्वादशी परतः स्थिता॥ उपोष्यैकादशी त
त्र यदीच्छेत्परमं पदमिति॥ स्कांदेपि॥ शुद्धा यदा समा हीना वा सम्पूर्णाधिकोत्तरा॥ एकादश्यामुपवसेन्नक्रमुर्द्धां वैष्णवीमपीति॥ दश
मीवेधरहिता शुद्धैकादशी परेद्युरुदयादूर्ध्वं नास्ति किंतूदये समा ततो न्यूना वा द्वयोरपि पक्षयोर्द्वादशी परेद्युरुदये समा न्यूनाधिका
वा भवति तत्र सर्वत्र शुद्धैकादश्युपोष्या न तु विद्धा वैष्णवैर्द्वादशीमुपवसेदित्यर्थः॥ एवं च सति प्रसक्ते द्वादश्याधिक्येपि एकादशीस
मन्यूनयोरन्यतरत्वात्प्रथमैवोपोष्या इत्युक्तं भवति॥ उभयाधिक्ये परेद्युरुपवासो गारुडपुराणे दर्शितः॥ संपूर्णैकादशी यत्र प्रभा
ते पुनरेव सा॥ तत्रोपोष्या परा पुण्या परतो द्वादशी यदीति॥ वाराहपुराणेपि॥ एकादशी विवर्धेत द्वादशी परतः स्थिता॥ उपोष्या द्वा
दशी तत्र यदीच्छेत्परमं पदमिति॥ स्मृत्यंतरेपि॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ वैष्णवी च त्रयोदश्यां घटिकैकापि दृश्य
ते॥ गृहस्थोपि परां कुर्यात्पूर्वां नोपवसेत्तदा॥ पूर्णाप्येकादशी त्याज्या वर्धते द्वितयं यदीति॥ एवमेकैकाधिक्ये द्वितीयाधिक्येपि
निर्णयो दर्शितः॥ अनुभयाधिक्ये तु नास्ति संदेहः॥ इति शुद्धायां चत्वारो भेदा व्यवस्थापिताः॥ अथ विद्धायां चत्वारो भेदा व्य
वस्थाप्यंते॥ तत्राप्येकादश्याधिक्ये पूर्ववद्गृहियत्योर्व्यवस्था द्रष्टव्या॥ तदाह प्रचेताः॥ एकादशी विवर्धेत चेच्छुक्ले कृष्णे विशे
षतः॥ उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृहीति॥ न चैतद्वाक्यं शुद्धाधिक्ये चरितार्थमिति शंकनीयं॥ बाधकाभावेन विद्धा
धिक्येपि तद्वचनप्रवृत्तेर्निवारयितुमशक्यत्वात्॥ द्वादश्याधिक्ये परेद्युरुपवासः॥ तदाह व्यासः॥ एकादशी यदा लुप्ता परतो द्वा

श्रीनेत्॥ उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमिति॥ शुद्धाऽऽद्या दशमीमिश्रत्वात्परतो वृद्ध्यभावाच्च त्यज्यते। त्रिसा वृद्धा
उभयाधिक्ये परैव सर्वेषामुपवासः॥ तदुक्तं भविष्यत्पुराणे॥ एकादशी दशायुक्तां वर्द्धमानां विवर्जयेत्॥ त्रयमार्गस्थिते सोमे कु
र्यात्तद्दशमीयुतामिति॥ उभयानाधिक्ये तु नैव संदेहः॥ कोऽप्यंतराभावात्॥ न च विद्धत्वादस्ति संदेह इति वाच्यं॥ अस
ति कोऽप्यंतरे विद्धाया अप्युपादेयत्वात्॥ तथा च विष्णुरहस्ये॥ एकादशी भवेत्काचिद्दशम्या दूषिता तिथिः॥ वृद्धिपक्षे न वै
दोषः क्षयपक्षे तु पुण्यदेति॥ इति विद्धाभेदा व्यवस्थापिताः॥ अत्रेदं॥ विद्धयोरप्येष निर्णयसंग्रहः॥ एकादशीद्वादश्योर्वृ
द्ध्योरपि शुद्धोपरैव सर्वेषामुपवासः॥ द्वयोरप्यवृद्धौ पूर्वेद्युः॥ एकादशीमात्रवृद्धौ गृहस्थयत्योर्व्यवस्था॥ द्वादशीमात्रवृद्धौ शुद्धा
यां सर्वेषां पूर्वेद्युः॥ विद्धायां परेद्युरिति॥ तदेवं शास्त्रार्थे व्यवस्थिते यानि यावंति मुनिवाक्यानि बाधकानि निषे

धकानि विधीतानि सर्वाणि यथोक्तनिर्णयाविरोधेन व्यवस्थापनीयानि। तत्र व्यवस्थापनप्रकारं
प्रदर्शयामः। स्कंदपुराणे। प्रतिपत्प्रभृतयः सर्वा उदयादोदयाद्रवेः संपूर्णा इति विख्याता हरिवासरव
र्जिता इति। हरिवासरे तु संपूर्णत्वं प्रकारांतरेणोक्तं गरुडपुराणे। उदयात्प्राक् यदा विप्र मुहूर्तद्वय
संयुता॥ संपूर्णैकादशी ज्ञेया तत्रैवोपवसेद्गृही इति। भविष्यत्पुराणेपि। आदित्योदयवेलायाः प्राक्
मुहूर्तद्वयान्विता। एकादशी तु संपूर्णा विद्धान्या परिकीर्तिता। इति। तदेतद्वचनमरुणोदयवेधोपजीवे
न नप्रवृत्तत्वाद्वैष्णवविषयं। दशमीवेधनिंदकानि तु वचनानि द्विविधान्युपलभ्यंते कानिचिदरुणोद
यानुवादेन प्रवृत्तानि कानिचित्तदननुवादेनेति। तथा भविष्यत्पुराणे। अरुणोदयकाले तु दशमी यदि
दृश्यते। तत्र नैकादशी कार्या धर्मकामार्थनाशिनी इति। कौर्मे। अरुणोदयवेलायां विद्धा काचिदुपो
षिता। तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत्। एतादृशानि सर्वाणि वैष्णवविषयाणि द्रष्टव्यानि।
अरुणोदयानुवादमंतरेण दशमीविद्धानिंदकानि वचनान्युपलभ्यंते। तद्यथा नारदः। दशम्यनुगता
यत्र तिथिरेकादशी भवेत्। तत्रापत्यविनाशश्च परेत्य नरकं व्रजेत्। इति। ब्रह्मवैवर्ते। दशमीशेषसंयुक्तां
यः करोति विमूढधीः। एकादशीफलं तस्य न स्याद्द्वादशवार्षिकमिति। विष्णुरहस्येपि। दशमीशेषसंयुक्तामु
पोष्यैकादशीं क्रिया। संवत्सरकृतेनेह नराधर्मेण मुच्यत इति। ईदृशानि सर्वाण्यरुणोदयवेधस्पर्शोदयवे

घद्वयसामान्येन जयन्त्यादौ स्वस्मार्त्तोभयविषयाणि। तत्रैव वैष्णवविषये निरंकुशं प्रवर्त्तते स्मार्त्तविषये तत्सबा
धिकविद्धाद्याधिके च सर्वपुरुषविषयाणि द्रष्टव्यानि। दशमीविद्धाप्यनुज्ञापकानि कानिचिद्वचनान्युपलभ्यंते तद्
यथा स्कंदपुराणे। त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन। उपोष्यैकादशी तत्र दशमीमिश्रितापि चेति। स्मृत्यंतरे।
उपोष्यैकादशी तत्र द्वादशी न भवेद्यदि। दशम्यापि हि मिश्रैव एकादश्येव धर्मरूपिणीति। वृद्धवसिष्ठः। द्वादशी स्वल्प
मप्यापि यदि न स्यात्परेहनि। दशमीमिश्रिता कार्या महापातकनाशिनीति। ऋष्यशृंगः। एकादशी न लभ्येत सक
ला द्वादशी भवेत्। उपोष्या दशमीविद्धा ऋषिरुद्दालकोऽब्रवीत्। हारीतोपि। त्रयोदश्यां यदा न स्याद् द्वादशी घटि
कादयं। दशम्येकादशी विद्धा सैवोपोष्या सदा तिथिरिति। एतादृशानि वाक्यानि सर्वाण्यपि यथायोग्यं सर्व
पुरुषविषयाणि। एकादश्यादिवृद्ध्या तु गृहस्थमात्रविषयाणि द्रष्टव्यानि। न त्वेतानि वैष्णवविषयाणि
वैष्णवप्रकरणे श्रुतिविद्धाप्यनुज्ञाया अदर्शनात्।। संपूर्णैकादशीपरित्यागविषयाणि कानिचिद्वचनान्यु
पलभ्यंते तद्यथा स्कंदपुराणे। एकादशी भवेत्पूर्णा परतो द्वादशी यदि। तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपो
षयेत्। इति कालिकापुराणेपि। एकादशी यदा पूर्णा परतो द्वादशी भवेत्। उपोष्या द्वादशी तत्र तिथिवृद्धिः ९१
प्रशस्यत इति। गरुडपुराणे। पूर्णा भवेद्यदा नंदा द्वादशी चैव विवर्धते। तदोपोष्या तु भद्रा स्यात्तिथिवृद्धिः प्रश
स्यत इति। ईदृशानि सर्वाणि वैष्णवविषयाणि। दिनत्रयविषयाणि कानिचिद्वचनान्युपलभ्यंते। यदा

नारदः। यदि दैवात्तु संस्पृशेदेकादश्यां तिथित्रयं। तत्र क्रतुशतं पुण्यं द्वादश्यां पारणे भवेदिति। कूर्मपुराणेपि। द्वि
स्पृगेकादशी यत्र तत्र संनिहितो हरिः। तामेवोपवसेत्काममकामो विष्णुतत्परः इति। अत्राद्यंतयोर्दशमीद्वा
दश्योर्मध्ये एकादशीत्येतादृशं दिनत्रयं यदा प्राप्नोति तदा परतो द्वादशीवृद्धिश्चेत्सत्यं संभवति। तत्र यद
वृद्धिस्तदा दिनत्रयं यथोक्तमुपोष्यं तदुक्तं पुराणांतरे। दिनत्रयमतेरेविनोपोष्या दशमीयुता। से
वोपोष्या सदा पुण्या परतश्चेत्त्रयोदशीति। द्वादशीवृद्धावेकादशी यदा लुप्ते तदानेन व्यासवचनेन परेद्युरु
पवास इति पूर्वमेव निर्णीतं। यदा त्वाद्यंतयोरेकादशीत्रयोदश्योर्मध्ये द्वादशीत्येतादृशं दिनत्रयं तदा नोप
न स्मर्यते। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणमिति। एकाद
शी द्वादशी चैव रात्रिशेषे त्रयोदशी। त्रिस्पृशा नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहतीति। तदेतद्वैष्णवविषयं यति
विषयं वा द्रष्टव्यं। गृहस्थे तु तन्निषिद्धं। तथा च कूर्मपुराणे। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। उ
पवासं न कुर्वीत पुत्रपौत्रसमन्वित इति। पद्मपुराणे। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। अतः स्य
कुलक्षयात्तत्र नोपोष्यं तत्सुतार्थिभिरिति। यत्तु स्पृष्टंगेनोक्तं। अविद्धानि निषिद्धैश्चेन्न लभ्यंते दिनानि
तु मुहूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिरिति। तदर्धविद्धान्यन्यानि दिनान्युपवसेद्बुधः। सर्व
विद्धा न कर्तव्या षष्ठ्येकादश्यथाष्टमी। एकादशीं तु कुर्वीत सदीयते द्वादशी यदीति। अत्र निषेधो यति

विषयः। विधिर्गृहस्थविषयः वेधबाहुल्येनं हि यत्वशंकामाभूदिति यंचभिर्मुहूर्तैरित्युक्तं। तदेवना
नाविधवचनव्यवस्थापनप्रकारो व्यक्तसादितः। अन्यथाप्यस्मत्सामर्थ्यबुद्ध्या व्यवस्थापयितुं शक्यो
त्येव। इत्युपवासतिथिर्निरूपिता॥ ॥अथाधिकारी निरूप्यते। तत्र नारदः। अष्टवर्षाधिको म
र्त्यो ह्यपूर्णाशीतिहायनः। भुंक्ते यो मानवो मोहादेकादश्यां स पापकृदिति। कात्यायनोपि। अष्टवर्षाधिको
मर्त्यो ह्यशीतिर्न्यूनवत्सरः। एकादश्यामुपवसेत्पक्षयोरुभयोरपीति। गृहस्थस्य शुक्लैकादश्यामेव नित्योप
वासः। तथा च कूर्मपुराणे। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति। वानप्रस्थो यतिश्चैव शुक्लामेव सदा गृ
ह्णीति। न विष्णोत्तरे। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। ब्रह्मचारी च नारी च शुक्लामेव सदा गृह्णीति। नारी वि
धवा। तस्या एव पतिधर्मतात्। पतिमत्यास्तु सवासंनिषेधाति विष्णुः। पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्।
आयुष्यं हरते भर्तुर्नरकं चैव गच्छतीति। मनुः। नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणमिति। मार्कंडे
यः। नारी त्वननुज्ञाता भर्त्रा पित्रा सुतेन वा। निष्फलं तु भवेत्तस्या यत्करोति व्रतादिकमिति। आदिपाद्ये
वस्त्रालंकारगंधधूपांजनानामुपसंग्रहः। तदाह मनुः। पुष्पालंकारवस्त्राणि गंधधूपानुलेपनमिति। पत्यु ९२
रनुमत्या तु पत्नी व्रतादिकेप्यधिकारिणी भवति। तदाह कात्यायनः। नार्यपि तु मते नैव व्रतादिमाचरेत्सदेति॥
शुक्लामेवेत्येवकारः कृष्णैकादश्यामुपवासनिषेधपरः। तथा च कूर्मपुराणे। संक्रांत्यां कृष्णपक्षे च रविशु
क्रदिने तथा। एकादश्यां न कुर्वीत उपवासं च पारणमिति। गौतमोपि। आदित्येहनि संक्रांतावसिते का

दशीषु च। व्यतीपाते कृते श्राद्धे पुत्री नोपवसेद्गृहीति। अत्र पुत्रीति विशेषणं पुत्रवतो दोषप्रदर्शनार्थं। तथा
च पद्मपुराणे। संक्रांत्यामुपवासेन पारणेन युधिष्ठिर। एकादश्यां च कृष्णायां ज्येष्ठपुत्रो विनश्यतीति।
नारदीयेपि। इंदुसूर्यदिने संक्रांतावेकादश्यां सितेतरे। उपवासं न कुर्वीत यदीच्छेत्संततिं ध्रुवमिति। अत्र संक्रां
त्यादिष्वपवासनिषेधः संक्रांत्यादिनिमित्तकः नैकादशीनिमित्तकः। तथा च कात्यायनः। एकादशीषु कृष्णा
सु रविसंक्रमणे तथा। चंद्रसूर्योपरागे च न कुर्यात्पुत्रवान्गृहीति। तत्र पुत्रोपवासस्य निषेधोयं गृ
हतः। नानुषंगकृतो ग्राह्यो लोपतो नित्यमुपोषणमिति। अयमर्थः। एकादश्युपवासस्य नित्यत्वात्संक्रां
त्याद्युपवासस्य नित्यत्वात् संक्रांत्याद्युपवासस्य काम्यत्वात् काम्योपवासनिषेधेन नित्योपवासनिषे
धः सिध्यतीति संक्रांत्यादिनिमित्तकोपवासः सर्वत्रैनोक्तः॥ अमावास्या द्वादशी च संक्रांतिश्च विशेषतः।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च। अत्र स्नानं जपो होमो देवतानां च पूजनमिति। उपवासस्तथा दान
मेकैकं पावनं स्मृतमिति। गृहस्थस्य तु शुक्लायामेव नित्योपवास इत्युक्तं। नैमित्तिककाम्योपवासौ तु कृष्णा
यामपि कर्तव्यौ। तत्र नैमित्तिकः स्मृतिसंग्रहे पठ्यते। शयनीबोधिनीमध्ये या कृष्णैकादशी भवेत्। सैवोपोष्या
गृहस्थेन नान्या कृष्णा कदाचनेति। काम्या स्कंदपुराणे। पितॄणां गतिमन्विच्छन् कृष्णायां समुपोषये
दिति। सनत्कुमारसंवादानुवारेण संयुक्ता कृष्णा संक्रांतिसंयुता। एकादशी सदोपोष्या सर्वसंपत्करी तिथि
रिति। मत्स्यपुराणेपि। एकादश्यां तु कृष्णायामुपोष्य विधिवन्नरः। पुत्रानायुः समृद्धिं च सायुज्यं च स

भवतीति। दिनक्षये पुत्रवतो गृहस्थस्योपवासो निषिद्धः। तथा च पितामहः। एकादश्यां दिनक्षयेणोपवासं क्र
मेतियः। तस्य पुत्रा विनश्यन्ति मघायां पितृदोषयथेति। मत्स्यपुराणेपि। दिनक्षयेर्कसंक्रान्तौ ग्रहणे चन्द्रसूर्ययोः
उपवासं न कुर्वीत पुत्रपौत्रसमन्वित इति। दिनक्षयलक्षणं पद्मपुराणे। क्षेतिथ्यन्तावेकवारे यस्मिन् स स्यात्तद्दिनक्ष
यः इति। वसिष्ठोपि। एकस्मिन्सावने त्वह्नि तिथीनां त्रितयं यदा तदा दिनक्षयः प्रोक्तः तत्र साहस्रिकं फलमिति फल
मत्रोपवासस्यातिरिक्तदानादिजन्यं द्रष्टव्यं। उपवासस्य निषिद्धत्वात्। दृष्टविषये किं कर्तव्यमित्याकांक्षायां वायुपुराणे
पद्यते। उपवासे निषिद्धे तु नक्तं किंचित्प्रकल्पयेत्। न दुष्यत्युपवासेन उपवासफलं लभेत्। नक्तं हविष्यान्नमनोदनं
वा फलं तिलाः क्षीरमथाम्बु वाज्यं। यत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं चेति। उपवासासमर्थस्य एकभक्ता
दीनि कुर्यात्। तथा च स्मृतिः। उपवासेष्वशक्तानामशीतेरूर्ध्वजीविनां। एकभक्तादिकं कार्यमाह बौधायनो मुनिरिति।
मार्कण्डेयपुराणे। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन दानेन न निर्द्वादशिको भवेदिति। कूर्मपुराणेपि
एकभक्तेन नक्तेन सालगृहातुरः क्षिपेत्। नातिक्रमेद्द्वादशीं तु उपवासव्रतेन वा। एकभक्तेन नक्तेन बालवृद्धातुरः
क्षिपेत्। पयोमूलफलं वापि न निर्द्वादशिको भवेत्। भविष्यपुराणेपि। एकादश्यामुपवसेन्नक्तं वापि समाचरेत्। ९३
नित्यकाम्ययोरशक्तास्तत्प्रतिनिधिभिर्व्रतं कारयेयुः। तथा च विष्णुरहस्ये। असामर्थ्ये शरीरस्य व्रते च समुपस्थि
ते। कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितमिति। पैठीनसिः। भार्या पत्युर्व्रतं कुर्यात् भार्यायाश्च पतिर्व्रतं। अ
सामर्थ्ये परस्ताभ्यां व्रतभंगो न जायते। स्कन्दपुराणे। पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा। एषामभावएवान्यं

ब्राह्मणं विनियोजयेत्। भ्रातरं भगिनीं शिष्यं कारयेद्ब्राह्मणादिभिरिति। स्मृत्यन्तरेपि। पितृमातृपतिभ्रातृश्वश्रू
गुर्वादिमृत्युजां। उद्दिश्यार्थमुपोषित्वा स्वयं च फलभाग्भवेदिति। कात्यायनः। पितृमातृस्वसृभ्रातृगुर्वर्थे च विशेषतः
९ उपवासं प्रकुर्वाणः पुण्यं शतगुणं भवेत्। दक्षिणा नात्र दातव्या शुश्रूषा विहिता च सा। नारी च पतिमुद्दिश्य एकादश्यामु
पोषिता। पुण्यं शतगुणं प्राहुर्मुनयः पारदर्शिनः। उपवासफलं तस्याः पतिः प्राप्नोत्यसंशयं। राज्यस्थे क्षत्रियार्थे
च एकादश्यामुपोषितः। पुरोधाः क्षत्रियस्यार्धं फलं प्राप्नोति निश्चितं। पितामहादीनुद्दिश्य एका
दश्यामुपोषिते। एते तु तत्फलं विप्राः समग्रफलमाप्नुयुः। कर्ता दशगुणं पुण्यं प्राप्नोत्यत्र न संशय
य मुद्दिश्य कृतं सोपि सन्मार्गं फलमाप्नुयात्। प्रतिनिधौ च कश्चिद्विशेषः स्मर्यते। काम्ये प्रति
निधिर्नास्ति नित्ये नैमित्तिके च सः। काम्ये ह्युपक्रमादूर्ध्वं केचित्प्रतिनिधिं विदुरिति। अयमर्थः
नित्यं नैमित्तिकं च प्रतिनिधिनाप्युपक्रम्य कारयेत्। काम्यं तु स्वसामर्थ्यं परीक्ष्य स्वयमेवोपक्रम्य
कुर्यात्। असामर्थ्ये तूपक्रमादूर्ध्वं प्रतिनिधिनापि कारयेत्। उपवासाकरणे प्रायश्चित्तं स्मर्यते।
अष्टम्यां च चतुर्दश्यां दिवा भुक्त्वैव दं चरेत्। एकादश्यां दिवारात्रौ नक्तं चैव तु पर्वणीति। स्मृत्यन्
तरे। अर्कपर्वद्वये रात्रौ चतुर्दश्यष्टमीदिवा। एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत्॥
अथ काम्योपवासक्रमः। तत्राङ्गिराः। सायमाद्यन्तयोरह्नोः सायं प्रातश्च मध्यमे। उपवा

सफलं वै स्मृतिर्याज्ञ॰ चतुष्टयमिति देवलः दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः। एकादशीमुप
वसेत्तु स्त्रीसेवनयोरपि। देवतास्य तुष्यन्ति कामितं तस्य सिध्यतीति। बृहस्पतिरपि। दिवानिद्रां परान्नं च
पुनर्भोजनमैथुने। क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत्। कूर्मपुराणे कांस्यं मांसं मसूरांश्च चणकान्
कोरदूषकान्। शाकं मधु परान्नं च त्यजेदुपवसन्स्त्रियमिति। स्मृत्यन्तरेऽपि शाकं मांसं मसूरांश्च पुनर्भोजन
मैथुने। द्यूतमत्यम्बुपानं च दशम्यां वैष्णवस्त्यजेत्। विष्णुधर्मे असंभाष्यान्हि संभाष्य तुलस्यामलकीदलं।
आमलक्याः फलं वापि पारणे प्राश्य शुध्यति। असकृज्जलपानं च दिवास्वापं च मैथुनं। ताम्बूलचर्वणं मांसं वर्ज
येद्व्रतवासर इति। वसिष्ठः उपवासे तथा श्राद्धे न खादेद्दन्तधावनं। दन्तानां काष्ठसंयोगे हन्ति सप्त कुलानि
चेति। दन्तधावने प्रायश्चित्तं च विष्णुरहस्ये श्राद्धोपवासदिवसे खादित्वा दन्तधावनं। गायत्र्याः शतसंपूत
मम्बु प्राश्य विशुध्यतीति। हारीतः पतितपाखण्डिनास्तिकसंभाषणानृताश्लीलादिकमुपवासादिषु
वर्जयेदिति। कूर्मपुराणे बहिर्ग्रामान्त्यजान्सूतिं पतितं च रजस्वलां। न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासर ५४
इति। विष्णुरहस्ये स्मृत्यालोकनगन्धादिस्वादनपरिकीर्तनं। अन्नस्य वर्जयेत्सर्वं ग्रासानां चाभिकां
क्षणं। गात्राभ्यंगं शिरोभ्यंगं ताम्बूलं चानुलेपनं। व्रतस्थो वर्जयेत्सर्वं यच्चान्यच्च निराकृतमिति ब्रह्मां
डपुराणेऽपि कांस्यं मांसं मसूरान्नं क्षौद्रं लोभं वितथभाषणं। व्यायामं च प्रवासं च दिवास्वप्नं तथाञ्जनं। तिल
पिष्टं मसूरांश्च द्वादश्यैतानि वैष्णवः। द्वादश्यां वर्जयेन्नित्यं सर्वपापैः प्रमुच्यत इति। एकादश्यां श्राद्ध

तत्वापित्रन्नोक्तव्यं। तथा कात्यायनः। उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्। उपवासं तदा कुर्यादाघ्रा
य पितृसेवितमिति। तथा। मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदा। अभ्यर्च्य पितृदेवांश्च आजिघ्रेत्पितृसे
वितमिति। यत्तु वचनं। श्राद्धं कृत्वा तु यो विप्रो न भुंक्ते पितृसेवितं। हविर्देवा न गृह्णन्ति कव्यं च पितरस्तथेति।
तदेकादशीव्यतिरिक्तविषयं। आघ्राणेनापि भोजनकार्यं सिध्यति। तस्य भोजनकार्यविधानात्। अप
रेद्युर्व्रतानुष्ठानक्रमः। प्रथमं दशम्यामेकभक्तं कृत्वा अनंतरं दन्तधावनं कुर्यात्। तथा च स्मर्यते। दशम्या
मेकभुक्त्वा खादेद्दन्तधावनमिति। तदनंतरं दशम्यां रात्रौ नियमग्रहणं कुर्यात्। तदुक्तं ब्रह्मवैवर्ते
प्राशे हरिदिने सम्यक् विधाय नियमं निशि। दशम्यामुपवासस्य प्रकुर्याद्वैष्णवं व्रतमिति। नियमो ना
रदीये स्मर्यते। अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः। अवनितल्पशयनाः प्रियासंगविवर्जित
इति। ततः प्रातः स्नात्वैकादश्यां बाह्यान्तरशुद्धिं विदध्यात्। तस्य प्रकारः। शारीरमंतःकरणोपघा
तं वाचश्च विष्णुर्भगवानशेषांशमं नयत्वित्युक्त्वा मम हृदयस्य पापादनं ते हरिः संनिविष्टः। अतः शुद्धिर्बहिः
शुद्धिं शुद्धो धर्ममयो व्रतः। स करोतु मम येतस्मिन् शुचि विरेचामि सर्वदा। बाह्योपघातान्ननघोषो हं श्री
भगवानजः। शमं नयत्वनंता त्वाविष्णुश्चेतसि संस्थितः। अनंतरं प्रातः संकल्पं कुर्यात्। तदुक्तं वारा
हपुराणे गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु गृह्णीयाद्यद्वा धारयेद्बुध इति। अद
बरेता प्रपात्रे स्थितं ममाह विष्णुः। एकादश्यां निराहारः स्थित्वाहमपरेऽहनि। भोक्ष्यामि पुंडरीकाक्ष शर

णामेभवान्कृतांहृत्वाश्चार्यततोविद्वान्पुष्पांजलिमर्पयेत्। अनंतं [illegible] रंतस्यात्रगतेनस्वंपिबेत्। तदाप
कात्यायनः। अष्टाक्षरेण मंत्रेण त्रिर्जप्त्वाभिमंत्रितं। उपवासफलप्रेप्सुः पिबेत्साचमनं त्वमितितिविद्धैका
दश्यामुपवासेरात्रौ संकल्पः। तथा च नारदीये। विद्धोपवासस्य कथं दिने तस्मिन्समाहितः। रात्रौ संकल्पयेद्विष्णु
सं कृत्वा ततदा च रदिति। मध्यरात्रादुपरि दशमीयुक्तायां वैकादश्यां। सप्तमं याह्नस्योपरि संकल्पः। तथा च स्कं
दे। दशम्याः संगते येन मध्यरात्रात्परेणतु। वंशं तस्य श्रुतु रोयामानसंकल्पार्थं नयोः सदेति। एकादश्यां रवस्योप
रि पुष्पमंडपं कार्यं नाम तदुक्तं ब्रह्मपुराणे। एकादश्यामुपोष्येव निराहारः समाहितः। नानापुष्पैर्मुनिश्रेष्ठ वि
चित्रं पुष्पमंडपं। कृत्वा चावरणोपेतं जागरं कारयेन्निशि। तस्मिन्संपूजयेद्देवमच्युतं। तदुक्तं ब्रह्मपुराणे
एकादश्यामुपोष्येव निराहारः समाहितः। स्नात्वा सम्यग्विधानेन सोपवासो जितेंद्रियः। संपूज्य विधिवद्विष्णुं श
द्धया सुसमाहितः। पुष्पैर्गंधैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः। उपचारैर्बहुविधैर्जपहोमैः प्रदक्षिणैः। स्तो
त्रैर्नानाविधैर्दिव्यैर्गीतवाद्यैर्मनोहरैः। दंडवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः। एवं संपूज्य विधिवद्रा
त्रौ कृत्वा प्रजागरं। याति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः॥ ॥ ॥ द्वादश्यां कर्तव्यमाह कात्या ९५
यनः॥ ॥प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत्। अज्ञानतिमिरांधस्य व्रतेनानेन केशव। प्रसा
दं सुमुखो नाथ ज्ञानदृष्टिप्रदो भव। मंत्रं जपित्वा हृदयं निवेद्योपोषणं व्रती॥ द्वादश्यां पारणं कुर्यात्तद
र्पयित्वा घृतोदकमिति। एतत्कादेशार्चनरहितमुपवासमात्रं कुर्यात्। तदुक्तं कूर्मपुराणे। कान्ये

पवासेष्वशक्तो नक्तं वा तरामृतमक्तं कालेत्र काम्यव्रतं कुर्यात्स्वदानार्चनविवर्जितमिति। वाराहपुराणे। नक्तकेवल
रः स्नात्वा प्रणम्य मनसा हरिं। एकादश्यां न भुंजीत व्रतमेतन्नलुप्यते। असमर्थः केपि न भुंजीत एकादश्यां सपा
नरः। द्वादश्यां तु समभ्यर्च्य स्नात्वा विष्णुं प्रणम्य चेति। तत्र पारित्यक्तेस्वार्चनं नक्तं कार्यं। तदुक्तं मत्स्य
पुराणे। नक्तं कोते नरः स्नात्वा हृत्वाग्निं तु नार्चनोदानेरत्नो विधानेन व्रतस्य फलमश्नुते इति। स्त्रीणां कोपि
विधिनव तत्पासः। किंतु देवार्चनादिरहितं नक्तकार्यविवर्जितमुपवासमात्रं कार्यं। तदाह पैठीनसिः। एकादश्यां न भुं
जीत नारी दृष्टे रजस्यपि। तस्याः शौचपि। तेषु चैतेषु रजसि न त्याज्यं द्वादशीव्रतमिति। स्नानव्रतोपि आर्द्र
सीद्वितमस्तां नाततो वेदज्ञोनवेत। न तत्रापि व्रतसंस्यादुपरोधः कर्तव्य नेति। श्रुत्वा तद्देवतार्चनादि व
र्जितं तथा च स्मृतिः। स्नात्वा तु नर्तुस्वतुर्थेद्वि शुद्धा स्यात्स्वैरिचारणी। पंच महानिशु दात्वा देवपि त्रेच कर्म ति
इति। निस्योपवासप्रकारो विष्णुरहस्ये निहितः। अथ निस्योपवासे चैतास्यं प्रातर्नु क्रियां वर्जयन्मतिमा
न् द्विजः संप्राप्ते हरिवासरे इति। ब्रह्मवैवर्ते पि दशति विदितायां तावदर्थ्यमेकादशीव्रतं। विशेषतनियमनी को
रात्रे मुक्तिवर्जितं। निरमहीलेनेहुयः स्त्राद्वादशीं हावयोविष्णुतत्परः। उपोष्येकादशीं पापान्मुच्यते नात्र सं
शयः। प क्रोमत्स्यां नियमान्नाचरेत्। तथा च कात्यायनः। शक्तिमान्यः पुनः कुर्यात् नियमं सविशेषणमिति
यदा द्वादश्यां श्रवणं नक्षत्रं न वर्तते तदा तु एकादशीमपि परित्यज्य द्वादश्यामेवोपवसेत्। तथा च नार

दीये। श्रुत्वा वा यदि वा कुर्याद्द्वादशी श्रवणान्वित। तयोरेवोपवासश्च त्रयोदश्यां च पारणमिति। तथा। एका
दश्यां तु विद्धायां संज्ञा श्रवणे तदा। न पोष्या द्वादशी शुद्धा सर्वपापक्षया वहेति। यदा त्रयोदश्यां द्वादश्याः कला
द्वयं चाप्युदये संभवति। तदा द्वादशीकाल एव पारणं कार्यं। तदुक्तं नारदीये। भवेत् यत्र त्रयोदश्यां द्वादश्याः क
लाद्वयं। द्वादशी द्वादशी हंति त्रयोदश्यां तु पारणं। कलाद्वयं त्रयं वापि द्वादशी न लभेत् क्रमे तदा पारणमरणो नृ
णां तिथिस्तात्कालिकी स्मृतेति। ननु द्वादश्यतिक्रमेपि नास्ति दोषः। सा तिथिः सकला ज्ञेयेति वचनेन सावकाशत्वे वि
धानादिति चेत्। नैवं। साकल्यस्य स्नानादिविषयत्वात्। अवशेषेण स्नानाद्युपादिष्टसन्निधानात्। पारणे तु न सा
कल्यवचनं प्रवर्त्तते। तिथिस्तात्कालिकी स्मृतेति वचनात्। द्वादशीकाले यदा पारणं तदा ततः प्रागेव सर्वाः
क्रियाः कर्त्तव्याः। तदुक्तं नारदीये। अल्पायामथ विप्रेंद्र द्वादश्यामरुणोदये। स्नानार्चनक्रियाः कार्या दानहो
मादिसंयुताः। एतस्मात् कारणाद्विप्रः प्रत्यूषे स्नानमाचरेत्। पितृतर्पणसंयुक्तं स्वल्पायां च द्वादश्यां।
महाहानिकरी ह्येषा द्वादशी लंघिता नृणां। करोति धर्महरणमस्त्रा नेव सरस्वतीति। गरुडपुराणेपि। यदा ९६
तु सा द्वादशी स्वल्पा दिनमध्ये निवर्तते। प्रातर्मध्याह्निकं सापि तत्र स्यादपकर्षणमिति। स्कंदपुराणेपि। यदा
भवेदतिवाल्या द्वादशी पारणे दिने। उषःकाले द्वयं कुर्यात् प्रातर्मध्याह्निकं तदिति। तत्र पारणासंभवे त्व
द्भिः पारणं कुर्यात्। तदाह कात्यायनः। संध्यादिकं न येन्निल पारणं तु निमित्ततः। अद्भिस्तु पारयित्वाथ

नैत्यकं तेनुतिष्ठेदिति। देवलोपि। संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं। अद्भिस्तु पारणं कुर्यात् पुन
र्भुक्तं न दोषकृत्। इति। यदा कलयापि द्वादशी नास्ति तदा त्रयोदश्यामपि पारणं कुर्यात्। तदुक्तं नारदीये। त्रयो
दश्यां तु शुद्धायां पारणे पृथिवीफलं। शतयज्ञादिकं चापि नरः प्राप्नोत्यसंशयमिति। पारणं च नैवेद्यतुलसी
मिश्रितं कुर्यात्। तदुक्तं स्कंदपुराणे। कृत्वा चैवोपवासं तु यो भुंक्ते द्वादशीदिने। नैवेद्यं तुलसीमिश्रं हत्याकोटि
विनाशनमिति॥ ॥अथ एकादशीमहिमा॥ ॥ तत्र वसिष्ठः। एकादशीसमुत्थेन वह्निना पातकेंधनं।
भस्मतां याति राजेंद्र अपि जन्मशतोद्भवं। नेदृशं पावनं किंचिन्नराणां भुवि विद्यते। यादृशं पद्मनाभस्य दि
नं पातकहानिदं। तावत्पापानि देहेस्मिन् तिष्ठंति मनुजाधिप। यावन्नोपवसेज्जंतुः पद्मनाभदिने शुभे। अश्व
मेधसहस्राणि राजसूयशतानि च। एकादश्युपवासस्य कलां नार्हंति षोडशीं। एकादशेंद्रियैः पापं यत्कृतं
भवति प्रभो। एकादश्युपवासेन तत्सर्वं विलयं व्रजेत्। एकादशीसमं किंचित्पापत्राणं न विद्यते। स्वर्गमोक्षप्रदा
ह्येषा राज्यपुत्रप्रदायिनी। सुकलत्रप्रदा ह्येषा शरीरारोग्यदायिनी। न गंगा न गया भूप न काशी न च पुष्करं।
न चापि कौरवं क्षेत्रं न रेवा न च देविका। यमुना चंद्रभागा वा तुल्या भूप हरेर्दिनात्। अनायासेन राजेंद्र प्रा
प्यते वैष्णवं पदं। चिंतामणिसमा ह्येषा अथवापि निधेः समा। संकल्पपादपप्रख्या वेदवेदोपमा तथेति।
अस्यामेकादश्यां। उपवासप्रतिनिधिस्तु पाद्मे एकभक्तनक्तायाचितादीनि तेषां प्रतिपक्षरूपाणीति

नोपवासतिथावनुष्ठानं। यानि तु स्वतंत्राण्येकभक्तनक्तादीनि तेषां पूर्वोक्तन्यायेन मध्याह्नादिव्या
पितिथिग्रहणं प्राप्तो दशमीविद्धा व्रतिभिर्ध्यता। द्वादशी कल्पेषु पूर्णा विद्धा वा दिनार्धेन न संपूर्णा
मपि त्यजेत्। यदीच्छेदात्मसंतानं नियमेषु चतुर्थ्यपि नो पोषितं च नक्तं च नक्तं नक्तमयाचितं। नंदा
यां पूर्णविद्धायां कपर्दिश्वर्यमोहितः। एकादशी युता शस्ता द्वादश्यामुपोषणं। नक्तं वायाचितं नि
त्यमेकभक्तं तथा न च। नक्तं वायाचितं तातनैकभक्तमुपाहरेत्। दशमीसहितं दानं मनर्थह
रिकासरद्भति। दिनार्धेन सार्धसप्तमुहूर्तैरित्यर्थः। एतदेवाभिप्रेत्य दिकूपं चदशामिस्तथेत्याह्
तां तथा सार्धसप्तमुहूर्तैस्तु वेधो यं बाधते व्रतमिति चाहृतो न च नवेधस्तु तिथ्यौ नरदवमेध्याह्नादिव्या
प्तिर्गृहीतव्या॥ ॥इत्येकादशीनिर्णयः॥ ॥अथ द्वादशी निर्णीयते। सा च युग्मादिशास्त्रेण पू ४९
र्वविद्धा ग्राह्या। स्कंदपुराणेपि। द्वादशी च प्रकर्तव्या एकादश्या युता विभो। सदा कार्या च विद्धापि वि
ष्णुभक्तैश्च मानवैरिति। न तु रविहीनिषेधस्ति कृह्रसिद्धः। । द्वितीया पंचमी वेधा त। दशमी च त्र
योदशी। चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी इति। नन्वेवं सत्येकादश्युपवासो द्वादश्युपवासश्चे
त्युभयमेकस्मिन्दिने प्राप्नोति। सत्यं। एवं सत्यपि चोभयस्याप्यविरोधात्माद्वात्सहैवानुष्ठानं न
विध्यति। न च खंडतिथौ। संपूर्णतिथौ चैकादशी द्वादश्युपवासौ द्वौ निरंतरौ प्राप्नुतः। तत्र पारणमंतरे
ण प्रथमोपवासस्यासमाप्तत्वात् द्वितीयोपवासक्रमो न संभवतीति चेत्। मैवं। अद्भिः पारणं कृत्वा द्वितीयो
पवासस्य प्रक्रांतुं शक्यत्वात्। तादृशं तु पारणमशितानशितोभयात्मकं। तत्राशितरूपत्वात् पूर्वोपवासंप
रिसमापयति। अनशितरूपत्वेनोत्तरोपवासं न हंति। एतच्च द्वात्मकत्वं दर्शपूर्णमासप्रकरणे याज्ञमान ब्रा
ह्मणे श्रूयते। यदनाश्वानुपवसेत् क्षोधुकः स्याद्यदश्नीयाद्रुद्रोस्य पशूनभिमन्येतापो अश्नाति तन्नेवाशितं नेवान
शितं न क्षोधुको भवति नास्य रुद्रः पशूनभिमन्यत इति। तस्मादुदकपारणेनोपवासद्वयनिर्वाहः। एतच्च स
र्वतिथिसाधारणं। अस्तु तर्ह्येकादशी द्वादश्योर्द्वैतेक्यादुदकपारणमंतरेणापि न कश्चिद्दोषः। अत एव स्म
र्यते। एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्। न तत्र विधिलोपः स्यादुभयोर्देवता हरिरिति। उपवासद्वया
शक्तो केवलद्वादश्युपवासेनोभयोपवासं सिध्यति। तथा च स्मृतिः। एकादशीं समुपोष्य द्वादशीं समुपोष
येत्। पूर्वोपवासजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति। द्वादश्यां तु कृतोपवासो मार्कंडेयेन दर्शितः। द्वादश्या
मुपवासेन सिद्ध्यर्थं भूप सर्वशः। चक्रवर्तित्वमतुलं संप्राप्ता अनुत्तमाः श्रियं॥ ॥इति द्वादशीनिर्णयः। ।
अथ त्रयोदशी निर्णीयते॥ ॥सा च शुक्लकृष्णपक्षभेदेन व्यवतिष्ठते। तत्र शुक्लत्रयोदशी पूर्वविद्धा ग्रा
ह्या। तदुक्तं ब्रह्मवैवर्ते। त्रयोदशी प्रकर्तव्या द्वादशीसहिता मुने। अनंतविधानकर्तव्यादर्शः पूर्णाकि दानं च न॥

वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति। यद्यप्यत्र शुक्लपक्षग्रहणं नास्ति तथापि कृष्णत्रयोदश्याः परवि-
द्धाया वाक्यात्पूर्वविद्धतायाः शुक्लपक्षविषयत्वं परिशिष्यते। सायंकालत्रिमुहूर्त्तमात्रव्यापित्वं तु पूर्व-
विद्धतायां प्रमाणं प्रतिपद्द्वापराह्णसंबंधोऽपेक्षित इति द्रष्टव्यं। तदुक्तं स्कंदपुराणे। त्रयोदशी तु कर्त्तव्या
पाने वेदाः परा द्विकीति। तस्मात्त्रयोदश्याः पूर्वविद्धत्वमुक्तं निगमे। षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोद-
शी। एताः परयुताः पूज्याः पराः पूर्वयुतास्तथेति। यत्तु बृहद्वसिष्ठः। द्वितीया पंचमी वेधाद्दशमी च त्रयोद-
शी। चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी इति। तच्छुक्लपक्षविषयं। यदा तु शुक्लपक्षे परविद्धा न लभ्यते।
तदा पूर्वविद्धा ग्राह्या। तदाह वसिष्ठः। एकादशी तृतीया च षष्ठी च त्रयोदशी। पूर्वविद्धापि कर्त्तव्या यदि न
स्यात्परेहनीति। अनंगत्रयोदशी पूर्वविद्धा तदाह संवर्त्तः। कृष्णाष्टमी बृहत्तपा सावित्री वटपैतृकी। अनंग-
त्रयोदशी रंभा उपोष्याः पूर्वसंयुता इति। अनंगत्रयोदशी भविष्यत्पुराणे दर्शिता। मार्गशीर्षे सिते पक्षे द्वादश्यां ४८
अभ्यर्च्य व्रतं विधायानंगेन कृतं यस्मात्तेनानंगत्रयोदशी स्मृत संहारात्।। नन्वमलपक्ष इति शुक्लपक्ष एव तत्कृतं वि-
हितं। तथा च त्रयोदशी प्रकर्त्तव्या द्वादशीसहितेत्यनेन सामान्यशास्त्रेणैवानंगत्रयोदश्याः पूर्वविद्धत्वप्राप्ते-
र्बाधो। तदेवानेन विशेषशास्त्रेण विस्पष्टीक्रियते।। ।।इति त्रयोदशीनिर्णयः।। ।।अथ चतुर्दशीनिर्णी-
यते।। ।।अत्रापि शुक्लकृष्णपक्षभेदेन व्यवस्था भवति। तत्र युग्मशास्त्रेण शुक्लचतुर्दशी परविद्धा ग्रा-

ह्या। तथा च व्यासोपि। शुक्ला चतुर्दशी ग्राह्या परविद्धा सदा व्रते इति। पूर्वविद्धानिषेधात्परविद्धाविधिस्तु भवि-
ष्यत्पुराणे पठ्यते। सदा कार्या त्रयोदश्या न तु युक्ता चतुर्दशी। पौर्णमासीयुता सा स्याच्चतुर्दश्यास्त्वमर्णिमेति।
नारदीयेपि। तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी। पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुतेति। यत्तु नारदे शुक्ल-
चतुर्दश्यामनंगव्रतं भविष्योत्तरे विहितं। तत्र पूर्वविद्धा परविद्धा वा मध्याह्नव्यापिनी ग्राह्येति केचिदाहुः। लिंगं च
तत्र प्रमाणत्वेनोदाहरंति। मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे। ददर्श शीलां तां स्त्रीणां समूहं रक्तवाससां।
चतुर्दश्यामर्चयंतं भक्त्या देवं पृथक्पृथगिति। अत्र मध्याह्ने भोज्यवेलायामित्यनेन मध्याह्नस्य कर्मकालत्वं
प्रतीयते अतस्तद्व्यापिनी तिथिर्ग्राह्येति नैतत्सारं। यथा विनायकव्रते मध्याह्नस्तु येनोपेतेति मध्याह्नः कर्मका-
लत्वेन विहितः नात्र तथा विधिरस्ति। नन्वदाहृतं तु लिंगमर्थवादगतत्वान्न स्वातंत्र्येण कस्यचिदर्थस्य प्रमापकं।
किंतु सति प्रमाणांतरे तस्योपोद्बलकं भवति। न चात्र प्रमाणांतरमुपलभामहे। अतो न मध्याह्नः कर्मकालः। तथा स-
ति देवहेयोरपि ग्राह्येति वचनेन युग्मशास्त्रादिनिःशेषोदयव्यापिनी या प्रोक्ता सा च तिथिः पूर्वं तत्र च त्रिमुहूर्त्तेति
मुख्यः कल्पः द्विमुहूर्त्तेष्वनुकल्पः एवं सति शिष्टाचारोप्यनुगृहीतो भवति। चैत्रश्रावणचतुर्दश्योस्तु
क्तेऽपि रात्रियोगिन्यो ग्राह्या इति। तथा च बौधायनः। मघोः श्रावणमासस्य शुक्ला या तु चतुर्दशी। सा रात्रिव्या-
पिनी ग्राह्या परा पूर्वाह्णगामिनीति। परा मासांतरवर्त्तिनी शुक्ला चतुर्दशी। तस्य चतुर्दशी तत्पूर्वविद्धे

य दैवत्राणा। तथा चापस्तंबः। तस्य पक्षे प्रमीत्येव कृष्णपक्षे चतुर्दशी॥ पूर्वविद्धा तु कर्तव्या परविद्धा न कस्य
चिदिति। अपराह्णव्यापित्वेनु भूतस्य चतुर्दश्यपि पूर्वविद्धा ग्राह्या। स्कंदपुराणे। चतुर्दशी तु कर्तव्या त्रयोदश्या
युता विभो। मम भक्तैर्महाबाहो भवेद्याचापराह्णिकी। दर्शविद्धा न कर्तव्या राकाविद्धा कदाच नेति। अत्र मम
भक्तैरितिर्दृष्टपरोक्तिलिंगाच्छिवचतुर्दशीविषयत्वं द्रष्टव्यं। तदेवं शुक्लेतरपक्षचतुर्दशी निर्णीता॥ ॥अथ शिव
रात्रिव्रतं निरूप्यते॥ ॥तत्रैवं विचिंत्यते। ॥किमयं शिवरात्रिशब्दो रूढः किं वा यौगिकः। उत लाक्षणिकः। अथ
वा योगरूढ इति। किं तावत्प्राप्तं रूढ इति। विधिविशेषेषु शिवरात्रिशब्दस्य संज्ञारूपेण समरणात्। तथा च
नागरखंडे। माघमासस्य शेषे या प्रथमा फाल्गुनस्य च। कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्तितेति। कामिके
माघमासे तिते पक्षे विद्यते या चतुर्दशी। तद्रात्रिः शिवरात्रिः स्यात्सर्वपुण्यशुभावहेति। यद्यप्यत्र शिवस्य रा
त्रिः शिवरात्रिरित्यवयवार्थः प्रतीयते। तथापि योगाद्रूढिर्बलवती योगोत्र न ग्राह्यः। यावद्वाक्यं चाश्वकर्णा
दिशब्देष्ववगम्यते। अश्वस्य कर्ण इत्यवयवार्थप्रतीतावपि तमुपेक्ष्य रूढ्या वृक्षविशेष एव वाचित्वस्वीकारात्। न
नु काकदंतपरीक्षासमानोयं विचारः। यद्ययं शिवरात्रिशब्दो रूढः यदि वा यौगिकः। उभयथाप्यनुष्ठाने विशेषा
भावात्। मैवं। अस्त्येव महान् विशेषः। यौगिकत्वे शिवसंबंधिव्रतजातं सर्वमप्यारात्रावनुष्ठीयते सा सर्वापि शि
वरात्रिः स्यात्। माघमासादिपदं वृत्तदानीमुपलक्षणं भवेत्। रूढिपक्षे तु माघमासादिविशेषणत्वात् त

द्विशिष्टाया एकस्या एव तिथेः शिवरात्रित्वं। अतः कर्तव्य एव विचारः। तत्राहीनन्यायेन रूढिमेवाद्रियामहे।
तस्य चान्यायस्य संग्राहकौ श्लोकौ भवतः। अहीनस्य द्वादशोत्ति प्रसक्तौ विचिंता कृता। अहीन इति यौगि
न प्रसक्तौ तद्धि कल्प्यतां। शीघ्रधीहेतुतो रूढेरहीने विसृतादिदं। उपक्रम्यतां द्वादशत्वं साह्नात्या ऊतु क
र्मणः। ॥अयमर्थः। ज्योतिष्टोमे श्रूयते। ॥तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य यत्तस्य सर्वार्थत्वा
यिति। अहीनसहस्य वर्त्तत इति साह्नः। एकदिननिष्पाद्यो ज्योतिष्टोमः। तस्य प्राचीनेषु त्रिषु दिनेष्वंगत्वेना
नुष्ठेया होमा उपसच्छब्दवाच्याः। तास्तिस्र उपसदो विधाय पुनरहीनशब्दवाच्यस्य कर्मणो द्वादशोपसदो
विधीयते। ॥तत्र संशयः। ॥किमिदं द्वादशोपसत्त्वं द्विरात्राद्यहीनप्रकृतिभूते साह्नपादवाच्ये ज्योतिष्टो
तिष्टोमे निविशते। आहोस्विदहीनशब्दवाच्यविकृतिरूपे द्विरात्रादौ क्रतुरूपयत इति। तदर्थमिदं विचिंत्य
ते। अहीनशब्दो यौगिको रूढो वेति। तत्र न हीन इति व्युत्पत्त्या विश्वस्यापि प्रतिभासाद्यौगिक एवायं। तदर्थश्च
प्रकृतावुपपन्नः। सांगप्रधानस्य सर्वस्य साह्नस्य चकृपणैरैवोपदिष्टत्वेन हीनत्वाभावात् विकृतौ तु विप
र्यय एव वाचकशब्दैरुपदिश्यते इतरस्तु सर्वमतिदेशात्प्राप्यते। अतः विकृतिसंकोचाद्विकृतेर्हीनत्वं। एवं च सत्यहीन
शब्दस्य ज्योतिष्टोमे प्रवृत्तिसंभवात्प्रकरणानुग्रहणाय तत्रैव द्वादशत्वं निविशते। न च पूर्ववाक्यविहिते
न त्रित्वेन बाधः शंकनीयः। वाक्ययोः समानबलत्वेन व्रीहियववद्विकल्पोपपत्तेः। तस्माज्ज्योतिष्टोम एव क्रतुरा

त्वविधिरिति प्राप्तिं ब्रूमः ॥ ॥विकृतिरूपे हि रात्र्यादाविदं द्वादशत्वं विधीयते॥ कुतः। ।आदीनश
ब्दस्य श्रौतप्रयोगबाहुल्येन तत्रैव रूढत्वात् रूढिश्च शीघ्रबुद्धिहेतुत्वेन योगाद्बलीयसी। योगे त्वव
यवार्थं प्रथमतो निश्चित्य पश्चात्समुदायार्थो निश्चेतव्य इति विलंबः। न चात्र प्रकरणविरोधः शंकनी
यः। बलीयसा वाक्येन प्रकरणस्य बाधितत्वात्तस्मादिदं द्वादशत्वं प्रकृतयोगित्वेनादुपकारिषु विकृति
षु निवेशनीयमिति। अत्र यथा रूढिः हीनशब्दस्तथा शिवरात्रिशब्दोपि रूढ इति प्रथमः पक्षः।
अपर आह। ।यौगिक एवायं शिवरात्रिशब्दः ।कुतः। ।शिवसंबंधमुपजीव्य तत्संज्ञे प्रवृत्तत्वात्। यथा
स्कंदपुराणे। ।माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्दशी। शिवरात्रिस्तु सा ख्याता सर्व १००
पापप्रणाशिनी। तस्या रात्रिः समाख्याता शिवरात्रिः शिवप्रिया। तस्यां सर्वेषु लिंगेषु सदा सं
क्रमते हरः। यानि कानि च लिंगानि चराणि स्थावराणि च। तेषु संक्रमते देवस्तस्यां रात्रौ

यतो हरः। शिवरात्रिस्ततः प्रोक्ता तेन सा हरवल्लभेति। ।शिवरहस्ये। ।तत्रानन्त्ये वदे देवर्षे माघकृष्णचतुर्दशी।
शिवरात्रिः समाख्याता प्रियैवं त्रिपुरद्विषः इति। अवंतीखंडे। माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी। शि
वरात्रिस्तु सा ख्याता सर्वपापनिसूदिनीति। संस्कारजातियोगेषु कं ब्रूते प्रोक्षणीरिति। संस्कारं सार्वनामत्वात्कृति
मुद्रनोक्तितः। अन्योन्याश्रयतो नाद्यो न जाति। तस्माच्छिवसंबंधिनी रात्रिः शिवरात्रिरिति यौगिकोर्थः। प्रोक्षणीन्या
ये न गृहीतव्यः। तस्य च न्यायस्य संग्राहकौ वार्तिकश्लोकौ। ×तिः कल्प्यशक्तितः। यौगिकं ... प्रशक्तिता च कृमिर्व्याकरणे
स्थिता। अयमर्थः। दर्शपूर्णमासयोर्गतयाश्रूयते प्रोक्षणीरासादयेति। तत्र संशयः। किमयं प्रोक्षणीशब्दोभिमंत्र
णसाधनोदकसंस्कारं ब्रूते किं वा उदकजातिविशेषं। आहोस्वित्प्रोक्षंते याभिरिति योगं। तत्र संस्कारं ब्रूत इ
ति तावत्प्राप्तं। कुतः सार्वनामत्वात्। सर्व×वा। संस्कारविधिवाक्यादिप्रदेशेषु प्रोक्षणीशब्दः श्रूयते। प्रोक्षणीरासा
दयेध्माबर्हिरुपसादयेति च वाक्यप्रयोगः। प्रोक्षणीरासादयतीति विधिवाक्यैः एवमभिमंत्रणादिवाक्यान्युदाहर
णीयानि। तस्मात्संस्कारं ब्रूत इत्येकः पक्षः। जातिं ब्रूत इति पक्षांतरं। लोके हि ... प्रोक्षणी निरूढेति। समुद्
रकेनातो प्रयोगो दृश्यते। न तत्र न तावदाद्यः पक्षः उपपद्यते। कुतः अन्योन्याश्रयात्। नापि जातिं ब्रूत इति द्वितीयः पक्षो
युक्तः। उदकजातौ प्रोक्षणीशब्दस्य व्यवहारे सर्वमन्त्रत्वेन ततः परं शक्तिः कल्पनीया तत्र संगात्। न च योगेपि शक्तिः
कल्पनीया। व्याकरणेनैव सिद्धत्वात्। व्याकरणेन हि प्रकृतिप्रत्ययविभागः। करणे ल्युट् प्रत्ययेन शब्दो व्युत्पादि

तः। तथा सति प्रकर्षेणास्थीते अनेनेति योगेन सेचनसाधनमुदकादिकं सर्वं प्रोक्षणशब्दवाच्यं संपद्यते। प्रकृते तु
प्रोक्षणीशब्दवाच्यानामपां सेचनसाधनत्वात् अवयवस्य प्रोक्षणशब्दस्य ङीप्प्रत्ययांतत्वेन प्रोक्षण्य इति द्वितीयाबहुवचनां
तःशब्दो निष्पाद्यते। नन्वहलोनाधिककरणे ल्युटः प्राबल्यमुक्तौ प्रोक्षण्यधिकरणेन योगस्य प्राबल्यमुक्तं स्यात्। अ
तः परस्परविरोधः। मैवं। लक्षणिका हि रूढिः योगमपहरतीति। न हि प्रोक्षणीशब्दे रूढिर्लभ्यते। रूढ्यवहार्य
णज्ञातावक्त्रादित्वात्। अहीनशब्दोऽपि द्विरात्रादिषु न रूढः कर्मणादिना इति चेत्। न व्याकरणे वक्त्रादित्वात्। अ
हः खलु तावित्यनेन वाररुचेन वार्त्तिकेनाहन्शब्दात् खप्रत्ययमुत्पाद्य तस्य नादेशं सत्वा कृतविषयतया वक्त्रादिरो
हीनशब्दः। नन्वेवं सति घटकुटीप्रभातन्यायेन स्तवप्रसज्येत। यतो हीनशब्दे योगपरिहर्तुकामेन भवता व्याकरणमुप
जीव्य योगे पर्यवसानेऽस्तु। नायं दोषः। पूर्वपरिणामितेन समासस्वरूपेण योगे पर्यवसानस्याभिधानात्। न च नञ्समा
सोऽपि व्याकरणोक्तत्वादिति शंकनीयं। नञ्समासस्वीकारे सति अयज्ञो वा एष इत्यादिविधावहीनशब्दस्याघटनात्वप्र
संगात्। मध्योदात्तोऽध्ययेशब्द आम्नायते तस्मात् रूढये योगे साम्येऽपि समासरूपयोगं पूर्वपक्षे प्रतिमतं तेन निराकृत्य श्रौतरू
ढिः सिद्धांतिना समाश्रिता। तामेव रूढिं प्रकटयितुं वररुचिना वार्त्तिकं कृतं। अतः सत्यपि प्रकृतिप्रत्ययविभागे यो १०२
गिकत्वं न शंकितुं शक्यते। यथा गोत्वजातेः रूढस्यापि गोशब्दस्य ओणादिषु सूत्रेषु गमेर्डोरिति प्रकृतिप्रत्ययविभाग
कृत्वा गच्छतीति गौरिति व्युत्पत्तिः दर्शिता। तद्वदत्राप्यवगंतव्यं। प्रोक्षणीशब्दे तु न रूढिज्ञापनाय किंचिद्वचनं तेन स्तत्र वि
हितमस्ति। किं तर्हि सर्वधातुसाधारणेनावयवार्थकत्वादकेन ल्युट्प्रत्ययेन वक्त्रादित्वाद्योगिक एवायं प्रोक्षणी

शब्दः। तस्मात्प्रोक्षणीशब्दवच्छिवरात्रिशब्दो योगिक इति द्वितीयपक्षः। अन्ये तु पुनर्मन्यंते। ।सा रूढिः कोर्या शि
वरात्रिशब्दः तिथिवाचकेन तेन शब्देन तन्निथौ क्रियमाणस्य व्रतविशेषस्य लक्ष्यमाणत्वात्। अत एवेशानसंहिता
यामुक्तं। ।शिवरात्रिव्रतं नाम सर्वपापप्रणाशनं। आचांडालमनुष्याणां भुक्तिमुक्तिप्रदायकं। अर्धरात्राद
धश्चोर्ध्वं युक्ता यत्र चतुर्दशी। तन्निथावेव कुर्वीत शिवरात्रिव्रतं व्रती। शिवरात्रिव्रतं कार्यं भूतान्वितमहा
निशि। शिवरात्रिव्रतं देव करिष्ये शिवसन्निधौ। निर्विघ्नं कुरु मे देव त्वत्प्रसादान्महेश्वरेति। नारदीयसंहितायां।
अर्धरात्रयुता यत्र माघकृष्णचतुर्दशी। शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत्। स्मृत्यंतरेऽपि। न वेधत्र
चतुर्दश्यां भूतव्याप्तामहानिशा। शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति। पद्मपुराणेऽपि। अर्धरात्रादधश्चो
र्ध्वं युक्ता यत्र चतुर्दशी। तन्निथावेव कुर्वीत शिवरात्रिव्रतं व्रती। स्कंदपुराणे। शिवरात्रिव्रतं देव कथयस्व
महेश्वरेति। न च कालवाचकस्य शब्दस्य लक्षकत्वमदृष्टमिति शंकनीयं। कालवाचकाभ्याममावास्या
पौर्णमासीशब्दाभ्यां यागत्रयरूपयोरिष्ट्योः तत्कालसंबंधिन्योरुपलक्षितत्वात्। अत एव श्रूयते। य एवं
विद्वान्पौर्णमासीं यजते य एवं विद्वानमावास्यां यजत इति। स्मृतिष्वपि सर्वत्र तिथिवाचकैः शब्दैस्तत्संबं
धिनो व्रतविशेषा उपलक्ष्यंते। ।स्कंदपुराणे। जन्माष्टमी नैव लता कदाचित् कल्पायुतं पच्यते रौरवे
चिति। तथाष्टमेपि। एकादशीं तु कुर्वीत स्त्रीयते द्वादशीयदेति। एवमन्यत्राप्युदाहार्यं। तस्माद्धार

लिकोयं शिवरात्रिशब्द इति तृतीयः पक्षः । अथ सिद्धांतक्रमः । योगरूढ एवायं शिवरात्रिशब्दः । योगो द्वि-
तीयपक्षोपन्यासे न दर्शितः । रूढिश्च प्रथमपक्षोपन्यासेन । तत्रैकस्य स्वीकारे सत्यन्यविषयं शास्त्रं तदनुग्राह-
कं त्वदाहृतो न्यायश्च बाध्येत । न च यौगिकत्वे सति शिवव्रतोपेतेषु त्रयोदश्यादितिथिष्वतिरेषु शिवरात्रित्वप्रसंग
इति वाच्यं । तस्यातिप्रसंगस्य रूढ्या निवारणात् । यथा पंकजशब्दे पंकाज्जायत इति योगं स्वीकृत्य नैकादिष्व-
तिप्रसंगो रूढिस्वीकारेण निवार्यते । तद्वदत्रापि योगरूढतायां न कोप्यतिप्रसंगः । न च मुख्ये संभवति ल-
क्षणाश्रयणमुचितं । अथोच्यते । लक्षणा यात्र नावेत्वत्र विषयं न स्यादिति । तन्न । बहुव्रीहिस्वीकारे योगेनैव
तत्सिद्धेः । शिवस्य प्रिया रात्रिर्यस्मिन् व्रतेंगत्वेन विहिता तद्व्रतं शिवरात्र्याख्यं । तस्मान्निर्मथ्यन्यायेनात्र योगरू-
ढः शिवरात्रिशब्दः । तस्य च न्यायस्य संग्राहकः श्लोकः । निर्मथ्यो यौगिको योगरूढो वा योगभासनाद्यौगिको चि-
रजातोऽग्नेर्नियते योगरूढिभाक् । अस्यायमर्थः । इष्टकाचयने श्रूयते । निर्मथ्येनेष्टकाः पचंतीति । तत्र
संशयः । किमयं निर्मथ्यशब्दो यौगिकः किं वा योगरूढ इति । योगस्य प्रतीयमानत्वात् श्रोतृणां न्यायेन योग इति
पूर्वपक्षः । अत्र द्वावग्नी विद्येते चिरनिर्मथितोऽचिरनिर्मथितश्चेति । तत्र चयनोपक्रमात् प्रागपि विद्यमानो १०२
गार्हपत्योनिधनोग्निराधानकालमथितत्वाच्चिरनिर्मथितः । चयनं प्रक्रम्यारण्यानिर्मथितस्याग्नेरुखायां चि-
ह्नसंधारणाय योग्निर्निर्मथ्यते सोऽचिरनिर्मथितस्तेनेष्टकाः पच्यंते । तस्यैव प्रत्यासन्नत्वात् । तथा च मन्स्या
न्निष्ठितपसाधारण्येप्यचिरनिर्मथितं अग्निं नियंतुं रूढिः आश्रयणीया यथा न-

वनीतघृतमित्यत्र नवनीतजन्यत्वयोगस्य चिराचिरयोर्जन्ययोः साधारण्येपि नूतन एव घृते नावनीतशब्दो
लोके प्रसिद्धो नियम्यते । तद्वदत्राप्यवगंतव्यं । तथा च सति प्रतीयमानयोगस्यापि परित्यक्तत्वान्नियमे रूढिस्वीका-
रात्स्व योगरूढोयं निर्मथ्यशब्द इति सिद्धांतः । अनेनैव न्यायेन शिवरात्रिशब्दोपि योगरूढिमाश्रयते । तत्र शिवस्य
रात्रिः शिवरात्रिरिति तत्पुरुषसमासेन योगेन प्रवर्तमानः शब्दो रूढ्या माघकृष्णचतुर्दशीरूपैकालविशेषे नियम्यते ।
शिवस्य रात्रिर्यस्मिन् व्रत इति बहुव्रीहिसमासेन प्रयोगेन प्रवृत्तः शब्दो रूढ्या व्रतविशेषे नियम्यते । तच्च शिव-
रात्रिव्रतमेकादशीजयंतीव्रतवत्संयोगपृथक्त्वन्यायेन नित्यं काम्यं चेत्युभयविधं । तत्र नित्यत्वमकरणप्रत्यवाय-
श्रवणान्नित्यनिश्चयवशाच्चैवमवगंतव्यं । तत्राकरणे प्रत्यवायः स्कंदपुराणे पठ्यते । परात्परतरं नास्ति शिवरात्रिः
परात्परं । न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरं । जंतुर्जन्मसहस्रेषु भ्रमते नात्र संशयः । वीप्सापि तत्रैव पठिता । वर्षे
वर्षे महादेवि नरो नारी पतिव्रता । शिवरात्रौ महादेवं कामं भक्त्या प्रपूजयेत् । इति । नित्यनिश्चयवशाच्चैवं तत्रैव माघ-
कृष्णचतुर्दश्यां यः शिवं संश्रितव्रतः । मुमुक्षुः सर्वयंत्रेष्वंसलेऽदीप्सितं परमिति । अर्णवो यदि वा शुष्येत् क्षीयते
हिमवानपि । मेरुमंदरशैलाश्च श्रीशैलो विंध्य एव च । चलंत्येते कदाचिद्वै निश्चलं हि शिवव्रतमिति । काम्यत्वं च
फलश्रवणादवगंतव्यं । तच्च स्कंदपुराणे । शिवं तु पूजयित्वा यो जागर्ति च चतुर्दशीं । मातुः पयोधररसं न पि-
बेत्स कदाचन । यदीच्छेद्वांछितान्भोगान्दिव्यान्देवमनोरमान् । आगमोक्तविधिं कृत्वा प्राप्नोति परमं पदं ।।

ममत्कृते कृतो देवि शिवरात्रिमुपोषकः। गणत्वमक्षयं दिव्यमक्षयं शिवशासने। सर्वान्भुक्त्वा महाभोगान्
मत्तो भूयो न जायत इति। काम्यव्रतस्येशानसंहितायां वर्षसंख्या पठ्यते। एवमेतद्व्रतं कुर्यात्प्रतिसंवत्सरं व्रती॥
द्वादशाब्दिकमेतद्वा चतुर्विंशाब्दिकं तु वा। सर्वान्कामानवाप्नोति प्रेत्य चेह च मानव इति। नित्यकाम्यरूपस्यास्य
व्रतस्य सर्वाधिकारित्वमीशानसंहितायामुक्तं। शिवरात्रिव्रतं नाम सर्वपापप्रणाशनं। आचाण्डालमनुष्या-
णां भुक्तिमुक्तिप्रदायकमिति। अधिकारिनियमाः स्कंदपुराणे दर्शिताः। माघमासे तु कृष्णा या फाल्गु-
नादौ चतुर्दशी। सा च पुण्या तिथिर्ज्ञेया सर्वपातकनाशिनी॥ अहिंसा सत्यमक्रोधो ब्रह्मचर्यं दयाक्षमा।
शांतात्मा क्रोधहीनश्च तपस्वी त्वमत्सरः। तस्मै देयमिदं देवि गुरुपादानुगो यदि। अन्यथा यो ददातीदं स तदा
नरकं व्रजेदिति। अत्राधिकारिणानुष्ठेयं व्रतस्वरूपं त्रिविधं। उपवासो जागरणं पूजा चेति। तदुक्तं नागरखंडे।
उपवासप्रभावेन बलादपि च जागरात्। शिवरात्रेः तथा तस्य लिंगस्यापि च पूजया। अक्षयाल्लभते भोगान्शि-
वसायुज्यमाप्नुयात्। स एव खंडे स्वयंभुलिंगमभ्यर्च्य सोपवासः सजागरः। अजानन्नपि निःपापो निषादो गण-
तां गतः। अत्रेदं विचार्यते। किमेतान्युपवासजागरपूजाव्रतस्य रूपे स्वेच्छया विकल्प्यंते उत समुच्चितान्येवेति। न १०३
त्र विकल्प्यंत इति तावत्प्राप्तं। कुतः। एकैकस्येतरनिरपेक्षतया विधानात्। तथा हि स्कंदपुराणे केवलोपवासविधिः
पठ्यते। अखंडितव्रतो यो हि शिवरात्रिमुपोषयेत्। सर्वान्कामानवाप्नोति शिवेन सह मोदत इति। तथा च केवल-
जागरणं पठ्यते। कश्चित्पुण्यविशेषेण व्रतहीनोऽपि यः पुमान्। जागरं कुरुते तत्र स रुद्रसमतां व्रजेत्। तथा च के-

वलजागरणं पठ्यते। कश्चित्पुण्यविशेषेण व्रतहीनोऽपि यः पुमान्। जागरं कुरुते तत्र स रुद्रसमतां व्रजेत्।
तथा च केवलपूजा पठ्यते। यः पूजयति नक्तेशमनेकफलतां व्रजेदिति। तस्मादुपवासादित्रयस्यापि विकल्पो-
ते। यद्यपि नागरखंडसत्यखंडयोः समुच्चयविधिरस्तीत्युच्यते। तर्हि प्रत्येकं वा समुदायो वा यथेष्टमनुष्ठीयता-
मिति प्राप्ते ब्रूमः। वैश्वानरविद्योपासनन्यायेन समुदाय एवात्रानुष्ठेयः। तस्य च न्यायस्य संग्राहकावेतौ श्लो-
कौ। वैश्वानरमुपासीत प्रत्येकं समुदायतः। विकल्पः समुदायो वा नियतो द्विविधाद्विधेः। विकल्प इति चे-
न्नैवं समुदायप्रशस्तितः। अवयवस्यानुवादेन प्रत्येकोऽनुपपत्तित इति। अयमर्थः। छंदोगैराम्नायते। वैश्वान-
रमुपासीतेति विधिर्द्युलोकादित्यवाय्वाकाशोदकपृथिवीरूपैः षड्भिरवयवैरुपेतोऽवयवी सर्वात्मको विराट्पुरु-
षो वैश्वानरः स उपास्यः। तत्र संशयः। किं द्युलोकाद्यवयवा अवयवी च प्रत्येकं विकल्पेनोपास्याः उतावयवैर्विशि-
ष्टमेवोपास्यमिति॥ विकल्प इति तावत्प्राप्तं। कुतः। द्विविधस्य विधेः श्रूयमाणत्वात्। प्राचीनशालसत्ययज्ञे-
न्द्रद्युम्नजनबुडिलोद्दालकनामभिः षड्भिर्महर्षिभिः क्रमेण द्युलोकादयः षडवयवाः प्रत्येकमुपासिताः। तद्वृत्तां-
तकथनपरे श्रुतिवाक्ये पुरस्तादवयवानां प्रत्येकमुपास्तिविधयो नियमाश्च फलसहिता उपलभ्यंते। पुनश्चांते
तेभ्यो महर्षिभ्योऽश्वपती राजा समुदायोपास्तिमब्रवीत्। अतो द्विविधविधिबलेन यथेष्टं विकल्प इति प्राप्ते ब्रू-
मः। समुदाय एवात्र नियमेनोपासितव्यः। कुतः। स्तुतत्वात्। अवयवोपास्तिवाक्यानि अवयवानुवा-
दरूपत्वेनोपपद्यंते। तस्मात्समुदाय एवोपास्य इति सिद्धांतः। अनेन न्यायेनात्रोक्तेषूपवासादीनां त्रया-

णं समुदायस्यैव व्रतरूपत्वात् ननु कश्चिदुपवासादित्रयं विधाय पुनः पारणोत्तरं रूपमेकोपवासव्यति
रिक्तं द्वयं पश्यते। अथवा शिवरात्रिव्रतस्य जागरणलोपे न दोषोस्तीति। नायं दोषः। अथ वेत्यनुकल्पोपक्र
मेण शास्त्रविषयत्वोपपत्तेः। अत्र व्रते विहितानां त्रयाणां परस्परमंगांगिभावबोधकप्रमाणाभावा
दाग्नेयादिषड्गणवत्प्रत्येकं कालसंबंधविधानात् फलसंबंधाच्च समप्राधान्यं द्रष्टव्यं। अस्यैव
पौष्कल्यलिंगमभिधीयते। लुब्धकस्य नक्तमत्यज्ञानवतो दुर्बलस्य सा महासंवादे प्रपद्यते। रूपमप
रे चतुर्दश्यां न किंचिन्मया मासवान्। अत एव पिपासार्तस्तु ध्यानपीडितो वसन्दिक्षु पक्रम्य धनुःकोटिना
हृतान्येव बिल्वपत्राणि मानसोपपतितानि महाभाग राजशंभोः शिरसि भूतले। तत्रैव तस्मात् सर्वपापान्मत्
डितः रात्रिशेषं स्थितो व्याधस्तत्र ददर्श निराशिषः। प्रभाते विमले जाते दृष्ट्वा तत्रैव शांकरं। बिल्वपत्रैर्नरव्याघ्र
कंदमूलैश्च पारितद्दति। एतस्मिन्प्रयोक्त तिथिनिर्णयमिदं विचार्यते। किं व्रतांतरेष्विवात्राप्युपरपारमथ अ
हर्व्याः। किं वा प्रदोषवेधः। अथवा निशीथवेध इति। तत्र सर्वेषु रूपेषु त्रयोदश्यां वेधः परेण दृष्टमिदं दर्शवे १०४
ध इत्युदयास्तमयवेधौ युक्तौ। तस्य व्रतांतरेषु सूक्ष्मत्वात्। अपरस्य चैकव्या दुर्बलीयस्त्वात्। मैवं। सामान्या
द्विशेषस्य बलीयस्त्वात्। सामान्यरूपो ह्युदयास्तमयवेधः सर्वतिथिसमानत्वात् विशेषरूपौ प्रदोषनि
शीथवेधौ तस्य चतुर्दशी लक्षणतिथिविशेषे शिवरात्र्याख्यं व्रतविशेषमुपजीव्य प्रवृत्तत्वात्। एत

देवाति प्रेम्णैव ज्ञानसंहितायां [illegible]मुक्तं। उदये च चतुर्दश्यास्तमये च तिना। व्रतिनि तिस्तिथ
यो यस्मान्न वर्जयित्वा व्रतं चिदमिति॥ अस्मिंस्तु व्रते प्रदोषवेधो वायुपु
राणे दर्शितः। त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडीषु। भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेदिति। स्क
न्दे तु रेपि। प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी। रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेदिति।
कामिके। आदित्यास्तमये काले अस्ति चेद्या चतुर्दशी। तद्रात्रिः शिवरात्रिः स्यात्सा भवेदुत्तमोत्तमे
ति। निशीथवेधो नारदसंहितायां दर्शितः। अर्धरात्रयुता यात्र माघकृष्णचतुर्दशी। शिवरात्रिव्रतं त
त्र सोऽश्वमेधफलं लभेदिति। स्कन्दे तु रेपि। अवघस्त्रयोदश्यां भूतव्याप्ता महानिशा। शिवरात्रिव्रतं त
त्र कुर्याज्जागरणं तथेति। ईशानसंहितायां। माघकृष्णचतुर्दश्यामादिदेवो महानिशि। शिवलिंगतयो
द्भूतः कोटिसूर्यसमप्रभः। तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः। अर्धरात्रादधश्चोर्ध्वं युक्ता य
त्र चतुर्दशी। तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती। अर्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी। नैव
तत्र व्रतं कुर्यादायुरैश्वर्यहानिदेति। व्याप्याप्यर्धरात्रं यस्यां तु दृश्यते या चतुर्दशी। तस्यामेव व्रतं कार्यं
मत्प्रसादार्थिभिर्नरैः। सर्वेष्वपि परेष्वपि महानिशि चतुर्दशी। व्याप्ता सा दृश्यते यस्यां तस्यां कुर्यात्व्र

तंनरः। लिंगाविर्भावकालेतुव्याप्ताग्राह्यासा चतुर्दशी। तदूर्ध्वाधोन्विताग्राह्यासाकार्याव्रतिभिःसदा। म
मप्रियकरीह्येषा माघकृष्णचतुर्दशी। महानिशान्वितायातु तत्रकुर्यादिदंव्रतमिति। एवंसतिपूर्वेद्यु
रेववापरेद्युरेववा यत्रप्रदोषनिशीथोभयव्याप्तिस्तत्रव्रतमाचरणीयं। पूर्वेद्युरेवोभयव्याप्तौस्कंदपुराणे
पठ्यते। त्रयोदशीसदादेवि दिनभुक्तिप्रमाणतः। जागरेशिवरात्रिःस्यान्निशिपूर्णाचतुर्दशी। दिनभुक्तिरस्तम
यतःपरेद्युरेवोभयव्याप्तौ कामिकेपठ्यते। निशाद्वयचतुर्दश्यांपूर्वात्याज्यापराशुभेति। दिनद्वयेप्यनुभयव्या
प्तिस्तुनसंभाव्यते। यामद्वयवृद्धेरभावात्। दिनद्वयेप्युभयव्याप्त्यभावोपिनसंभाव्यते। यामत्रयह्रासस्या
भावात्। एकैकस्मिन्दिने एकैकव्याप्तौतु कथमितिचेत्। साद्वेधासंभवति। पूर्वेद्युर्निशीथव्याप्तिःपरेद्युःप्रदोष
व्याप्तिरिति। तत्रैकव्याप्तेर्दिनद्वयेसमानत्वेपिजयायोगस्यप्रशस्तत्वाद्दर्शयोगस्यनिंदितत्वाच्चपूर्वेद्युरेवोप
वासः। जयायोगप्राशस्त्यंचानेकवचनैरादृतत्वादवगम्यते। तथाचस्कंदपुराणेपठ्यते। कृष्णाष्टमीस्कंद
षष्ठीशिवरात्रिचतुर्दशी। एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंभवेत्। जन्माष्टमीरोहिणीचशिवरात्रिस्त
थैवच। पूर्वविद्धैवकर्तव्यातिथिभांतेचपारणं। श्रावणीदुर्गनवमीतथादूर्वाष्टमीचया। पूर्वविद्धातुकर्तव्या
शिवरात्रिर्बलेर्दिनमिति। जयंतीशिवरात्रिश्चकार्येभद्राजयान्वितेइतिवा। नागरखंडे। माघफाल्गुनयो
र्मध्येअसितायाचतुर्दशी। अनंगेनसमायुक्ताकर्तव्यासासदातिथिरिति। पद्मपुराणे। अर्धरात्रा



रस्तात्त्रेजयायोगोयदाभवेत्। पूर्वविद्धैवकर्तव्याशिवरात्रिःशिवप्रियैरिति। ब्रह्मवैवर्ते। रुद्रव्रतेषु
सर्वेषुकर्तव्यासंमुखीतिथिः। अन्येषुव्रतकल्पेषुपरयुक्तामुपावसेदिति। दर्शयोगनिंदाचस्कंदपु
राणेदर्शिता। महतामपिपापानांदृष्टावैनिष्कृतिःपुरा। नदृष्टाकुर्वतांपुंसांकुहूयुक्तांतिथिंशिवामि
ति। अन्यान्यपियानिकानिचिद्दर्शयोगनिंदावचनानितत्रतत्रस्मर्यते। तानिसर्वाण्यस्मिन्विषयेयो
जनीयानि। यदापूर्वेद्युर्निशीथादूर्ध्वंप्रवृत्ताचतुर्दशीपरेद्युःक्षयवशान्निशीथादर्वागेवसमाप्तातदा
पूर्वेद्युःप्रदोषनिशीथव्याप्त्योरन्यतरस्याप्यसंभवात्परेद्युःप्रदोषव्याप्तेरेकस्याःसद्भावाच्चपरविद्धैवग्रा
ह्या। एतदेवाभिप्रेत्यस्मर्यते। मार्घ्यमितेमूर्त्तेदिनक्षयादिवृद्धयेतियोगंयादिपंचदश्या। जयात्रयुक्तांन
तुजातुकुर्याच्छिवस्यरात्रिंप्रियकृच्छिवस्येति। यदापूर्वेद्युःप्रदोषादूर्ध्वंप्रवृत्ताचतुर्दशीपरेद्युःक्षय
वशात्प्रदोषादर्वागेवसमाप्ता। तदापरेद्युर्व्याप्तिद्वयाभावात्पूर्वेद्युर्निशीथव्याप्तेःसद्भावाज्जयायो
गाच्चपूर्वेद्युरेवोपवासः। तत्रायंविवेकःसंपन्नः। दिनद्वयेनिशीथव्याप्तौतदव्याप्तौचप्रदोषव्याप्तिर्नि
यामिका। तथादिनद्वयेपिप्रदोषव्याप्तौतदव्याप्तौचनिशीथव्याप्तिर्नियामिका। एकैकस्मिन्दिने
एकैकव्याप्तौजयायोगोनियामकइति। अस्यशिवरात्रिव्रतस्याहोरात्रसाध्यत्वेनमहानिशात्रोच
संबंधेसाधारणेसत्यपिहर्वेधमुपेक्ष्यप्रदोषनिशीथयोरेवकृतःशास्त्राणांपक्षपातइतिचेत्

तत्रैव प्राधान्यादिति ब्रूमः। तस्या धात्र्यैवोपपत्तेः स्कंदपुराणे पठ्यते। निशि भ्रमंति भूतानि शक्तयः
शूलभृद्यतः। अतस्तस्यां त्रयोदश्यां सत्यां तत्पूजनं भवेदिति। तस्यां त्रयोदश्यामिति च अधिकरणसप्तमी॥
तथा चायमर्थः संपद्यते। त्रयोदशी निशीथे तस्यां चतुर्दश्यां विद्यमानायां शिवपूजनं भवेदिति। नागर
खंडेपि। माघमासस्य कृष्णायां चतुर्दश्यां सुरेश्वर। अहं यास्यामि भूपृष्ठे रात्रौ नैव दिवा क्वचित्। लिंगेषु
च समस्तेषु चरेषु स्थावरेषु च। संक्रमिष्याम्यसंदिग्धं वर्षपापविशुद्धये। रात्रौ तस्यां हि मन्त्रैर्यः क
रिष्यति मानवः। मंत्रैरेतैः सुरश्रेष्ठ विपापः स भविष्यतीति। सा च शिवरात्रिचतुर्दशी त्रिविधा भव
ति। एकतिथ्यात्मिका तिथिद्वयात्मिका तिथित्रयात्मिका चेति। तत्र सूर्योदयमारभ्य प्रवृत्ता परदिनो
दयपर्यंतैकतिथ्यात्मिका। सा चैव दोषाभावात्प्रशस्ता। तिथिद्वयात्मकत्वं च द्वेधा भवति ऊर्ध्वयोगेन
दर्शयोगेन च। तत्र योगद्वयमेकैकस्मिन् विषये प्रशस्तौ। स च विषयविशेषः पूर्वमेवोदाहृतः। तिथित्र
यात्मकत्वं तु तिप्रशस्तं। एतदेवाभिप्रेत्य पुराणे पठ्यते। त्रयोदशी कलाप्येका मध्ये चैव चतुर्दशी। अंते चै १०६
व सिनीवाली त्रिस्पृशां शिवमर्चयेदिति। यथा त्रिस्पृशा प्रशस्ता तथा वारविशेषेण च प्रशस्ता भवति। त
था च स्कंदपुराणे पठ्यते। माघकृष्णचतुर्दश्यां रविवारो यदा भवेत्। भौमो वाथ भवेद्देवि कर्तव्यं व्रतमुत्तमं।
शिवयोगस्य योगेन तद्भवेदुत्तमोत्तमं। शिवरात्रिव्रतं त्वेतद्भवेदुत्तमोत्तमं इति। ननु यदा सर्वविद्धामुप

वासस्तदा पारणं किं तिथ्यंते पारणं भवति। किं वा तिथिमध्ये इति संशय उपस्थिते द्वयेपि समानं। तत्र तिथ्यंते पारणे
वचनानि पूर्वमुदाहृतानि। तिथिमध्ये पारणे वचनं तु स्कंदपुराणे पठ्यते। उपवासं चतुर्दश्यां चतुर्दश्यां तु पा
रणं। कृतैः सुकृतलक्षैश्च लभ्यते वाथवा न वा। ब्रह्मा स्वयं चतुर्वक्त्रैः पंचवक्त्रैश्च शाप्यहं। सिकथ्येसिकथ्ये
पूतं तस्य माहात्म्यं वक्तुं न पार्यते। बिल्वं उदरमध्ये तु यानि तीर्थानि संति वै। संस्थितानि भवंतीह भूता तापा
रणे कृते। तिथीनामेव सर्वासामुपवासव्रतादिषु। तिथ्यंते पारणं कुर्याद्विना शिवचतुर्दशीं। बाढं। अ
स्मिन् हि द्विविधशास्त्रं तस्य द्विविधस्य शास्त्रस्य प्रतिपत्करणेन न्यायेन व्यवस्था द्रष्टव्या। यदा यामत्र
यादर्वागेव चतुर्दशी परिसमाप्यते। तदा तिथ्यंते पारणं। यदा तु चतुर्दशी यामत्रयमतिक्रामति तदा चतु
र्दशीमध्ये एव प्रातः पारणं कुर्यात्॥ ॥ इति चतुर्दशीनिर्णयः॥ ॥ ॥ अथ पंचदशी निर्णीयते॥ ॥
सा च द्विविधा पौर्णमास्यमावास्या च। तत्र पौर्णमास्यां परस्य विद्धा निवाकव्यानुपपत्स्यते। तत्र पर
विद्धा याः सत्त्वे विष्णुधर्मोत्तरे। एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी। अमावास्या तृतीया च उ
पोष्याः स्युः परान्विताः। परविद्धानिषेधः पूर्वविद्धाविधिश्च ब्रह्मपुराणपद्मपुराणयोः। षष्ठ्येकादश्य
मावास्या पूर्वविद्धा तथाष्टमी। पौर्णमासी परविद्धा च नोपोष्या तिथिपंचकं। पूर्वविद्धा तु कर्तव्या सप्तमी

श्रुतिभिर्नरैः। पूर्णिमास्यां महीपाल परायानियमां गतेति। पूर्वविद्धत्वं च मुख्यमवाक्ये चतुर्दश्या च पूर्
णिमेति। एवं परस्परविरोधे सति व्यवस्था सा ब्रह्मवैवर्ते दर्शिता। पूर्वविद्धा न कर्तव्या अमावास्या च पूर्णि
मा। वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति। सावित्रीराजकन्यया चीर्णं व्रतं सावित्रीव्रतं ... मिति।
तच्च भविष्योत्तरपुराणे दर्शितं। कथयामि कुलस्त्रीणां महिम्नो वर्धनपरं। यथा चीर्णं व्रतं सम्यक् सावित्र्या रा
जकन्ययेति। एतच्च पौर्णमास्याममावास्यायां च दर्शितं। तस्मिन् व्रते पूर्वविद्धामावास्या व्रतान्तरे पूर्वविद्धा
न कर्तव्या किंतु परविद्धैव कर्तव्येति परस्परविरुद्धस्य शास्त्रद्वयस्य व्यवस्था। यदा तु चतुर्दश्यष्टादशनाडि
का भवति तदा सावित्रीव्रतमपि तत्र परित्याज्यं। भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति स्मृतेः। यो यं
पौर्णमासीनिर्णयः स एवामावास्यायामप्यनुगन्तव्यः। तत्रापि सावित्रीव्रतं पूर्वदिने कर्तव्यं। अस्यां च व्यवस्था
यां ब्रह्मवैवर्तवचनमुदाहृतं स्कंदपुराणे। भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत्। वर्जयित्वा तु सावि
त्रीव्रतं तु शिखिवाहनेति। एवं च सति अमायुग्मशास्त्रं सावित्रीव्रतादिकेषु व्रतेषु द्रष्टव्यं। प्रचेता अपि २०७
नागविद्धा तु या षष्ठी सप्तम्या च युताष्टमी। दशम्येकादशी विद्धा त्रयोदश्या चतुर्दशी। भूतविद्धाप्यमावा
स्या न ग्राह्या मुनिपुंगवैः। उत्तरोत्तरविद्धास्ताः कर्तव्याः काश्चीकृतिरिति। पद्मपुराणेपि पक्षपूर्णमी

ति३

तथा दर्शः कृष्णपक्षे त्रयोदशी। एताः परयुताः कार्याः पराः पूर्वेण संयुताः। यत्तु नारदीयपुराणे दर्शं च पौर्णमासं च
पितुः सांवत्सरं दिनं। पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यत इति तत्सावित्रीव्रतविषयं श्राद्धविषयं वा। अमावास्या
यामिव पौर्णमास्यामपि श्राद्धं विहितं। तथा च पितामहः। अमावास्याव्यतीपातपौर्णमास्यष्टकासु च। विद्वान्
श्राद्धमकुर्वाणः प्रायश्चित्तीयते हि स इति। अमावास्याश्राद्धस्य च पार्वणरूपत्वमपराह्णस्य तत्कर्मकालत्वं कुतु
पस्य प्रारंभकालत्वमित्येतत्त्रितयं प्रतिपत्प्रकरणे प्रत्याब्दिकनिर्णये प्रपंचितं। तथा च सत्यपराह्णस्य मुख्यक
र्मकालत्वात् पूर्वेद्युरेवापरेद्युरेव वापराह्णव्यापिन्यमावास्या ग्रहीतव्या। तत्रापराह्णव्यापिन्याः पूर्वतिथेर्ग्राह्यत
माह हारीतः। यस्यां संध्यागतः सोमो मृणालमिव दृश्यते। अपराह्णे तु या तस्यां पिंडानां करणं ध्रुवमिति। यत्तु का
र्ष्णाजिनिनोक्तं। भूतविद्धाममावास्यां मोहादज्ञानतोपि वा। श्राद्धकर्माणि ये कुर्युः तेषामायुः प्रहीयत इति। तदपरा
ह्णव्याप्त्यभावविषयं द्रष्टव्यं। अपराह्णव्यापित्वादुत्तरतिथेर्ग्राह्यतामाह हारीतः। अपराह्णः पितृणां तु या पराह्णानु
यायिनी। सा ग्राह्या पितृकार्ये तु न पूर्वास्तानुयायिनीति। न च यत्रापराह्णव्याप्तिर्द्वेधा निषेधते। एकदेशेन कृत्स्ने
न चेति। एकदेशव्याप्तिस्तु द्वेधा निषेधते वैषम्येण साम्येन चेति। तत्र वैषम्ये एकदेशव्याप्तौ महत्त्वेन निर्णेतव्या तथा
च स्मृतिः। अपराह्णद्वयव्यापिन्यमावास्या यदा भवेत्। तत्राल्पत्वमहत्त्वाभ्यां निर्णयः पितृकर्मणीति। महत्त्वव
याप्त्येत्यभिप्रायः। स च पिंडवरावरसंस्कारस्य पृष्ठमभिहितः। अत्राप्यपराह्णे त्वल्पा सा ग्राह्यास्या ह्यधिका भवेदिति।

साम्येनैकदेशव्याप्तौ खर्वादिदिशा क्रमेण निर्णयः। साम्ये नाम यत्रैकदेशव्याप्तिस्तत्र तिथिवृद्धिक्षयसाम्येनाभि-
धीयते। तथाहि। पूर्वेद्युरपराह्णस्य द्वितीयघटिकामारभ्य परेद्युरपराह्णस्य पंचघटिकापर्यंतं यदा तिथिर्वर्त्तते तदा पू-
र्वापराह्णस्य प्रथमघटिकां द्वितीयापराह्णस्य चरमघटिकां च विहाय मध्ये घटिकासु पंचसु वर्त्तमानत्वात् साम्येनैक-
देशव्याप्तिर्भवति। तिथिश्चैतद्घटिकाचतुष्टयेन वर्धते। यदा च पूर्वापराह्णस्य चरमघटिकायामुत्तरापराह्ण-
स्य चरमघटिकात्रये द्वितीयापराह्णस्य च प्रथमघटिकात्रये प्रथमघटिकात्रये तिथिर्वर्त्तते तदा साम्येनैकदेश-
व्याप्तिस्तदवस्था। तिथिस्तु न वर्धते नापि हीयते। किंतु समे वर्द्धमाने क्षये खर्वदर्पवाक्यान्निर्णयः। न च खर्वादि-
वाक्यं सर्वतिथिसाधारण्येन प्रवृत्तत्वादमावास्यायामपि प्रवर्त्तेत। तथामास्यायामवविशेषेण शिवरात्रिवत्सर्वा-
रस्य एवायं दर्शितः। अमावास्या तु या हि स्यादपराह्णद्वये समा। क्षये पूर्वापरा वृद्धौ साम्येपि च परा स्मृतेति। स्मृत्यंत-
रेपि। तिथिद्वयं सिनीवाली तिथिरेका कुहूर्मता। साम्येपि च कुहूः पूर्वा यावेदवेदांगपारगैरिति। चतुर्दशीमिश्रा सि-
नीवाली प्रतिपन्मिश्रा कुहूः। तथा च व्यासः। दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूर्मतेति। कात्यायनोप्यत्रापराह्ण-
व्यापितिथिवृद्धित्वात् कुहूरेव ग्राह्या। यद्यपि दिनद्वयेप्यपराह्णव्याप्तिस्तदा साग्निकनिरग्निकभेदेन व्यवस्था द्रष्टव्या।। १०८
तदाह जाबालिः। अपराह्णद्वयव्यापि यदि स्याद्दर्शतिथिः क्षये। आहिताग्नेः सिनीवाली निरग्नेः कुहूर्मतेति। आ-
दिशब्दात् स्त्रीशूद्रयोरपि ग्रहणं। तदाह लौगाक्षिः। सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि। स्त्रीभिः शू-
द्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैरिति। एवं शास्त्रार्थे व्यवस्थिते सति यानि बहुविधानि वाक्यानि तानि स-

र्वाणि ग्रंथेकृष्णामावास्याभेदेषु अन्यतमविषयत्वेन यथायोगं योजनीयानि। तथाहि। तत्र तावद्द्वैपायन
आह। मध्याह्नात्परतो यत्र चतुर्दश्यनुवर्त्तते सिनीवाली तु सा ज्ञेया पितृकार्ये तु निःफलेति। बृहस्पतिरपि।
मध्याह्नाद्यास्त्वमावास्या परस्तात् संप्रवर्त्तते। भूतविद्धा तु सा ज्ञेया न सा पंचदशी भवेदिति। मध्याह्नादूर्ध्व-
मपराह्णमतिक्रम्य परस्तादमावास्या प्रवर्त्तते इति व्याख्येयं। तदेतद्वचनद्वयं परेद्युरेवापराह्णव्याप्तौ यो-
जनीयं। यत्तु कात्यायनवचनं। पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते। वासरस्य तृतीयांशे नाति-
संध्यासमीपतः इति। पिंडानां पिंडपितृयज्ञांगभूतानामनु पश्चादाहियते क्रियत इति पिंडान्वाहार्यकं
श्राद्धममावास्यं तत् क्षीणे राजनि दिने कर्त्तव्यं। वासरस्य तृतीयांशे इति अनेनैवायं पूर्वोऽपराह्णः सायाह्नसहितो निर्दि-
श्यते। तत्र नातिसंध्यासमीप इत्यनेन सायाह्नस्य प्रतिषेधे सत्यपराह्णः कर्मकालत्वेन परिशिष्यते। तथा च कर्मकाल-
व्यापिनी तिथिर्ग्राह्येत्युक्तं। तत्रैव दृश्यस्य चतुर्दश्या अष्टमे प्रहरे आरंभः अमावास्यायाः स चाष्टमे प्रहरे समाप्तिः
तदेतदुभयं कात्यायन एवाह। अष्टमे शेषे चतुर्दश्याः क्षीणो भवति चंद्रमाः। अमावास्याष्टमांशे च पुनः किल व-
र्द्धत इति। यत्तु जाबालिनोक्तं। प्रतिपत्त्वप्यमावास्या पूर्वाह्णव्यापिनी यदि। भूतविद्धैव सा कार्या पित्र्ये क-
र्मणि सर्वदेति। अत्र पूर्वाह्णव्यापिनीति तिथिरिति विशेषकथनादपराह्णव्यापित्वं नास्तीत्येवगम्यते। तादृशी
च द्विविधा। पूर्वेद्युरपराह्णव्यापिनी तद्रहिता वा। आद्यपक्षे सर्वैरपि भूतविद्धा कार्या। द्वितीयपक्षे साग्निकैरेव
भूतविद्धा कार्या। यच्च हारीतेनोक्तं। सर्वाह्णे चेदमावास्या अपराह्णे न चेत्तु सा। प्रतिपद्यपि कर्त्तव्यं श्राद्धं श्राद्धवि-

दोविद्धेतिति। तद्दिवसद्वयेप्यपराह्णव्याप्तित्वाभावेसतिनिरग्निकविषयं। यदपिहारीतेनोक्तं। भूतविद्धाप्यमावा
स्याप्रतिपन्मिश्रितापिवा। पित्र्येकर्मणिविद्वद्भिर्ग्राह्याकुतपकालिकीतितदेकोद्दिष्टविषयं। एकोद्दिष्टस्यकुतपप्रा
धान्यंप्रतिपत्प्रकरणेप्रपंचितं। यत्तु। प्रतिपन्मिश्रायाअप्यपराह्णव्याप्तित्वाभावेनिरग्निकेरपिहेयत्वाशंकां
यांग्राह्यत्वेकुतपव्याप्तिरनुकल्पत्वेनाभिधीयते। अपराह्णव्याप्तिःपार्वणेमुख्यःकल्पः कुतपव्याप्तिरनुकल्पः तथा
चमुख्यासंभवेअनुकल्पस्योपादेयत्वान्निरग्निकैःप्रतिपन्मिश्राग्राह्येत्युच्यते। भूतविद्धायांकुतपकालि
कत्वेसत्यपराह्णिकत्वमर्थसिद्धंतथासतिमुख्यानुकल्पयोरुभयोरपिसद्भावात्कुतपस्यप्रारंभकालत्वाच्चप्रत्या
ब्दिकप्रकरणोदाहृतदेवस्वामिवचनेनकर्मणोपिक्रमोपसंहारकालव्याप्तिर्दर्शिताभवति। तच्चादर्शंतत्वेनोपन्यस्
तायथाकुतपव्यापिनीभूतविद्धापादेयातथाप्रतिपद्विद्धापिकुतपव्याप्त्याउपादेयाभवति। तच्चबोधायनआ
ह। घटिकैकाप्यमावास्याप्रतिपत्सुनचेत्तदा। भूतविद्धैवसाग्राह्यादैवेपित्र्येचकर्मणीति। प्रतिपत्सुघटिकैका
पिकर्मकालसंबंधिनीयदिनस्यादित्यर्थः। तदेतद्वचनंसर्वेष्विदैवापराह्णव्याप्तौद्रष्टव्यं। अग्निमतेर्वविषयेजा
बालिराह। प्रतिपत्स्वप्यमावास्यासर्वाह्णव्यापिनीयदि। भूतविद्धैवसाग्राह्यापित्र्येकर्मणिसर्वदेति। यत्तु १०९
हारीतवचनं। कन्यामकरमीनेषुतुलायांमिथुनेतथा। भूतविद्धैवसर्वेषांग्राह्याभवतियत्नतः। इतितद्वि
तविषयं। तथाचजाबालिः। तुलायांमिथुनेमीनेकन्यायांमकरेप्यमा। भूतविद्धाव्रतेग्राह्याशेषेतुप्र
तिपद्युतेति॥ ॥इतिपंचदशीनिर्णयः॥

अथेष्टिकालोनिर्णीयते। नचेष्टेःप्रतिपदिकर्तव्यतयापूर्वप्रकरणएवकुतोयंनाभिहितइतिशंकनीयं। पर्वचतु
र्थांशस्यापिप्रतिपद्वदिष्टिकालत्वात्। पर्वप्रतिपत्संधिसापेक्षत्वाच्च। अतःपर्वनिर्णयानंतरमस्यनिर्णयस्यावस
रइतीदानींनिर्णीयते। तत्रेदंचिंत्यते। किंपर्वप्रतिपदोःसंधिरिष्टिकालःकिंवासंधेरुपोष्यादित्वात्तदर्थंप्रथ
मंसंधिस्वरूपंनिरूपणीयं। तन्निरूपणंचपर्वभेदाधीनं। अतःपर्वभेदोनिरूप्यते। पर्वचद्विविधं। पौर्णमास्यमावास्या
चेति। ननुप्रतिपदमारभ्यचतुर्दश्यंतानांतिथीनांस्वरूपद्वयोर्नास्तिनामभेदःपंचदश्यांतुकिमर्थोयंनाम
भेदइतिचेत्। तयोर्विशेषस्यबहुलायनाहेतिब्रूमः। अथमद्वितीयादीनांचंद्रकलानामध्येयत्संख्याकाकलाव
र्धतेतत्संख्याकाशुक्लपक्षेतिथिर्व्यवह्रियते। कृष्णपक्षेपिक्षीयमाणायाःतस्याःकलायानाम्नातत्तिथिव्यवहारःतेन
न्यायेनान्यतिथिवदपिपक्षद्वयेपंचदशीत्येवव्यवहारः। तत्रशुक्लायांपंचदश्यांचंद्रमंडलंस्वकलाभिःसर्वात्मनापू
र्यतेसेयंमंडलपरिपूर्तिःपूर्णिमेत्यनेननाम्नाज्ञाप्यते। तदुक्तंब्रह्मांडमत्स्यपुराणयोः। कलास्वयेयातिकांतेदि
वापूर्वोपिरस्परं। चंद्रादित्योपराह्णेतुपूर्णत्वात्पूर्णिमास्मृता। इति। अह्नःपरोभागःपराह्णः। सायाह्नसमयकाल
इत्यर्थः। तत्रयथादित्यःसहस्रार्कमंडलःसन्नस्तमेतितथोत्तरस्मिन्नेवचंद्रःसंपूर्णमंडलःसन्नुदेतीतिदृष्टांतदार्ष्टांति
कभावंविवक्षित्वाद्योरादित्यचंद्रयोरुपन्यासः। यथामंडलपूर्णत्वविवक्षयापूर्णिमाशब्दःप्रयुज्यतेतथामा
सपूर्णत्वविवक्षयापौर्णमासीशब्दःप्रयुज्यते। तदुक्तंविष्णोत्तरे। पौर्णमासीमहाराजसोमस्यदयितातिथिः। ह

लेऽस्मिन् सोऽनवेघस्मात्पौर्णमासी ततः स्मृतेति। सूर्येणामावास्यापौर्णिकस्येन मासांतत्वं मासप्रस्तावे दर्शितं। अमा
वास्येत्यनेन नाम्ना बहवोर्थाः कथ्यंते। तत्रामाशब्दस्य चत्वारोर्थाः सहभावः। कन्या सूर्यरश्मिश्चंद्रकला चेति। तथा व
सुशब्दस्य चत्वारोर्थाः। इंद्रश्चंद्रः पितृविशेषः निवासश्चेति। तत्र सहभाववाचिनममाशब्दं इंद्रवाचिनं वसुश
ब्दं चोरीकृत्य निर्वचनमेवं प्रवर्तते। अमा वसुरस्यामित्यमावास्येति। अयमर्थः। वृत्रवधानंतरं जोषितेंद्रसमा
गमे संतुष्टा देवाः परस्परमवोचत। अमास्माभिः सह इंद्रो निवसतीति। अतस्तस्य दिनस्यामावास्यात्वमिति। सोऽयम
र्थः शतपथब्राह्मणे दर्शपौर्णमासप्रकरणे श्रूयते। ते देवा अब्रुवन् अमा वै नोऽद्य वसुर्वसति यो नः प्रवात्सीदिति।
तैत्तिरीयब्राह्मणेऽपि स्पष्टमयमेवार्थः श्रूयते। इंद्रो वृत्रं हत्वा परां परावतमगच्छदपराधमिति मन्यमानस्तं देवाः प्रै
षमैच्छन्नित्यास्य पठ्यते।। सोमावास्यां रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायत इति।
अमावसुशब्दौ यदा कन्यापितृवाचिनौ तदानीमेवं निर्वक्तव्यं। अमावसुमैच्छदस्यां रात्राविति अमावास्या। अमाशब्दा
भिधेया काचित्कन्या तस्यां रात्रौ वसुनामानं पितरं वव्रे। स च पिता धर्मलोपाद्भीतः सन् तां कन्यां नैच्छत्सोऽयमितिहा
सः पद्मपुराणेऽवगंतव्यः। अमावसुशब्दौ सूर्यरश्मिनिवासवाचिनौ तदा तदनुसारेण निर्वचनं स्कांदे नागरखं १०१०
डे पठ्यते। अमानाम रवेरश्मिः सहस्रप्रमुखः स्मृतः। यस्य च तेजसा सूर्यस्त्रैलोक्ये लोकदीपकः। तस्मिन्वस
ति येनेंदुरमावास्या ततः स्मृतेति। ब्रह्मांडपुराणेऽपि। अमानाम रवेरश्मिश्चंद्रलोके प्रतिष्ठिता। यस्मात्सोमोव
सत्तस्याममावास्या ततः स्मृतेति। अमावसुशब्दयोः सहभावनिवासवाचित्वमाश्रित्य मत्स्यवायुब्रह्मांडपुरा

णेषु निर्वचनं दृष्टव्यं। उक्तं। अमावसेतामृक्षे तु यदा चंद्रदिवाकरौ। एकां पंचदशी रात्रिरमावास्या ततः स्मृतेति।
अमाशब्दस्य चंद्रकलावाचित्वं स्कांदे दर्शितं। अमा षोडशभागेन देवि प्रोक्ता महाकलेति। तां कलामुपजीव्य निर्व
चनं भगवतीपुराणे दर्शितं। कलावशिष्टे निःक्रांतः प्रविष्टः सूर्यमंडलं। अमायां विशते यस्मादमावास्या ततः स्मृ
तेति। अमावास्याशब्दपर्यायो दर्शशब्दोऽपि द्विधा निरुच्यते। सूर्याचंद्रमसौ परस्परं पश्यतोऽत्रेति दर्शः। तदुक्तं म
त्स्यवायुपुराणयोः। आश्रित्य ताममावास्यां पश्यतः सुसमागतौ। अन्योन्यं चंद्रसूर्यौ तु यदा तद्दर्श उच्यत इति।
न दृश्यते चंद्रोऽत्रेति द्वितीयं निर्वचनं। यद्यपि तदानीमदर्श इति वक्तव्यं। तथापि विपरीतलक्षणया दर्श इत्युच्यते।
तदेतदाचार्यैरुक्तं। भूरेकांतरशब्दवदिति। चंद्रादर्शनं च शतपथवाक्येन स्पष्टमुदाहृतं। स यत्रैष एतां रात्रिं
न पुरस्तान्न पश्चाद्ददृश इति। अदर्शने च कारणं सूर्याचंद्रमसोरत्यंतसन्निकर्षः। सति च तस्मिन्सन्निकर्षे र
हता सौरेण तेजसा चांद्रं तेजोऽभिभूयते। अत एव पौर्णमास्यामत्यंतविप्रकर्षे सति अनभिभूतत्वाच्चंद्रमंडलं
संपूर्णं दृश्यते। तावेतौ सन्निकर्षविप्रकर्षौ गोभिल आह। यः परो विप्रकर्षः सूर्याचंद्रमसोः सा पौर्णमासी यः
परः सन्निकर्षः सामावास्येति। तदेवं चतुर्वाभिधायाः पंचदश्याः पूर्णिमादिनामनिर्वचनेन स्वभावविशेषो ज्ञापि
तो भवति। ते च पौर्णमास्यमावास्ये प्रत्येकं द्विविधे। तच्च पुराणे दर्शितं। राका चानुमतिश्चैव पौर्णमासी द्विधा
मता। सिनीवाली कुहूश्चैव अमावास्या द्विधैव त्विति। एतासां चतसृणां स्वरूपं कठशाखायां विस्पष्टं
श्रूयते। या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका। या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति।
वृद्धवसिष्ठोऽपि। राका चानुमतिश्चैव पौर्णमासी द्वयं विदुः। राका संपूर्णचंद्रा स्यात्कलोनानुमतिर्मता।

पौर्णमासी दिवादृष्टे शशिन्यनुमतिः स्मृता। रात्रिदृष्टे पुनस्तस्मिन् सैव राकेति कीर्त्तितेति। । मत्स्यब्रह्मांडपुरा
णयोः। यस्मात्तामनुमन्यंते पितरो देवतैः सह। तस्मादनुमतिर्नाम पूर्णिमा प्रथमा स्मृता। अत्यर्थं राजते यस्मा
त् पौर्णमास्यां निशाकरः। रंजनाच्चैव चंद्रस्य राकेति कवयो विदुरिति। । बृहद्वसिष्ठः दृष्टचंद्राममावास्यां सिनी
वालीं प्रचक्षते। एतामेव च कुहूं प्राहुर्नष्टचंद्रां महर्षय इति। तदेवं चत्वारः पर्वभेदाः निरूपिताः। तेषु कुहूव्यतिरि
क्तानां त्रयाणां भेदानां लघ्व्यक्षरोच्चारणपरिमितः कालः संधिरित्युच्यते। कुहूकालस्त्वक्षरद्वयपरिमितः कालः।
तदेतदुक्तं भगवतीपुराणे। । अनुमत्याश्च राकायाः सिनीवाल्याः कुहूं विना। एतासां द्विलवः कालः कुहूमात्राकु
हूः स्मृतेति। तत्र लवस्वरूपं स्मृत्यंतरे दर्शितं। लघ्वक्षरचतुर्भागः त्रुटिरित्यभिधीयते। त्रुटिद्वयं लवः प्रोक्तो नि
मेषस्तु लवद्वयमिति। एवं च सति त्रुटिशब्दाभिधेयानां भागानां चतुष्टयं लवद्वयरूपं लघ्वक्षरसमं भवति। तस्मि
न् लघ्वक्षरपरिमिते काले एकः पर्वणो भागः द्वितीयः प्रतिपदः तदुभयं मिलित्वा संधिर्भवति। कुहूप्रतिपदोः संधि
स्तु सर्वस्माद्द्विगुणः अक्षरद्वयपरिमितत्वात्। मत्स्यब्रह्मांडपुराणयोः। राका चानुमतिश्चैव सिनीवाली कुहूस्तथा।
एतासां द्विलवः कालः कुहूमात्रा कुहूस्तथा। कुहूरिति कोकिलेनोक्ते यावान् कालः समाप्यते। तत्कालसंमितां चैवा ११२
हुरमावास्यां कुहूं स्मृतां। इत्येष पर्वसंधीनां कालो वा द्विविधः स्मृत इति। एवं संधौ निरूपिते सति योऽयं प्रक्रांतो वि
चारस्तत्र संधिरेवेष्टिकाल इति तावत्प्राप्तं। संधौ यजेतेति श्रुतेः। मैवं। संधेः सूक्ष्मत्वात् तत्र यागानुष्ठानानुपपत्तेः।
का तर्हि श्रुतेर्गतिः। पार्श्वद्वयलक्षणेति। ब्रूमः। यथा गंगायां घोष इत्यत्र गंगाशब्दः प्रवाहेऽनुपपन्नस्तत्समीपं तीरं

द्वं १

लक्षयति तथा संधिशब्दोऽपि पार्श्वे लक्षयतु। अत एव श्रुत्यंतरं संधिमभितो यजेतेति। बौधायनोऽपि। सूक्ष्मत्वात्संधि
कालस्य संधेर्विषय उच्यते। सामीप्यं विषयं प्राहुः पूर्वेण चापरेण चेति। अत्र पूर्वापरशब्दाभ्यां संधेः प्राचीनं पर्व
दिनं प्रतीचीनं प्रतिपद्दिनं चाभिधीयते। तत्र पूर्वस्मिन् पर्वदिने यागप्रारंभः उत्तरस्मिन् प्रतिपद्दिने यागसमाप्तिः। अ
न्वाधानमिध्माबर्हिःसंपादनमग्निपरिग्रहणमुपस्तरणं चेत्येवमादिः प्रयोगप्रारंभः स पूर्वेद्युरनुष्ठेयः। तथा च तैत्तिरी
यब्राह्मणे श्रूयते। पूर्वेद्युरिध्माबर्हिः करोति। यज्ञमेवारभ्य गृहीत्वोपवसतीति। शतपथब्राह्मणेऽपि। पूर्वेद्युरग्निं गृ
ह्णाति उत्तरमहर्यजतीति। तत्राग्निग्रहणं नामाध्वर्युणा आहवनीयगार्हपत्यदक्षिणाग्निषु ममाग्ने वर्च इत्यादिभि
र्ऋग्भिः समिदाधानलक्षणेऽन्वाधाने क्रियमाणे पार्श्ववर्तिना यजमानेनाग्निं गृह्णामीत्यादीनां मंत्राणां पठनं। तदिदं
पर्वदिने क्रियते। प्रतिपद्दिने तु कर्मणे वां देवेभ्य इत्यादिभिरध्वर्युर्हस्तप्रक्षालनं तंडुलनिर्वापपुरोडाशप्रदानादिलक्ष
णं प्रयोगं करोति। तदिदं यजनं। एतदेवाभिप्रेत्य गोभिल आह। पक्षांता उपवस्तव्याः पक्षादयोऽभियष्टव्या इति। अत्रो
पवासशब्देनाग्न्युपस्तरणादिर्विवक्षितः। तस्मिन् क्रियमाणे यजमानसमीपे देवतानां निवासात्। तदेतत्तैत्तिरीयब्रा
ह्मणे दर्शितं। उपास्मिन् श्वो यक्ष्यमाणे देवता वसंति य एवं विद्वानग्निमुपस्तृणातीति। उपवासशब्दाभिधेयस्य पर्व
दिने कर्त्तव्यस्यान्वाधानादेः पर्वणि चतुरंशावति आद्यास्त्रयोंशाः विहितः कालः न तु चतुर्थोंशः। यागशब्दाभिधेयस्य
पुरोडाशप्रदानादेः पूर्वोक्तः पर्वचतुर्थांशः प्रतिपदंशास्त्रयश्च विहितः कालः। न तु प्रतिपच्चतुर्थोंशः। तदेतदाह लौ
गाक्षिः। त्रीनंशानुपवस्तस्य यागस्यैव चतुरो विदुः। द्वावंशावुत्तरे दद्यात् यागे च प्रतकर्मणीति। तमेतं यज्ञकालं यज्ञ

पार्श्वेऽप्याह। पंचदश्याः परः पादः प्रतिपदः प्रथमास्त्रयः। कालः पार्वणयागे स्यादथांत्ये तु न विघत इति। शा
तातपोऽपि। पर्वणो यश्चतुर्थांशो आद्याः प्रतिपदस्त्रयः। यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिरिति। अत्र
प्रातरिति विशेषणात् सूर्योदयस्योपरि मुहूर्तत्रयं यागकाल इत्युक्तं भवति। प्रतिपदश्च तुर्यांशं निषेधति का
त्यायनः। न यष्टव्यं चतुर्थांशे यागे प्रतिपदः क्वचित्। रक्षांसि तद्विलुम्पन्ति श्रुतिरेषा सनातनीति। तदेवं पर्वण्य
न्वाधानादिकं प्रतिपदि चेष्टिरिति संधिपार्श्वयोः प्रारम्भसमाप्ती व्यवस्थिते। यदा पर्वप्रतिपदा तु स्य मास्य संपू
र्णे तिथी भवतः तदा न संदेह एव। यदा तु खंडतिथी तदा निर्णयोऽभिधीयते। तत्र गोभिलः। आवर्तने यदा सन्धिः प
र्वप्रतिपदोर्भवेत्। तदाह र्यागं कुर्वीत परतश्चेत् परेऽहनीति। पर्वप्रतिपदोः संधिराघमावर्तनादयदि। तस्मिन्न
हनि यष्टव्यं स्यदेष्टिस्तदुपक्रमः। आवर्तनात्परः संधिर्यदि तस्मिंस्तूपक्रमः। परेद्युरिष्टिरित्येवं पर्वद्वयविनि
श्चय इति। आवर्तनमह्नो मध्यभागः। लौगाक्षिरपि। पूर्वाह्णे वाऽथ मध्याह्ने यदि पर्व समाप्यते। उपोष्यं तत्र पू
र्वेद्युस्तदहर्याग इष्यते। अपराह्णे च वा रात्रौ यदि पर्व समाप्यते। उपोष्यं तस्मिन्नहनि श्वोभूते याग इष्यत इति।
एषु वचनेषु मध्याह्नादिशब्दाः यौगिकाः न तु पंचधा विभागमाश्रित्य प्रवृत्तास्तथा सत्यह्नो मध्यो मध्याह्न ११२
इति व्युत्पत्त्यावर्तनं मध्याह्नशब्देनाभिधीयते। अत एवावर्तनशब्दः प्रयुक्तः। शातातपेनापि मध्यमशब्दः
प्रयुक्तः। पूर्वाह्णे मध्यमे वापि यदि पर्व समाप्यते। तदोपवासः पूर्वेद्युस्तदहर्याग इष्यत इति। अह्नः पूर्वो भा
गः पूर्वाह्णः। अह्नोऽपरो भागोऽपराह्णः। अतस्ताभ्यां शब्दाभ्यामावर्तनात् पूर्वोत्तरभागावभिधीयेते। वाजसनेयि

नां तु विशेषमाह भाष्यार्थसंग्रहकारः। मध्यंदिनात् स्यादहनीह यस्मिन् प्राक् पर्वणः संधिरियं तृतीया। सा खर्व
विका वाजसनेयिमता तस्यामुपोष्याथ परेद्युरिष्टिरिति। आवर्तनादूर्ध्वमस्तमयादर्वाग् यद्यसंधिर्भवति तद
हः संधिमती प्रथमा। रात्रौ संधिश्चेत्तातिथिर्द्वितीया। उभे अपि सपूर्वाह्णे संधिमती तिथिः पर्वतिथिः तृतीया भवति।
तस्यां तृतीयतिथौ पर्वकालस्याल्पत्वात् सा खर्विकेत्युच्यते। शाखान्तराध्यायिनामीदृशे विषये पूर्वेद्युरन्वाधानादि
कं संधितिथावष्टिः। वाजसनेयिनां तु संधितिथावन्वाधानं उत्तरतिथाविष्टिः। एवं सति वाजसनेयिनां क्वापि संधि
दिनात् पूर्वेद्युरन्वाधानादिकं मिष्टिः। सोऽयं विशेषः। आवर्तनात् ततः पुरा वा यदि संधिर्भवति तदा वाजसनेयिव्यतिरिक्तानां
पर्वचतुर्थांशे इष्टिः प्राप्नोति। तत्र विशेषमाह गार्ग्यः। प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते। पुनः प्रणीय चे
ष्टिः कर्त्तव्या यागवित्तमैरिति। पर्वणश्चतुर्थांशः प्रतिपदस्त्र्यंशश्च यागकालत्वेन विहिताः। तत्र पर्वचतुर्थांशस्य
विषयत्वं स्पष्टं ततः प्रतिपदंशानां विषयत्वं दर्श्यते। एषः संधौ प्रतिपदः प्रथमांशो यागकालः। निशीथे संधौ द्वितीयांशः।
रात्र्यारंभे संधौ तृतीयांशः। ननु अनेन न्यायेनापराह्णे संधौ प्रतिपच्चतुर्थांशस्य यागकालत्वं प्राप्नोति। तत्र प्रतिषि
द्धं न यष्टव्यं चतुर्थांश इति श्रुतेः। अतस्तादृशे विषये याग एव लुप्येतेति चेत्। मैवं। शातातपेन प्रातरित्यस्याभि
धानात्। संधिर्यत्रापराह्णे तु यागं प्रातः परेऽहनि। कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यतीति। एवं तर्हि प्रतिषेधो नि
र्विषयः स्यादिति चेत्। मैवं। सद्यस्कालविषये चरितार्थत्वात्। तं च विषयं दर्शयति कात्यायनः। संधिश्चेत्संग

वाहूर्ध्वं प्राकृ चेत्सावर्त्तनाद्रवेः। सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिरिति। भाष्यार्थसंग्रहकारोपि। अन्वाधि
तिष्वास्तरणोपवासाः स्युर्वैधृते तु खलु पौर्णमास्यां। आवर्त्तनात्प्राग्यदि पर्वसंधिस्तदैव यागः क्रियते समस्त इति।
आपस्तंबोपि। पौर्णमास्यामन्वाधानपरिस्तरणोपवासाः सद्यो वा सद्यस्कालायां सर्वं क्रियत इति। संगवावर्त्तनयो
र्मध्ये पौर्णमासीप्रतिपदोः संधौ सति पूर्वेद्युरह्न एवैतैः संधिदिनात्पूर्वेद्युरन्वाधानादिकं प्राप्तं। तच्च सद्यस्काल
वाक्यैः संधिदिने न्यक्ष्यते। नन्वीदृशे विषये संधिदिनात्परदिने यागं न्यक्ष्यतां। तथा सति अपराह्णादि संधावि
न्वाधानयागयोर्दिनभेदो भविष्यति। अस्ति च दृष्टांतः। वाजसनेयिनामीदृशे विषये अन्वाधानोत्कर्षे सति यागस्या
प्युत्कर्षत्वात्। मैवं। अन्वयव्यतिरेकरूपाभ्यां विधिनिषेधाभ्यामस्याः शंकाया निवारितत्वात्। तत्र सद्यस्कालविधि
योन्वयरूपाः। प्रतिपच्चतुर्थीशाखानिषेधा व्यतिरेकरूपाः। एवं सति प्रतिषेधवाक्यस्यावकाशं भवति। अमावास्यायां
विशेषमाह वृद्धशातातपः। द्वितीया त्रिमुहूर्ता चेत्प्रतिपद्यापराह्णिकी। अन्वाधानं चतुर्दश्यां परतः सोमदर्शनादि
ति। सोयं विशेषो नाश्वलायनापस्तंबविषये। अत एव बौधायनः। द्वितीया त्रिमुहूर्ता चेत्प्रतिपद्यापराह्णिकी।
अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात्। चतुर्दशी चतुर्यामा अमावास्या न दृश्यते। भ्यो ह्नते प्रतिपच्चेत्स्यात्पूर्वा
तत्रैव कारयेत्। चतुर्दशी वसंपूर्णा द्वितीया क्षयकारिणी। चतुरस्थिरमायां स्यात् हुते का व्याहृतिकी क्रियेति। एतेषां ११३
वचनानामयमर्थः। अपि चतुर्दशी संपूर्णा अस्तमयादर्वाग् अमावास्या स्यात्। तत एवापराह्णव्याप्त्यभावात्
प्रायान्वाधानाद्यवात्स्वैक्रि रीत्या यद्यपि निमित्ताभावेन न प्राप्तं तथापि प्रतिपदि द्वितीयायां सत्यां चंद्रस्य दर्शनमा

न त्वा तद्दर्शने चेष्टेर्निषिद्धत्वात् प्रतिपद्युक्तायाममावास्यायामिष्टिः स्वल्पामावास्योपेतायां चतुर्दश्यामेवान्वा
धानादि कर्त्तव्यमिति। एतदेवाभिप्रेत्य स्मृत्यंतरे। आदित्यास्तमिते चंद्रः प्रतीच्यामुदियात्तदा। प्रतिपत्प्रतिपत्तिः
स्यात्पंचदश्यां यजेत्तदेति। वृद्धवसिष्ठोपि। इंदोर्निरुप्ते पयसि पुरस्तादुदितो विधेः। पर्वैष्यनूक्ते तत्र भिन्नं पश्चा
दपि हितं भवेदिति। अस्यायमर्थः। यदा संपूर्णचतुर्दश्याम विचारेणामावास्याबुद्ध्या हविर्निर्वापं करो
ति तदा तस्मिन्नवसरे यःकालेऽपूर्वस्यां दिशि चंद्रमा न दृश्येत तदानीं दर्शकर्म न भवितुमर्हति दर्शकालस्याप्राप्तत्वात्।
किंतु कालापराधं निमित्ती कृत्य दर्शदेवता अपनीय दक्षिणाग्निपरिधिशाल्यामग्न्यादिदेवतांतराण्युद्दिश्य हविःप्रक्षे
पो विहितः। तदेतत्तैत्तिरीयब्राह्मणे श्रूयते। यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदेति त्रेधा तंडुलान्विभजेद्ये
मध्यमास्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं ये क्षोदि
ष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमिति। सोयं दृष्टांतः। हविषि निरुप्ते सति तत ऊर्ध्वं पूर्वस्यां दिशि इंदावु
दिते सति दर्शविधेर्यद्वैगुण्यमुररीकृत्य तस्य व्यवस्थितं तदेव वैगुण्यं होमदिने पश्चिमदिशि चंद्रोदये भवतीति। एत
देव बौधायनमतमुपोद्बलयति स्मृतिः। यस्मिन्नहनि पुरस्तात्पश्चात्सोमो न दृश्यते तयोरह्नयोर्मध्ये यत्रिन्यां
कुर्यात्क्रियाविधिमपि चंद्रदर्शनं नास्ति। अतस्तद्दिने यष्टव्यमित्येके। चंद्रदर्शनो वेतापांशुलं x तदहर्यजेदिति। अयम
र्थः। सिनीवाल्यां पुरस्ताच्चंद्रदर्शनं भवति। द्वितीयायुक्तायां प्रतिपदि पश्चाच्चंद्रोदयस्यते x प्रतिपदि यागानुष्ठाने

प्रायश्चित्तमाह कात्यायनः ॥ यजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते। तत्र व्याहृतिभिर्हुत्वा दंडं
दद्याद्विजातये इति। चंद्रदर्शनराहित्यमेवाभिप्रेत्य बौधायनकारिका समुपपद्यते। उदेष्यन्तं प्रतिपदि नाड्यः
सप्ताष्ट वा यत्र भवंति तत्स्यात्। हीनास्तु नाडीषु दिनस्य पूर्वः कल्पोऽथवेंदोर्वचने द्वितीय इति। अयमर्थः।
अमावास्यातिथेः संबंधिनीषु नाडीषु हीनासु सतीषु तस्मिन्नस्तमयात्पूर्वं प्रतिपत्संबंधिन्यो नाड्यः
सप्ताष्ट वा यदि भवंति तदा तद्दिनमिष्टेरलं योग्यं। सोऽयमेकः पक्षः। अमावास्याप्रतिपदोः पाये वर्द्धिते तदा द्वि
तीयः पक्षो भवेत्। अमावास्यायामन्वाधाय सोमदर्शनरहिते प्रतिपद्दिने यागः कर्त्तव्य इति। स्मर्यंते रपि।
अर्वागस्तमयाद्यत्र द्वितीया तु प्रदृश्यते। तत्र यागं न कुर्वीत श्वोदेवा स्युः परांमुखा इति। बौधायनमतानु
सारिणामन्वाधानं वद्दर्शश्राद्धमपि सर्वामावास्योपेतायां चतुर्दश्यां कर्त्तव्यं। तथा च बौधायनेनोक्तं।
यदा चतुर्दशी यामं तुरीयमनुपूरयेत्। अमावास्या क्षीयमाणा तदैव श्राद्धमाचरेत्। चतुर्दश्यां चतुर्थांशे
अमा यत्र प्रदृश्यते। श्वोभूते प्रतिपद्यत्र भूते कर्याद्विकीर्णियेति। चतुर्थे यामे अमावास्या संपूर्णा न दृ
श्यते किंत्ववसाने स्वल्पा सा च परदिने क्षीयते तदानीं चतुर्दश्यां श्राद्धमाचरेत्। ननु चंद्रदर्शनोपेतायां ११८
प्रतिपदि इष्टिः समाम्नाता। तथा च शतपथब्राह्मणं। यदहः पश्चाच्चंद्रमा अभ्युदेति तदहर्यजमानिमाँल्
लोकानभ्युदेतीति। तैत्तिरीयब्राह्मणमपि। एषा वै सुमना नामेष्टिर्यमद्येज्यानं पश्चाच्चंद्रमा
अभ्युदेत्यस्मिन्नेवास्मै लोकेऽर्धुकं भवतीति। अयमर्थः। येयमिष्टिः चंद्रदर्शनोपेते दिने क्रियते सेयमि
ष्टिः सुमनः शब्दवाच्या। तादृशीमिष्टिं कृतवंतं यजमानमभिलक्ष्य तस्मिन्नेव दिने पश्चाच्चंद्रमा अ
भ्युदेति तस्मै यजमानायास्मिँल्लोके समृद्धिर्भवतीति। बाढं। तदेतच्छ्रुतिद्वयं बौधायनमतानुसारिव्य
तिरिक्तविषयं। एतदेवाभिप्रेत्य प्रतिपच्चतुर्थांशे यागमुदाहृतः। ननु बौधायनव्यतिरिक्तानाम
पि चंद्रदर्शनयोग्यं द्वितीयायुतं प्रतिपद्दिनमिष्टौ निषिद्धं। तथा च स्मृतिः। पर्वणोंऽशे चतुर्थे तु कर्त्तव्ये
ष्टिर्द्विजोत्तमैः। द्वितीयासहितं यस्मात्पूर्वं त्याज्यं चलायनाः। तदेतदावर्त्तनतत्पूर्वकालयोः संधौ
सति द्रष्टव्यं। अपराह्णादिसंधिषु चतुर्थस्येष्टावप्राप्तत्वात्। तदेवं प्रकृतिरूपा पार्वणेष्टिः कालो निरू
पितः। विकृतेस्तु कालो निरूप्यते। तत्र कात्यायनः। आवर्त्तनात्प्राग्यदि पर्वसंधिः कृत्वा नु तस्मि
न्प्रकृतिं विकृत्याः। तत्रैव यागः परतो यदि स्यात्तस्मिन्विकृत्याः प्रकृतेः परे द्युरिति। आवर्त्तनात्ततः पुरा वा प
र्वसंधौ तस्मिन्संधिदिने प्रकृतियागं कृत्वा पश्चाद्विकृतिसंबंधी यागः कर्त्तव्यः। यद्यावर्त्तनात्परतः संधिस्त
दा केवलविकृतियागः संधिदिने कर्त्तव्यः प्रकृतियागस्तु संधिदिनात्परे द्युरनुष्ठेय इत्यर्थः। आवर्त्तनेत
तः पूर्वकाले परकाले वा संधिरित्येते पुत्रिष्वपि पक्षेषु संधिदिन एव विकृतेरनुष्ठानं। प्रकृतेस्तु पूर्वेद्यु

रीत्या संधिदिने परेद्युर्वानुष्ठानं व्यवतिष्ठते। इष्टीनां सर्वासां प्रकृतिर्दर्शपौर्णमासौ। ऐंद्राग्नमेकादश
कपालं निर्वपेत्प्रजाकाम इत्यादयः कांडांतरपठिताः काम्येष्टयो विकृतयः। तत्र प्रकृतिवद्विकृतिः कर्त
व्येति न्यायेन विकृतीनामपि संधिदिनात्परेद्युः कदाचिदनुष्ठानं प्राप्तं तदेतदुदाहृतेन वचनेन वापतीति। इष्टि
विकृतिन्यायः पशुविकृतिसोमविकृत्योरपि द्रष्टव्यः। पशूनां सर्वेषामग्नीषोमीयः पशुः प्रकृतिः वा
यव्यं श्वेतमालभेत भूतिकाम इत्यादयः कांडांतरपठिताः काम्यपशवो विकृतयः। सोमयागानां सर्वे
षामग्निष्टोमः प्रकृतिः उक्थ्यषोडश्यतिरात्रादयः विकृतयः। त्रिविधानामिष्टिपशुसोमविकृतीनां प
र्वैव कालः। तदेतदापस्तंब आह। यदाकस्यां इष्ट्या पशुना सोमेन यजेत सोमावास्यायां पौर्णमास्यां वा
यजेतेति। अत्रापि पूर्ववत्प्रतिपदि कदाचिदिष्टिप्राप्तौ तद्व्यावृत्तये पुनः कालो विधीयते। अस्माद्वि
कृतीनां पर्वैव काल इति स्थितं। ननु प्रकृतेर्यथोक्तकालात्कालांतरं कैश्चित्स्मर्यते षोडशेऽहन्यमा
ष्टिमीध्यायं पंचदशेऽहनि। चतुर्दशेऽन्ये इष्टिः पापा सप्तदशेऽहनि इति। अयमर्थः। पूर्वप्रतिपद्दिनमा ११५
रभ्य गणनायामागामिप्रतिपद्दिनं षोडशं भवति तत्रेष्टिरनुष्ठेया। ततः पूर्वस्मिन्पंचदशेदिने
मध्यमा। पूर्वस्मिन्चतुर्दशेऽहनि जघन्या। तदेवं कालत्रयं विहितं। उत्तमकालात्षोडशदिनादूर्ध्वव
र्त्तिनि सप्तदशेदिने प्रतिषिद्धा। बाढं। तत्रोत्तममध्यमपक्षौ शास्त्रीयौ। तिथीनां वृद्धिक्षयाभावे स

त्कृष्टतमः पक्षः प्राप्नोति। एकस्मिन्दिने क्षीणे सति मध्यमः पक्षः प्राप्नोति। जघन्यपक्षस्तु शास्त्री
यः। दिनद्वयक्षयाभावात्। अतो जघन्यपक्षे निषेधाद्विवक्षया प्रयुक्तः। न त्वेकपक्षांतरविवक्षया।।
ननु तिथिवृद्धिविशेषैः सप्तदशी तिथिः कदाचित्संभवति तत्कथं पापा सप्तदशेऽहनीति प्रतिषेधः। नायं दोषः
अल्पतिथिवृद्धौ यथा षोडशदिने अमावास्या क्षयद्विका सप्तदशदिने प्रतिपद्भवेत् तदानीं प्रतिपत्तुर्यां
शैस्येष्टिकालत्वात्तदानुष्ठानं प्राप्तं वचनेन निवार्यते। तच्चन्याय्यं पूर्वाह्णसंध्युपेतदिने इष्टेः कर्तव्यत्वेनाभि
हितत्वात्। यदा तु महत्यां वृद्धौ षोडशदिने अमावास्या संपूर्णा सप्तदशदिने प्रतिपत्संपूर्णा तदा न प्रतिषि
ध्यते। ननु बौधायनेन त्रयोदशसप्तदशदिनयोरन्वाधानं प्रतिषिध्यते। यत्रोपवसथ्यं कर्म यजनीयात्त्र
योदशं। न वै सप्तदशं वापि तत्प्रयत्नेन वर्जयेदिति। अत्र यजनीयं प्रतिपद्दिनमारभ्य पंचदशदिनमोपवस
थ्यमुख्यः कालः। तिथिक्षये चतुर्दशं दिनं तिथिवृद्धौ षोडशं दिनं तथा सति त्रयोदशसप्तदशयोः प्रस
क्तिरेव नास्ति तत्कथं प्रतिषिध्यते इति चेत्। एवं तर्ह्यप्रसक्तप्रतिषेधो नित्यानुवादोऽस्तु। अस्ति वा प्रसक्त
प्रतिषेधो नित्यानुवादो वेदे। न पृथिव्यामग्निश्चेतव्य इति। सर्वत्र पर्वप्रतिपदोः संधिमुपल
क्ष्याधानादिकालो व्यवस्थापितो। तत्र तिथिक्षयवृद्ध्योः संधिविषयं किंचिद्विशेषमाह कात्यायनः। पूर्वे

द्विघटिकान्यूनास्तथैवाभ्यधिकाश्च याः। तदर्धं क्षयात्सर्वस्मिन् ह्रासवृद्धी प्रकल्पयेदिति। लौगाक्षिर
पि। तिथेः परस्या घटिकास्तु याः स्युर्न्यूनास्तथैवाभ्यधिकास्तु तेषां। अर्धं वियोज्यं च तथा प्रयोज्यं ह्रासे च
वृद्धौ प्रथमे दिने तदिति। सर्वेद्युरमावास्या पंचदशघटिका परेद्युः प्रतिपदपि तावती तदा यथास्थितमेवोप
नीय संधिर्विवेतव्यः। यदा तु प्रतिपदः षड्घटिका क्षीयंते तदा घटिकात्रयं ह्रासो मावास्यायां योजनीयः। त
स्मिन् योजिते द्वादशघटिका मावास्या भवति तदावर्तनात्पूर्वं संधिः संपद्यते। अनेनैव न्यायेन घटिकात्रयवृ
द्धौ योजितायामष्टादशघटिकामावास्या भवति तथा सत्यावर्तनादूर्ध्वं संधिर्भवति। इत्येवं संधिं विज्ञाय तदनु
सारेणान्वाधानेष्टी अनुष्ठातव्ये॥ ॥इतीष्टिनिर्णयः॥ ॥नाचिष्टिकालवद्दूहपाककालोऽप्यत्र निर्णेतव्यः।
पर्वप्रतिपत्संध्युपजीवनेन प्रत्यक्षतया तथा च वृद्धगार्ग्यः। पूर्णिमाप्रतिपत्संधौ राहुः संपूर्णमण्डलः। ग्र
सते चंद्रमर्कं च दर्शप्रतिपदंतरे इति। आस्मिन्ब्रह्मसिद्धांते यावच्च पर्वणः कालस्तावान्प्रतिपदादिमः। रवींदुग्रहणे ११६
निःश्वासपुण्यो विश्वरणाद्वेदिति। अनेहोकालः। यद्यप्यस्ति संध्युपजीवनं तथापि निर्णेतव्यां शास्त्र
तिथिविषयस्याभावादस्मिन् प्रकरणे न तद्योग्यं॥ कर्तव्यविशेषस्तूपरितनप्रकरणे निरूपयिष्यते॥
॥ ॥ ॥इति श्रीमाधवीये द्वितीयादितिथिनिर्णयाख्यं चतुर्थं प्रकरणं॥ ॥४॥ ॥ ॥

तृतीयचतुर्थप्रकरणाभ्यां प्रतिपदाद्याः पंचदश्यंतास्तिथयो निर्णीताः। अथ प्रकीर्णकरूपे पंचमप्रक
रणे नक्षत्रविशेषादयः कालविशेषाः कर्तव्यविशेषाश्च संक्षेपेण निरूप्यंते। अत्रापि तिथिवत्संपूर्णानि
नक्षत्रे संदेहाभावात्खंडनक्षत्रनिर्णयोपेक्ष्यते। स च निर्णयो दर्शितो विष्णुधर्मोत्तरे। उपोषितव्यं नक्षत्रं य
स्मिन्नस्तमियाद्रविः। युज्यते यत्र वा राम निशीथे शशिना सहेति। अत्रास्तमययोगो निशीथयोगश्चेति यो
गद्वयं प्रयोजकं। अस्तमययोगो मुख्यः कल्पः। निशीथयोगोऽनुकल्पः। योगद्वये लब्धे सत्यनुष्ठानमतिप्रश
स्तं। यदा तु पूर्वेद्युः केवलो निशीथयोगः परेद्युः केवलोऽस्तमययोगस्तदा मुख्यानुकल्पानुसारेण परेद्युरेवो
पवासः। तथा सति प्रातःसंकल्पकालेन नक्षत्रसद्भावोपि लभ्यते। निशीथे शशिना सहेत्युक्तेः शास्त्रसिद्धस्य
शशियोगस्य विवक्षितत्वात् नक्षत्रसद्भावमात्रमभिधीयत इत्यवगंतव्यं। दिनद्वयेप्यस्तमययोगाभावे निशी
थयोगे न पूर्वेद्युरेवोपवासः। तदाह सुमंतुः। यत्रार्धरात्रादर्वाक्तु नक्षत्रं प्राप्यते तिथौ। तत्र नक्षत्रव्रतं कुर्यादती
तीति पारणं भवेदिति। नात्र तिथिदिवैकभक्तनक्तयोर्मध्याह्नप्रदोषव्याप्तिभ्यां निर्णयः। किं तर्ह्युपवासन्या
य एव तद्द्वयोः कर्तव्यता॥ ॥तदुक्तं स्कंदपुराणे। तत्र चोपवसेद्वेयं त्रिरात्रा यादृशो भवेत्। उपवासे यदुक्तं स्या
त्तद्दिने नैकनक्तयोरिति। यत्तु विष्णुधर्मोत्तरे। सा तिथिस्तच्च नक्षत्रं यस्यामभ्युदितो रविः। वर्धमानस्य प
क्षस्य हानेरस्तमयं प्रतीति। तच्चिरकालीनविषयं। यद्यपि मार्कंडेयेनोक्तं। यत्रास्तमहोरात्रं य × तथा कर्मणीति

॥

कुर्यात्।तत्तद्ध्रासवृद्धीनकारणमितितदुपवासव्रतातिरिक्तव्रतविषयं।यदपिबौधायनवचनं।सातिथिस्त
द्वनक्षत्रंयस्यामभ्युदितोरविः।तस्मिंस्त्वस्तमितेप्यह्नि।यस्मिन्नुदेतिसविता तन्नाक्षत्रंनवेदिनमिति।तस्याय
मर्थः।द्विविधोनक्षत्रसंबंधीकालविशेषः।अहोरात्रोदिनंच।तत्रोदितंकर्मापिद्विविधं।अहोरात्रसाध्यंदिनसा
ध्यंच।उपवासैकनक्तादिकंअहोरात्रसाध्यं।यद्यपिविशिष्टकालनिष्पाद्यंभोजनमेकनक्तादेःस्वरूपंतथापि
तस्मिन्नहोरात्रेभोजनांतरस्यैकनक्तादिनियमघातितयाभोजनांतरपरित्यागसहितस्यैवभोजनस्यैकनक्तादि
स्वरूपत्वादहोरात्रसाध्यत्वमप्यविरुद्धं।दिनमात्रसाध्यानितुदानव्रतश्राद्धानि।तेषामहन्येवविधानात्।तत्रो
पवासादौनाक्षत्रोहोरात्रोग्रहीतव्यः।व्रतादौतुनाक्षत्रंदिनंग्रहीतव्यं।अहोरात्रस्यनाक्षत्रत्वंसूर्योदयका
लेनक्षत्रव्याप्त्यासंपद्यते।दिनस्यतुनाक्षत्रत्वंसूर्योदयेनक्षत्रव्याप्त्याभवतीति।यद्यपियस्मिन्नुदेतिसवितेत्यने
ननक्षत्रसद्भावमात्रंप्रतीयतेनतुपरिमाणविशेषः।तथापित्रिमुहूर्तपरिमाणस्यतिथौक्लृप्तत्वात्तदेवात्रा
नुसंधेयं।ननुदानव्रतवच्छ्राद्धेपिनाक्षत्रदिनस्वीकारेप्रातःकालमात्रव्यापिनक्षत्रेपिश्राद्धंप्रसज्येत।मैवं।अ ११२
पराह्णस्यश्राद्धकालत्वेनतद्व्याप्तेरपेक्षितत्वात्।तथाचस्मृतिः।नक्षत्रेचंद्रितेनैवयेनव्याप्तःकालस्तुपर्वणः।।
नक्षत्रकार्यमस्मिंस्त्रैवतिथिकर्मतथैवतु।नचतेनैवन्यायेनैकनक्तेमध्याह्नव्यापिनक्षत्रंग्राह्यमितिशंकनीयं।
उपवासनक्षत्रस्यैकनक्तेप्यतिदेशकृतत्वात्।यदपिस्मातिवचनं।तिथीनामंतिमोभागस्तिथिकर्मसुसंस्कृतः।

सत्तानां पूर्वभागस्तुसत्कर्मसुप्रतिष्ठति।तत्रतिथ्यंतमुख्यत्वंदानव्रतविषयं।नक्षत्रपूर्वभागादि
तदुपचमुपवासादिविषयं।उपवासादिव्यतिरिक्तेतुदैवेकर्मणिनक्षत्रस्याप्यंत्यभागमुख्यत्वंद्रष्टव्यं।न
क्षत्रविशेषेतुपूर्वाह्णस्यलिंगस्याश्रवणेनतुबलं।मन्त्रराषाढसंयुतं।संवत्सरकृतौध्यायस्तत्क्षणा
देवनश्यति।धनिष्ठासंयुतंकुर्याच्छ्रावणंकर्मयद्भवेत्।तत्कर्मसफलंविद्यादुपाकरणसंज्ञकमितिनि
षिद्धत्वात्।योगेतु[illegible]कस्यचिल्लिंगस्यपूर्वेद्युर्निशीथमात्रव्याप्तिंप्रत्यसूचकत्वात्सायंकालादिव्याप्ति
र्ग्राह्या।यदियोगःपूर्वेद्युर्निशीथमात्रंव्याप्नुयात्तदापरेद्युरहनिपारणंनप्राप्नुयात्।रात्रौपारणस्य
निषिद्धत्वात्।अतोहन्येवव्यतीपातंपारणेध्रुवका[illegible]पूर्वेद्युर्दिवसेसायंकालादियोगंप्रयोजकंस्त्वय
ति।तस्माद्विष्कुंभादियोगवदुपवासव्यतीपातःपूर्वविद्धोग्रहीतव्यः।दानव्रतयोरुदयव्यापीग्राह्यः।
श्राद्धस्यतुकर्मकालव्यापीतिनिर्णेतव्यं।ववबालवकरणानांतिथ्यर्धपरिमितत्वेनदिनद्वयव्यापि
त्वात्संदेहोनास्ति।तस्मादुदयेअस्तमयेवायस्मिन्दिनेकरणसद्भावस्तस्मिन्नेवदिनेतत्कर्मानु
ष्ठेयं।यदातुसायंसंध्यामारभ्यपरेद्युरुदयात्प्रागेवकरणंसमाप्येततत्रकथमितिचेत्।तदान
[illegible]करणेक्तन्यायेनसर्वेषुकरणेषुनिर्णयइतिब्रूमः।भद्राकरणेचानिर्णयोभद्राव्रतेपश्य
ते।यस्मिन्दिनेभवेद्भद्रातस्मिन्नहनिभारत।उपवासस्यनियमंकुर्यान्नारीनरोपिवा।यदि

रात्रौ भवेद्वृद्धिश्चिरेकभक्तं दिनद्वये। कार्यं तेनोपवासः स्याद्विप्रैर्योगेऽस्मिन्। रात्रिके विधिः। प्रहरस्ये परिय
त्यास्याद्वृद्धिः प्रहरस्तृयं। उपवासस्तदा कार्य एकभक्तं ततोऽन्यथेति। उदयाद्यास्यायानवरस्तमयं विष्टिस
त्यां नास्त्युपवासे संदेहः। यत्र तु प्रहरमात्रं विष्टिर्नास्ति तस्यो परि प्रहरत्रयं विष्टिर्भवति तत्र सकल
दिनव्याप्तेर्भद्राया अभावेपि एकदेशव्याप्तेः सद्भावादुपवासोऽनुष्ठेयः। अन्यथे त्वनेकांतिकदेशव्याप्त्य
भावोपि विवक्षितः तस्मिन्पक्षे समनंतरातीतवचनात् दिनद्वये एकभक्तं कार्यं। यस्तु भद्राव्रतं सं
कल्प्याहोरात्रमुपोषितुं न शक्नुयात् असौ भद्रायुक्तघटिकासु भोजनं परित्यजेत्। भद्रारहितका
ले भुक्त्वापि नोपवासान्न हीयते। तथा च भविष्योत्तरे पठ्यते। स्नातः संपूज्यतामेव ब्राह्मणं च यथाशक्ति
तः। ततो भुंजीत राजेंद्र यावद्भद्रा न जायते। अथवा तेपि भद्रायाः कामतो वाप्यतः शुचिः। न किंचित्प्र
लपेत्प्राज्ञो यावद्भद्रा प्रवर्त्तत इति। अहश्चरमभागे यदा भद्रा प्रवेशस्तदानीमेकदेशे भद्रायोगिनो दि ११८
नस्य तद्युताहत्वाद्दशकस्य भद्राप्रवेशात्प्रागेव भोजने प्राप्ते सत्युत्तरे भद्रा देर नुष्ठेयत्वात् भद्रारहि
तपिकाले भद्रादिकं न विरुध्यते। यदा तु भद्राया अंते भुक्ते तदा कर्मकालव्याप्त्यादुपेतकालएव
भद्रादिकं कर्त्तव्यं। पक्षद्वयेपि भद्रायुक्तघटिकासु न किंचिद्भुंजीत् तावता भद्रोपवासः स्यैर्येताबवा

दिकरणेषु कस्यापि विशेषस्य शास्त्रेणानुक्तत्वात् भद्रायां कृत्यस्य न्यायस्पातिक्रमे कारणाभावाच्चार्थ
निर्णयप्रकारः सर्वेपि योजनीयः। नवतिथिमसत्रवारयोगकरणानां पंचांगानां तः पातिनां निर्णयं कृत्वा
तदंतः पातीशास्त्रीयकर्मोपयोगी वारः कुतनुपेक्षितइतिचिंत्यनीयं। अहोरात्रपरिमितत्वेन वारे संदेहा
भावात्॥ ॥तदेवं नक्षत्रयोगकरणानि निर्णीतानि॥ ॥अथ संक्रांतिनिर्णयः॥ ॥मेषादिषु द्वा
दशराशिषु क्रमेण संचरतः सूर्यस्य पूर्वस्माद्राशेरुत्तरराशौ संक्रमणप्रवेशः संक्रांतिः अतस्तद्रा
शिनामपुरःसरं सा संक्रांतिर्व्यपदिश्यते। राशयश्चामी मेषवृषमिथुनकर्कटसिंहकन्यातुलावृ
श्चिकधनुर्मकरकुंभमीननामकाः तेषु द्वादशसु चत्वारित्रिकानि भवंति तत्रैकस्मिंश्चिके क्रमेण
चरस्थिरद्विस्वभावाख्यास्त्रयो राशयः तथा चतुर्षु त्रिकेषु मध्येमध्यमावृषभसिंहवृश्चिककुंभनामका
स्थिरराशयश्चत्वारः तेषां विष्णुपदमिति नाम स्मृतिषु प्रसिद्धं। येत्वंतिमा मिथुनकन्याधनुर्मीननाम
का द्विस्वभावाराशयस्ते षडशीतिमुखसंज्ञकाः ये पुनर्मेषकर्कटतुलामकररूपाश्चरराशयस्ते
षु मेषतुले विषुवत्संज्ञके। कर्कटमकरावयनसंज्ञकौ। तदेतत्सर्वं वृद्धवसिष्ठ आह। अयने द्वे
विषुवे द्वे चतस्रः षडशीतयः। चतस्रो विष्णुपद्यश्च संक्रांत्यो द्वादश स्मृताः। वृषकर्कटसंक्रां

तीदेउदग्दक्षिणायने। विषुवे तु तुलामेषौ गोलमध्ये ततोपराः। कन्यायां मिथुने मीने धनुष्यपि
रवेर्गतिः। षडशीतिमुखाः प्रोक्ताः षडशीतिगुणाः फलैः। वृषवृश्चिकसिंहेषु कुंभे चैव रवेर्गतिः
एतद्विष्णुपदं नाम विषुवादधिकं फलैरिति। विषुवाख्यामयनाख्यां पुंक्तराशिं चतुष्कं गोलद्वयसं
धीयते। तत्र मेषाख्यविषुवस्य कर्कटाख्यायनमध्ये विष्णुपदसंक्रमो वृषभः षडशीतिसंक्रमो मि
थुनं च तिष्ठति तथा कर्कटायनस्य तुलाविषुवस्य च मध्ये सिंहकन्ये। तुलामकरयोर्मध्ये वृश्चिक
धनुषी। एवमन्यदप्यूह्यम्। गालव्योप्याह। स्थिरभे विष्णुपदं षडशीतिमुखं द्वितनुभे तुलामेषे
विषुवं तु येदक्षिणमयनं सौम्यं मृगेस्तूर्यमिति। नक्षत्रवाच्योः राशिस्थिरराशौ स्थिते सूर्ये सति विष्णुप
भवति। द्विस्वभावराशौ सूर्ये स्थिते सति षडशीतिमुखं भवति। तुलामेषद्वये सूर्ये स्थिते सति विषुवं भ
वति। सूर्ये कर्कटे दक्षिणायनं मृगे मकरे सौम्यं सौमादिकमुत्तरायणं। तेरेतैः संतानेदे राशयो
व्यवह्रियंत तद्राशिसंबंधात्तद्राशिसंक्रांति नाम्नापि तान्येव नामानि। तासु च संक्रांतिषु होमस्नाना ११९
कमन्वयव्यतिरेकरूपाभ्यां शातातप आह। संक्रांतौ यानि दत्तानि हव्यकव्यानि दातृभिः। तानि नित्यं द
दात्यर्कः पुनर्जन्मनि जन्मनि। रविसंक्रमणे पुण्ये न स्नायाद्यदि मानवः। सप्तजन्मसु रोगी स्याद्दुः

खभागी च जायत इति। स्नानदानाद्यंगभूते संक्रांतिकाले मुख्यकल्पस्यासंभवादनुकल्पएवादर्तव्यः। तद
ह देवलः। संक्रांतिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः। तद्योगादप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिता इति।
दृशाव्यवधानादर्थं तत्संक्रांतिरूपयोः पूर्वोत्तरराश्योर्मध्ये सूर्यः पूर्वराशिं परित्यज्य यावता कालभेदेनोत्तररा
शिं प्रविशति स लेशो योगदृष्टिं विना मांसदृष्ट्या दुर्लक्ष्यः अतो नुष्ठानेमुख्यसंक्रांतिकालासंभवात्संक्रां
तिसंबंधिनौ पूर्वोत्तरकालौ ग्रहीतव्यौ। संक्रांतेः पूर्वोत्तरयोरेकैकस्मिंस्त्रिंशद्घटिकाः पुण्या इति सा
मान्येनोक्तं। तत्र विशेषमाह वृद्धवसिष्ठः। अतीतानागते पुण्ये द्वे उदग्दक्षिणायने। त्रिंशत्कर्कटके ना
ड्यो मकरे विंशतिः स्मृता इति। उदगयनमतीतं सत्पुण्यं भवति दक्षिणायनमनागतं पुण्यं त्रिंशद्दिशा
दिना तदेव स्पष्टीक्रियते। कर्कटाख्याद्दक्षिणायनात्पूर्वा चीनास्त्रिंशद्घटिकाः पुण्याः मकराख्यादुत्तराय
णात्पूर्वकालीना विंशतिर्घटिकाः पुण्या। बृहस्पतिरपि। अयने विंशतिः पूर्वा मकरे विंशतिः पराः। वर्त
माने तुलामेषे नाड्यस्तूभयतो दश इति। न चात्र त्रिंशद्घटिकावादिना सामान्यवचनेन विरोधः शंकनी
यः। सामान्यवचनस्याप्यनुतापरत्वात्। विशेषवचनोक्तो घटिकासंकोच एव प्रशस्ततयायासन्नि
हितानां पुण्यतमास्मृता इति देवलेनोक्तत्वात्। केनापि निमित्तेन संनिहितघटिकास्वनु

त्रानासंभवे त्रिंशद्घटिकाः परास्त्ववधित्वेनानुसंधीयंते। षडशीतिमुखे तु ततोपि दीर्घमवधिमाह वृद्धवसि-
ष्ठः। षडशीत्यामतीतायां षष्टिरुक्तास्तु नाडिकाः इति। विष्णुपद्यां प्रशस्तकालं स एवाह। पुण्याख्या विष्णुप-
द्यां च प्राक् पश्चादपि षोडश इति। संक्रांतीनां पूर्वोत्तरो पुण्यकालो निर्णीतो। ताश्च संक्रांतयः कदाचिद्दि-
ने भवंति कदाचिद्रात्रौ भवंति तद्वेलायामनुष्ठानभेदमाह। वृद्धवसिष्ठः। अह्नि संक्रमणे पुण्यमहः कृत्स्नं प्रकी-
र्तितं। रात्रौ संक्रमणे भानोर्दिनार्धं स्नानदानयोः। अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया। ऊर्ध्वं सं-
क्रमणे चोर्ध्वमुदयात्प्रहरद्वयं। पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः। प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मक-
रकर्कटाविति। अह्नि यदा संक्रांतिर्भवति तदा कृत्स्नस्याह्नः पुण्यत्वं। रात्रौ संक्रमणे पूर्वोत्तरदिनार्ध-
योः पुण्यत्वं विदधता वचनेनार्थाद्रात्रौ स्नानदानादिकं प्रतिषिध्यते एवं सति तु उदयानंतरभाविनि दक्षि-
णायने पूर्वभागे प्राशस्त्यं बाधित्वोत्तरभागे अनुष्ठानं भवति। अस्तमयप्राचीनक्षणभाविन्युत्तरा-
यणे चोत्तरभागप्राशस्त्यं परित्यज्य पूर्वभागेऽनुष्ठातव्यं। उत्तरभागप्राशस्त्यं तु मध्याह्नादिसंक्रम-
णविषयं तत्राह्न्येव हेयोपादेययोः पूर्वोत्तरभागयोः संभवादनेनैव न्यायेन कर्कटेपि मध्याह्नभा- १२०
विनि पूर्वभागप्राशस्त्यं भवति। अस्तमयप्राचीनभाविषु षडशीतिमुखेष्वप्युत्तरभागप्राशस्त्यं प-
रित्यज्य मकरन्यायेन पूर्वभागप्राशस्त्यं विधातव्यं। उदयानंतरभाविषु तु वचनांतरविरोधेनोत्त-

रभाग एवानुष्ठानसंभवात्तद्विरुद्धं पूर्वभागप्राशस्त्यं विधीयते। उभयभागप्राशस्त्योपेतेषु विषुव-
त्सु परेषु मध्याह्नभाविषु पूर्वत्रोत्तरत्र वा स्वेच्छयानुष्ठातव्यं। उदयानंतरभाविषु तेषु पूर्वत्र प्राशस्त्यं बा-
ध्यते। अस्तमयप्रान्तेषु तेषूत्तरप्राशस्त्यं बाध्यत इति विवेकः। एतद्वचनानुसारेण यस्य संक्रमणस्य य-
स्मिन्भागेनुष्ठानं तस्मिन्नेव भागे व्यवहिता नाड्यः पुण्यार्हत्वेन निहिताः पुण्यतराः अत्यंतसंनिहिताः पुण्य-
तमा द्रष्टव्याः। यदा रात्रौ भानोः संक्रमणं भवति तदा तस्या रात्रेः पूर्वस्य चोत्तरस्य वा दिनस्यार्धं प्रहरद्वयं
स्नानदानयोः पुण्यं। कुत्र पूर्वदिनं कुत्र परदिनमिति वीक्षायां तदुभयमर्धरात्रादिति वचनेन व्यवस्थाप्यते।
रात्रेरर्धमर्धरात्रः। द्वितीयप्रहरस्य चरमघटिका तृतीयप्रहरस्य प्रथमघटिकेत्येवं घटिकाद्वययुक्तः
कालः तस्मादर्धरात्रादधः संक्रमणे सति पूर्वदिनमध्याह्नस्योपरितने प्रहरद्वये क्रिया कार्या। अर्धरात्रादू-
र्ध्वं संक्रमणे सत्युत्तरकालीनादुदयादूर्ध्वं प्रहरद्वयं पुण्यं। संपूर्णार्धरात्रे घटिकाद्वये संक्रांतौ पूर्वोत्तरदिन-
द्वयं कृत्स्नं पुण्यं। तदुक्तं भविष्योत्तरे। संक्रमश्च निशीथे स्यात् षड्यामाः पूर्वपश्चिमाः। संक्रांतिकालो
विज्ञेयस्तत्र स्नानादिकं चरेदिति। अत्रेयं व्यवस्था। अर्धरात्रे यदा षडशीतिस्तदानीमेतद्वचनानुसारे-
ण पूर्वोत्तरदिनद्वयस्य पुण्यत्वाद्द्वयोर्हि कोविकल्पः प्राप्नोति। तथाप्युत्तरदिने षष्टिर्घटिकाः प्रतिपा

दकशास्त्रिकवचनंनियामकं।तस्यवचनस्यपूर्वोत्तरभागयोःसाम्येनप्राशस्त्यप्रतिपादकत्वात्।अह
तेवचनंपूर्वोत्तरदिनेसाम्येनविधत्ते।तस्मात्पूर्वस्मिन्नुत्तरस्मिन्वास्वेच्छयानुष्ठानमितिचकल्प्यते।अ
अयनयोस्तुप्रकारांतरंवक्ष्यते।अयनव्यतिरिक्तासुसंक्रांतिषुमध्यरात्राद्ध्वूर्ध्वप्रवृत्तासुपरेद्युरनुष्ठान
मित्यत्रनकोपिसंदेहः।अर्धरात्रात्पूर्वप्रवृत्तासुदशासुमध्येषडशीतिव्यतिरिक्तानांनवानांपूर्वदिनेऽनुष्ठाने
मित्यत्रापिनास्तिसंदेहः।षडशीत्यास्तुप्रकृतवचनेनपूर्वेद्युरनुष्ठानेप्राप्तेषष्टिघटिकाप्राशस्त्यप्रतिपा
दकवचनेनपरेद्युःप्राप्नोति।अतःसंदेहेसतिपूर्वेद्युरनुष्ठानमितिद्वयोर्निर्णयः।कुतः।विष्णुपदाधनु
र्मीननृयुक्कन्यासुवैयदा।पूर्वोत्तरगतेरात्रौभानोःसंक्रमणंभवेत्।पूर्वाह्णेपंचनाड्यस्तुपुण्याःप्रोक्तामनीषि
भिः।अपराह्णेतुपंचैवश्रौतेस्मार्तेचकर्मणि।तिश्रौतेथयदारात्रौपूर्वभागगतेविष्णुपदीषडशीतिसंक्रमणंभ
वेत्तदापूर्वेद्युरपराह्णेपंचनाड्यःपुण्याः।उत्तरभागगतेसंक्रमणेपरेद्युःपूर्वाह्णेपंचनाड्यःपुण्याः।नचैवंस
तिप्रहरद्वयपुण्यत्वविरोधइतिवाच्यं।पंचनाडिकावचनेषुपुण्याधिक्यस्याविवक्षितत्वात्।अतःप्रहरद्वयवा
क्यंपुण्यमात्राभिप्रायं।एतस्मिन्नेवविषयेदेवीपुराणेपठ्यते।असंपूर्णेर्धरात्रेतुनरवेस्तमयेपिवा।भाना
र्धेनास्करेपुण्यमपूर्णेर्धरात्रदलौ।अर्धरात्रेत्वसंपूर्णेदिवापुण्यमनागतं।संपूर्णेन्निनयोर्द्वयमतिरिक्त १२३

दानंयद्दानंविषुवद्वये।दृश्यतेसागरस्यांतस्तस्यांतोनैवदृश्यतेइति॥वृद्धवसिष्ठः।अयनेकोटिपु
ण्यंचलक्षंविषुवेफलं।षडशीत्यांसहस्रंतुफलंविष्णुपदेषुचेति।मेषादिसंक्रांतयोयस्मिन्दिने
भवंतितस्माद्दिनात्पूर्वंषण्णवत्यादिनेभ्यःप्राचीनेदिनेमेषायनवृषायनामित्येवंतन्नामांकित
मयनंभवतितस्मिन्नयनेस्नानादिषुचपुण्यकालंसमाहुर्ज्ञानवादिनः।संक्रांतिषुयथाकालस्तथैवाय
यनेतथा।अयनेविंशतिःपूर्वामकरेविंशतिःपरेति।मकरव्यतिरिक्तेष्वयनसंक्रांतिसंबंधिष्व
यनेषुततेसंक्रांतिनःपुण्यकालोवगंतव्यः।मकरसंक्रांतिसंबंधिन्ययनेसंक्रांतेरनंतरंपुण्यं।
तुयथा।मकरायनेप्राचीनाविंशतिघटिकाःपुण्याः।मकरसंक्रांतौतुपाश्चात्याविंशतिघटिकाःपुण्याः।
नकेवलमादित्यस्यैवसंक्रमणेपुण्यकालःकिंतुसर्वेषामेवग्रहाणांनक्षत्रराशिसंक्रमेपुण्यकालोभवति
तदुक्तंज्योतिःशास्त्रेनक्षत्रराश्योरविसंक्रमेस्तुरवेर्वाक्पूर्वपरस्तात्सप्तदशनाड्यः।पुण्यास्तथैवेंदोः।स्थिरधरापुत्रे
युगैकैवनाड्योमुनिभिःप्रोक्ताःपश्चतत्त्वःसपलाःकुजस्यबुधस्यातिलाःपलविंश्युतकाः।सार्धश्चि
तस्रोघटिकाःपलानिगुरोस्तुसप्तेवभृगोश्चतस्रः।नाड्यःपलैकंघटिकाषडशीतिःपलानिसप्तेवशने
श्चरस्य।आद्यंतमध्येऽपहोमदानंकुर्वन्नवाप्नोतिसुरेंद्रधामेति।अयमर्थः।आदित्यस्यराशिनक्षत्रग १२४

पुराणे क्रोडि चतुरित्यादिकः पुण्यातिशयप्रतिपादको विशेषो दृष्टव्यः। निर्णीतेषु संक्रांत्यादीनां पुण्यकाले
षु यत्कर्तव्यं स्नानदानादिकं तत्सर्वमेव शातातपवचनद्वये नोदाहृतं। भविष्यपुराणेपि। नित्यं द्वयोरयनयोस्त
था विषुवतो द्वयोः। चंद्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्वसु। अहोरात्रोषितः स्नात्वा यद्दानं तथाऽप्यथः करोति
तत्सत्यात्मात स्वास्याद्रूपं तत्। अयने विषुवे चैव चंद्रसूर्यग्रहे तथा। कृतोपवासः सुस्नातः सर्वपापैः प्रमुच्य
ते। वसिष्ठोपि। अनुपोष्यैव तु संक्रांतौ स्नातो योऽभ्यर्चयेद्धरिं। प्रातः पंचोपचारेण स काम्यं फलमश्नुते। अयने वि
षुवे चैव चंद्रसूर्यग्रहे तथा। त्रिरात्रोपोषितो नरः सर्वपापैः प्रमुच्यते। स्नात्वा यः प्रयतो देवीं सर्वान्कामान्
समश्नुते। सप्तोपोष्य रवेर्वारान्नादौ स्नात्वा तु संक्रमे। अर्कमभ्यर्चयेद्यस्तु सोऽदुःखी सुखमश्नुत इति। शा
तातपः। अयनादौ सदा देयं द्रव्यं नित्यं गृहं च यत्। षडशीतिमुखे चैव मोहयोर्वैरः चंद्रसूर्योपरिति। न क्तोप
स्नानदानादि कर्तव्यस्य संक्रांतिविशेषमुपजीव्य कालविशेषमाह शातातपः। कुर्यात्सदायनमध्ये विषुप
थां विषुवति। षडशीत्यामतंनागे स्नानादिविधिमादत इति। गालवोपि। मध्ये विषुवति दानं विष्णुपदे द
क्षिणायने चाद्यो। षडशीतिमुखेतीते तथोदगयने च भूरिफलामिति। अयनादिषु यत्र यावान् पुण्यका
लः सर्वनिर्णीतस्तत्र तावंतं कालं त्रेधा विभज्य मध्ये विषुवत्यादयवगंतव्यं। तस्मिन्नपि मध्यादिभागे
सन्निहितानां सर्वेषां हृतवचनेन पुण्यतमत्वं द्रष्टव्यं। संक्रांतिषु फलमाह नरखांडः। षडशीत्यां तु य

चत्वारि मृदूनि। हस्ताश्विनीपुष्याभिजिदिति क्षिप्राणि चत्वारि लघूनि। भरणी पूर्वात्रयं मघा चेत्येतानि पंचो
ग्राणि। श्रवणपुनर्वसुस्वातीशतभिषक्धनिष्ठाख्यानि पंच चराणि। अश्लेषामूलार्द्राज्येष्ठाख्यानि चत्वा
रि क्रूराणि। कृत्तिकाविशाखाश्चेत्याख्यानि मिश्राणि। सेयं सप्तधा नक्षत्रव्यवस्था ज्योतिर्ग्रंथे मुहूर्तसारे प्र
हिता। क्षिप्रं च स्थिरमुग्रं च दारुणं चरमेव च। मृदु साधारणं चैवं सप्तभेदाः प्रकीर्तिताः। कराश्विनी वाक्पतिं
तथाभिजिद्ध्रुवं क्षिप्रं पुण्यगमने विभूषणे। हिरण्यगर्भाधिकमुत्तरात्रयं ध्रुवाख्यमेतद्दिनवासुनामतं॥
युतं भरण्या सह पूर्विकात्रयं मघा तथोग्राख्यमिदं च पंचकं। भुजंगमं नैर्ऋतमैंद्रमार्द्रा भवंतीति दारुणानि हिता
नि सर्वदा। चराश्च पंच श्रवणः पुनर्वसुर्धनिष्ठया शतभिषक् समानिलं तथा॥ मृदूनि पौष्णं सुरवार्धकीष्वरं तथानुरा
धामृतरश्मिरेवती। हुताशनश्चैव सह द्विदैवं भूरिति साधारणसंज्ञमस्मिन्निति। यथोक्तनक्षत्रविशेषोप
जीवनेन ज्वरग्रमेदादिभिः सप्तनामभिर्युतमेषादिसंक्रांतौ क्रमेण ध्विचतुरित्यादिसप्तविधसंख्यानाम
पुण्यादिनियत्पुण्यमुक्तं तत्र नास्ति संदेहः। दृश्यत्स्मिन्नर्थे पारमार्थिकीशाहः प्रयुक्तः। मंदायां प्रतास मंदां घटि
काद्वयं पुण्यं। मंदाकिन्यां घटिकाचतुष्टयं। ध्वांक्ष्यां पंचकं। घोरायां सप्तकं। महोदर्यामेकं। राक्षस्यां नव १२३
कं। मिश्रितायां द्वादशकं। मेषसंक्रांतावुदाहृतः सोयं प्रकारो वृषभादिष्वेकादशसु संक्रांतिषु अनुसं
धेयः। देवीपुराणोदाहृतात्प्राचीनग्रंथेतत्त्रसंक्रांतिषु पुण्यकालो निर्णीतः। तस्मिन्काले देवी

यानिशीथेवा कुर्यादहनि सर्वतः॥ कार्मुकं तु परित्यज्य झषं संक्रमते रविः। प्रदोषे वार्धरात्रे वा स्नानं दानं परे
हनीति। वृद्धगार्ग्योपि। यदास्तमयवेलायां मकरं याति भास्करः। प्रदोषे वार्धरात्रे वा स्नानं दानं परेहनि। अर्ध
रात्रे तदूर्ध्वं वा संक्रांतौ दक्षिणायने। पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति। मेदां नविष्णोत्तरवृद्धगार्ग्यव
चनेषु रात्र्यनुष्ठानप्रतिषेधस्यादृतौ तद्दिवसानुष्ठानविधाने नैवार्थाद्रात्र्यनुष्ठानप्रतिषेधकल्पने पर्युदास
नुग्रहीतवचनानामानर्थक्यं प्राप्नोति। तस्मात् छास्त्रद्वये न विकल्प इति। तत्तद्दिशा प्रसिद्धशिष्टाचारे पाव्यवस्था
द्रष्टव्या। पृथोक्तानां द्वादशसंक्रांतीनां यथोक्तेषु पुण्यकालेषु मंदादिसंज्ञोपजीवनेन कश्चिद्विशेषो देवीपु
राणे दर्शितः। द्वादशैव समाख्याताः समासंक्रांतिकल्पनाः। सप्तधा तु पुनर्बोद्धव्या एकैकैव यथाक्रमं। मंदा
मंदाकिनी ध्वांक्षी घोरा चैव महोदरी। राक्षसी मिश्रिता प्रोक्ता संक्रांतिः सप्तधा ध्रुवं। मंदा ध्रुवेषु विज्ञेया मृ
दौ मंदाकिनी तथा। क्षिप्रे ध्वांक्षी विजानीयादुग्रे घोरा च कीर्तिता। चरे महोदरी ज्ञेया क्रूरे प्रोक्ता राक्षसी॥ मि
श्रिता देव विज्ञेया मिश्रनक्षत्रसंक्रमे॥ द्विचतुः पंचसप्ताष्टनवद्वादश एव च। क्रमेण घटिका ज्ञेयास्तासु पुण्यं पार
मार्थिकं। अत्र समाशब्दः संवत्सरवाची समासंबंधिन्यः संक्रांतिकल्पना मेषादीनां द्वादशैव समाख्याताः।
तासु द्वादशसंक्रांतिषु एकैका मंदादिभिः सप्तभिर्व्यवहार्या। तानि च नामानि नक्षत्रविशेषोपजीवनप्रवृत्तानि। तथा ध्रु
वेषु नक्षत्रेषु प्रारब्धा संक्रांतिर्मंदा। एवं मृदुक्षिप्रादिनक्षत्रेषु प्रारब्धा संक्रांतिः क्रमेण मंदाकिनीध्वांक्ष्यादि
नामभाग्भवति। ते हि एकत्रात्रयं चेति चत्वार्येतानि नक्षत्राणि ध्रुवाणि। रेवती चित्रानुराधा मृगशीर्षाणि

लेपूर्वदिनस्योत्तरार्धं। अपररात्रसंक्रमणे परदिनस्य पूर्वार्धमित्यवगंतव्यं। अयननामके भानोः संक्र
मणे दिवाज्ञाते सति यथायोगं तद्दिनार्धं पुण्यं कर्कटे पूर्वार्धं मकरे तूत्तरार्धं। एतच्च मध्यंदिनायनविषयं उ
दयास्तमये प्रत्यासन्ने त्वयने पूर्वोत्तरभागद्वयाशक्त्यबाधया तत्तद्दिवसपुण्यनिर्णयः पूर्वमेवोक्तः। अय
नव्यतिरिक्तेषु दशसु संक्रमणेषु रात्रिगतेषु यो निर्णयस्तं सर्वं पर्युदस्य तु तद्वचः शेषो मुख्यामकरक
र्कटावितिवर्णितः। याः याः संनिहिता नाड्यस्तास्ताः पुण्यतमाः इत्येतेन सामान्यवचनेन रात्रिसंक्रम
णेषु रात्रावेवानुष्ठानं प्रसक्तं तदपोद्य दशसु संक्रांतिषु दिवानुष्ठानं विधाय मकरकर्कटयोः तत्पर्युदा
से तित्पूर्वप्रसक्तं रात्रावनुष्ठानमेव पर्यवस्यति। एवं सति रात्रौ स्नानमभ्युपगच्छतो याज्ञवल्क्यवचनस्या
पि कश्चिद्विषयः संपद्यते। तथा च याज्ञवल्क्यः। राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु। स्नानदानादिकं का
र्यं निशि काम्यव्रतेषु चेति। सुमंतुरपि। रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः। नैमित्तिकं च कुर्वीत स्नानं
दानं च रात्रिषु। देवलोपि। यज्ञे विवाहे यात्रायां तथा पुस्तकवाचने। दानान्येतानि शस्तानि रात्रौ देवालये १२२
तथा। ग्रहणोद्वाहसंक्रांतियात्रार्तिप्रसवेषु च। श्रवणे चेतिहासस्य रात्रौ दानं प्रशस्यत इति। ननु यथो
क्तपर्युदासानुग्रहीतैः पुण्यतमत्ववादिदेवलयाज्ञवल्क्यसुमंतुवचनैर्मकरकर्कटयोर्निशि अनुष्ठान
प्राप्तं शास्त्रांतरेण विरुद्धं। तथा च नविष्णोत्तरे। मिथुनात् कर्कसंक्रांतिर्यदि स्यादंशुमालिनः। प्रभाते

पोहनीति। अत्र भास्करशब्देन सूर्ययुक्तो दिनं मुपलक्ष्यते यद्वा भास्करशब्देन सूर्ये स्थितः किं तु यौगिकः भासं करोती
ति व्युत्पत्तिसंभवात् तथा च सूर्येऽव भास्करशब्दो दिनेऽपि मुख्यः तस्यापि भासं प्रत्यधिकरणकारकत्वात् भास्करे दिव
से विद्यमाने मानं प्रहरद्वयं तस्यार्धं प्रहरद्वयं आदित्यास्तमयस्योपरि तु नाडी मिस्तूर्योदयात् प्राचीनः कालो
रात्रिः उदयस्योपरि अस्तमयात् प्राचीनः कालो दिनं। उदयास्तमयकालो संधिस्तेन तयोः संध्याः रात्रिदिवसाभ्यां
पृथगित्येके। रेवा मात्रस्यापि सूर्यमंडलस्य … दृश्यमानतयादिवसातः पातिनाविन्यपरे। सर्वथापि नरात्रौ
तयोरंतर्भावः सा च रात्रिस्त्रेधा भिद्यते मध्यवर्तिघटिकाद्वयात्मक एको भागस्तस्मात् पूर्वेतरौ द्वौ भागौ। तत्र पूर्वभा
गोऽस्तमयार्द्धरात्रशब्देनाभिधीयते तस्मिन् यदा संक्रांतिस्तदानीं सूर्यास्तमये प्रत्यासन्नं यत् पूर्वदिनस्योत्तरार्धं
तत्पुण्यं। अप्सु शर्वरीदलं इत्यनेनार्धरात्रादनंतरं भाविरात्रिभागो विवक्षितः। पूर्वोत्तरदलयोरेकैकस्यां घटिकायामर्धरात्र
र्धरात्रकालार्धस्पर्शकत्वात् अर्धरात्रिवर्गान्तया। तस्मिन् घटिकाद्वये परभागे यदा संक्रांतिस्तदानीं नाविस्त
योदये प्रत्यासन्नं दिनार्धं पुण्यं अयमेवार्थो द्वितीयश्लोकेन प्रपंच्यते। घटिकान्यूनत्वेनासंपूर्णार्धरात्रे पूर्वभागे य
दा संक्रमणं भवति तदा यद्यपि दिवा संक्रमणमनागतं तथापि तस्य दिवसस्योत्तरार्धं पुण्यं। यदा संपूर्णे अर्धरात्रे घ
टिकाद्वयात्मके निशीथे संक्रमणं भवेत् तदानीं पूर्वोत्तरयोरुभयोर्दिनयोः पुण्यं ज्ञेयं। अतिरिक्ते परभागे संक्रांतौ प
रेहनि सूर्योदये पुण्यं। देवलोऽपि। आसन्नसंक्रमं पुण्यं दिनार्धं स्नानदानयोः पुण्यं ज्ञेयं। अतिरिक्ते परभागे दिवेति
अयमर्थः। रात्रौ भानोः संक्रमणे विषुवनामकेऽजाते सति संक्रमणप्रत्यासन्नं दिनार्धं पुण्यं पूर्वरात्र संक्रम

मने त्वर्वाक् परतश्च षोडश घटिकाः पुण्यकालः। तथा चंद्रस्यापि घटिकैकापलानि त्रयोदशार्वाक् परतश्च पु
ण्यकालः। बृहस्पतेरपि सार्धचतस्रो घटिकाः सप्तपलानि पुण्यकालः। शुक्रस्य चतस्रो घटिकाः पलमेकं च
पुण्यकालः। शनैश्चरस्य द्वाशीतिर्घटिकाः पलानि सप्त पुण्यकालः। स्कांदे नागरखंडे। एकां तेते मया प्रोक्ताः
कालाः संक्रांतिपूर्वकाः। नैते बुध्यते विप्रा यतस्त्वास्य संहिताः। अत्र यद्यपि यद्दत्तं कुपात्रेभ्योपि मानवैः। अ
कालेपि हितत्सर्वं सत्यमक्षयतां व्रजेदिति॥ ॥इति संक्रांतिनिर्णयः॥ ॥ ॥अथ ग्रहणनिर्णयः। तत्र वृद्धगार्ग्यः
तार्णिमाप्रतिपत्संधौ राहुः संपूर्णमंडलं। ग्रसते चंद्रमर्कं च दर्शप्रतिपदंतरेति। तत्र पर्वणोत्तरागः स्पर्शकालः
प्रतिपदश्चाद्यभागो मोक्षकालः। तदुक्तं ब्रह्मसिद्धांते। यावान् कालः पर्वणोंते तावान् प्रतिपदादिमः। रवीन्दुग्रह
णे ज्ञेयः सपुण्यो नित्यशो द्विजैः। ग्रहणानेहा ग्रहणकालः। तत्र कर्तव्यमाह वृद्धवसिष्ठः। गंगातोये तु संप्राप्ते इंदोः को
टिरवेर्दश। तीर्थादिकोटिस्नानेन यत्फलं। गंगास्नानेन तत्फलं स्यात् राहुग्रस्ते निशाकरे। दिवाकरे पुनस्तत्र
दशसंख्यमुदाहृतमिति। अस्य श्लोकद्वयस्य प्रथमार्धमिथं … तयोराख्याहारेण योजनीयं। तद्यथा। इंदोर्ग्रहणे संप्रा
प्ते सति गंगातोये यस्नानं कोटिगोदानसमं भवति। रवेर्ग्रहणे ततो दशगुणं पुण्यं। अयमेवार्थः परितनार्धत्रयो
ण स्पष्टीकृतः। व्यासोपि। इंदोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः। गंगातोये तु संप्राप्ते इंदोः कोटी रवेर्दश। गवां कोटिस
हस्रस्य यत्फलं लभते नरः। तत्फलं … स्नानं राहुग्रस्ते निशाकरे। दिवाकरे तु स्नातस्य दशसंख्यमुदाहृतं

र्सूर्यग्रहे चैव योवगाहेत जाह्नवीं। स स्नातः सर्वतीर्थेषु किमर्थमटते महीमिति। गंगाव्यतिरिक्तमहानदीतोये सहस्र
गुणं दशगुणं वा। गंगातोये तु कोटिगुणं दशकोटिगुणं वा। ब्रह्मपुराणेपि। तिस्रो नद्यो महापुण्या वेणी गोदा च जा
ह्नवी। गां हरांघ्रिकां प्राप्ता गंगा हतीहि कीर्तिताः। हरिश्चैव महेशश्च हरांघ्रिः पादः के शिरः। अंघ्रिश्च कं च अंघ्रिकं
हरस्य चोरंघ्रिकं। हरेः पादादीश्वरस्य शिरसो गां भूमिं प्राप्ता गंगा॥ यद्यपि जाह्नव्येव तादृशी न तु वेणी गोदे तथा
पि छत्रिणो गच्छंतीति न्यायेन जाह्नव्या सह निर्दिष्टयोरन्ययोरपि गंगात्वमविरुद्धं। यद्वा जाह्नवीवत्समेव केन
चिन्निमित्तेन ब्रह्मगिरिवायुगिर्योरुद्भूतमिवत्वात्तयोरपि मुख्यमेव गंगात्वं। तासु गंगासु स्नानं मुख्यं तद
संभवे नद्यंतरेषु स्नायात्। तदुक्तं महाभारते। गंगास्नानं तु कुर्वीत ग्रहणे चंद्रसूर्ययोः। महानदीषु चान्या
सु स्नानं कुर्याद्यथाविधीति। महानद्यो ब्रह्मपुराणे दर्शिताः। गोदावरी भीमरथी तुंगभद्रा च वेणिका।
तापी पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिताः। भागीरथी नर्मदा च यमुना च सरस्वती। विशोका च वित
स्ता च विंध्यस्योत्तरतस्तथेति। महानद्यसंभवे त्वितराण्याह शंखः। वापीकूपतडागेषु गिरिप्रस्रवणेषु १२५
च। नद्यां नदे देवखाते सरसि शुद्धांबुनि। उष्णोदकेन वा स्नायाद्ग्रहणे चंद्रसूर्ययोरिति। एतत्सर्वमभिप्रेत्या
ह व्यासः। सर्वं गंगासमं तोयं सर्वे व्याससमा द्विजाः। सर्वं भूमिसमं दानं ग्रहणे चंद्रसूर्ययोरिति। उष्णोद
कस्यातुरविषयत्वं। यथा व्याघ्रपादः। आदित्यकिरणैः पूतं पुनः पूतं च वह्निना। अतो व्याध्यातुरः स्नाया

द्ग्रहणे ह्युष्णवारिणेति। गंगातोयमारभ्योष्णोदकपर्यंतेषूत्तरोत्तरात्तुकस्पत्वमुक्तं। एतदेवाभि
प्रेत्योष्णोदकादिषु समुद्रजलांतरेषूत्तरोत्तरस्य प्राशस्त्यमाह मार्कंडेयः। शीतमुष्णोदकात्पुण्यमपा
रक्यं परोदकात्। भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकं। ततोपि सारसं पुण्यं ततः पुण्यं नदी
जलं। तीर्थतोयं ततः पुण्यं महानद्यंबु पावनं। ततस्ततोपि गंगांबु पुण्यं पुण्यस्ततोंबुधिरिति। मास
विशेषेण नदीविशेषो देवीपुराणेभिहितः। कार्त्तिके ग्रहणं श्रेष्ठं गंगायमुनसंगमे। मार्गे तु ग्रहणं
प्रोक्तं देविकायां महामुने। पौषे तु नर्मदा पुण्या माघे सन्निहिता शुभा। फाल्गुने वरुणा पुण्या चैत्रे पुण्या
सरस्वती। वैशाखे तु महापुण्या चंद्रभागा सरिद्वरा। ज्येष्ठे तु कौशिकी पुण्या आषाढे तापिका न
दी। श्रावणे सिंधुनामा तु भाद्रे तु चंद्रिका। आश्विने सरयूः श्रेष्ठा तथा पुण्या तु नर्मदेति। ग्रहणवि
शेषेण नदीविशेषस्तत्रैवाभिहितः। गोदावरी महापुण्या चंद्रराहुसमन्विते। सूर्ये च राहुणा ग्रस्ते तमो
भूते महामुने। नर्मदातोयसंस्पर्शैः कृतकृत्या भवंति हीति। स्नानवत्स्मरणादिष्वपि पुण्यमाह। स्मृत्वा
शतक्रतुफलं दृष्ट्वा सर्वाघनाशनं। स्पृष्ट्वा गोमेधपुण्यं तु पीत्वा सौत्रामणीं लभेत्। स्नात्वा वाजिमखं पु
ण्यं प्राप्नुयाद्विचारतः। रविचंद्रोपरागे च अयने चोत्तरे तथेति। देशविशेषमाह। गंगा कनखले पु
ण्यं प्रयागः पुष्करं तथा। कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे इति। ग्रहणे श्राद्धं विहितं लिंगपु

णि। व्यतीपातग्रहणे यावान् चंद्रसूर्यग्रहस्तु लः। गजच्छायानु साप्रोक्ता पितॄणां दत्तमक्षयमिति। मह
नारतेपि। सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु नास्तिक्यात् पंके गौरिव सीदति। स्मृत्यंतरे
पि। चंद्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत्। तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे इति। विष्णुरपि। राहु
दर्शनदत्तं हि श्राद्धमाचंद्रतारकं। गुणवत्सार्वकामीयं पितॄणामुपतिष्ठत इति। ग्रहणे रात्रावपि स्नानादेर्न
निषेधः। तथा च शातातपः। स्नानं दानं ततः श्राद्धमनंतं राहुदर्शने। आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्जयेदि
ति देवलः। यथा स्नानं च दानं च सूर्यस्य ग्रहणे दिवा। सोमस्यापि तथा रात्रौ स्नानं दानं विधीयत इति। श्राद्धप्र
त्यक्षमपि पुराणे। नैमित्तिकं तु कर्तव्यं ग्रहणे चंद्रसूर्ययोः। बांधवानां च मरणे नारकी स्यादतोन्यथा। काम्या
निषेधवाक्यं तेग्रहणादिष्विति। वारविशेषयोगे फलातिशयमाह व्यासः। रविग्रहः सूर्यवारे सोमे सोमग्रहस्त
था। चूडामणिरिति ख्यातस्तत्र दानं तदक्षयं मवेदिति। वारेष्वन्येषु यत्पुण्यं ग्रहणे चंद्रसूर्ययोः। तत्पुण्यं कोटि
गुणितं ग्रासे चूडामणौ स्मृतमिति। अतिथिश्राद्धादिवत् ग्रहणस्यापि श्राद्धकालत्वमाह मार्कंडेयः।। १२६
विशिष्टश्राद्धकाले श्राद्धे सूर्येंदुग्रहणे दिने। जन्मर्क्षग्रहपीडासु श्राद्धं कुर्यात्प्रयत्नत इति। अत्र च श्राद्धं नान्नेन किं
तु हेमादिना। तदाह बौधायनः। अन्नाद्यावेदिताभावे प्रवासे पुत्रजन्मनि। हेमश्राद्धं संग्रहे च कुर्याच्छूद्रः सदैव वा
ति। शातातपोपि। आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा। आमश्राद्धं द्विजः कुर्याच्छूद्रो दद्यात्सदैव हीति।
आशौचिनोपि ग्रहणे स्नानादिन निषिद्धं। तथा च वृद्धवसिष्ठः। सूतके मृतके चैव न दोषो राहुदर्शने।

तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते इति। इयं च शुद्धिः सर्वस्मार्त्तविषया। एतदेवाभिप्रेत्य व्या
घ्रः। स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके। श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादिति।
यत्तु ग्रहणनिमित्तमाशौचं तत्स्नानेन निवर्त्यं। तदुक्तं ब्रह्मांडपुराणे।। आशौचं जायते नॄणां
ग्रहणे चंद्रसूर्ययोः। राहुस्पर्शे तयोः स्नात्वा स्नानादौ कल्पते नर इति।। ।।षड्विंशन्मतेपि।।
सर्वेषामेव वर्णानां सूतकं राहुदर्शने। स्नात्वा कर्माणि कुर्वीत शृतमन्नं च वर्जयेदिति।। आपन्
नयोः स्नानं विहितं स्मृत्यंतरे।। ।।ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते। मुच्यमाने भवेद्दा
नं मुक्ते स्नानं विधीयत इति।। होमदानवृद्धवाक्येनापि स्नानद्वयमध्ये कार्यं। तदुक्तं ब्रह्मवैवर्ते।।
स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनमिति।। ।।तत्काले स्वाध्यायादिकं न कुर्यात्।। ।।तदुक्तं
शिवरहस्ये।। ।।सूर्येंदुग्रहणं यावत्तावत्कुर्याज्जपादिकं।। न स्वपेन्न च भुंजीत स्नात्वा भुंजीत मुक्त
योरिति।। ग्रहणानंतरं नावियत्स्नानं न स्यात् शुद्ध्यर्थं तया तत्सचैलं विधेयं।। तदाह वृद्धवसिष्ठः।।
सर्वेषामेव वर्णानां सूतकं राहुदर्शने।। सचैलं तु भवेत्स्नानं सूतकान्नं च वर्जयेदिति।। ग्रहणकालेतत्
वी

त्पूर्वं यावत्पक्वं तत्तत्कालं त्यजेत्स्वयमपि न भुंजीत। आदिमध्यावसानेषु यद्दिष्टं तत्स्नानस्य फलातिशयः ग्रहे
ग्रस्तेषु राहोरुपमर्दलक्षणं ग्रहणे चंद्रसूर्ययोः। पुण्यं कोटिगुणं मध्ये मुक्तिकाले त्वनंतकमिति। अत्र ग्रहणोप
दानं तत्सत्पात्रे कर्तव्यं। तदुक्तं महाभारते। अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः। पात्रभूताय विप्राय भूमिं द
त्त्वा रक्षिणामिति। पात्रलक्षणमाह याज्ञवल्क्यः। न विद्यया केवलया तपसा वापि पात्रता। यत्र वृत्तमिमे चोभे त
द्धि पात्रं प्रकीर्तितमिति। पात्रे मुख्यानुकल्पो बौधायनः। श्रोत्रियो श्रोत्रियो वापि पात्रं वापात्रमेव वा। विप्रब्रुवो
पि वा विप्रो ग्रहणे दानमर्हतीति। अत्र भूमिवस्त्राद्यन्यपि देयानि। तदुक्तं महाभारते। भूमिर्गावः सुवर्णं धा
न्यं वा यद्यदीप्सितं। तत्सर्वं ग्रहणे देयमात्मनः श्रेय इच्छतेति। प्रतिगृहीत्रभेदेन फलतारतम्यं दक्षेणोक्तं। सम
मब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे। श्रोत्रिये शतसाहस्रं पात्रे त्वानंत्यमश्नुत इति। अह्नि सूर्यग्रहणं रात्रौ चं
द्रग्रहणमिति हि प्रसिद्धिः। सर्वजनीना तादृशे विषये यदुक्तं तदुक्तं। यत्तु कालविपर्यासेन प्राप्यमाणं ग्रहोपि:
शास्त्रप्रसिद्धं ग्रहणं तत्र न स्नानादिकं कर्तव्यं। तदुक्तं निगमे। सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहस्तथा। तत्र स्ना १२०
नं न कुर्वीत दद्यान्नैव च कुत्रचिदिति। अस्तास्तमये जाबालिराह। संक्रांतौ पुण्यकालस्तु षोडशोभयतः क
लाः। चंद्रसूर्योपरागे च यावद्दर्शनगोचर इति। अस्तास्तमनपर्यंतं दर्शनगोचरत्वात्तावान् पुण्यकालो भवति

ग्रहणे भोजनव्यवस्थामाह मनुः। चंद्रसूर्यग्रहे नाद्यादद्यात्स्नात्वा विमुक्तयोः। अमुक्तयोरस्तगयो
र्दृष्ट्वा स्नात्वा परेहनीति। ग्रहे ग्रहणकालस्पर्शमारभ्य मोक्षपर्यंतो ग्रहणकालः। तस्मिन्काले न भुंजीत किं
तु राहुणा चंद्रसूर्ययोर्मुक्तयोः सतोः पश्चात्स्नात्वा भुंजीत। यदा ग्रस्तास्तमयस्तदा परेद्युर्विमुक्तौ तौ दृष्ट्वा
भुंजीत। न केवलं ग्रहणकाले भोजनं वर्ज्यं किंतु ग्रहणात्प्रागपि। तदाह व्यासः। नाद्यात्सूर्यग्रहात्पूर्वमह्नि सायं श
शिग्रहात्। ग्रहकाले च नाश्नीयात्स्नात्वाश्नीयाद्विमुक्तयोः। मुक्ते शशिनि भुंजीत यदि न स्यान्महानिशा। अमु
क्तयोरस्तगयोरद्याद्दृष्ट्वा परेहनीति। पूर्वकालभोजननिषेधे विशेषमाह वृद्धवसिष्ठः। ग्रहणं तु भवेदिंदोः प्र
थमादधियामतः। भुंजीतावर्तनात्पूर्वं पश्चिमे प्रथमादधः। रवेस्त्वावर्तनात्पूर्वं मध्ये वा निशीथतः। चतुर्थ
प्रहरे चेत्स्याच्चतुर्थप्रहरादध इति। रात्रौ प्रथमप्रहरादूर्ध्वं चंद्रग्रहणं चेत् आवर्तनान्मध्याह्नात्पूर्वं भुंजीत
रात्रिपश्चिमयामे चेद्रात्रिप्रथमयामादर्वाग्भुंजीत। अहस्तृतीयप्रहरे चेद्रविग्रहस्तदा पूर्वदिनस्यार्ध
रात्रात्प्राग्भुंजीत। अहश्चतुर्थप्रहरे रविग्रहणं चेत् रात्रेश्चतुर्थप्रहरादधो भुंजीतेत्यर्थः। निशीथो मध्य
रात्रः। शशिग्रहे यामत्रयेण व्यवधानमपेक्षितं। सूर्यग्रहणे यामचतुष्टयेनेति तात्पर्यार्थः। तथा च वृ

वृद्धगौतमः। सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयं। चंद्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरैर्विनेति। बा
लवृद्धातुरविषये मत्स्यः। अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे। भुंजीत संगवे चेत्स्यान्न पूर्वं भुक्तिमाचरेदि
ति। समर्थस्य भोजने प्रायश्चित्तमुक्तं कात्यायनेन। चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति। तस्मिन्नेव दिने भुक्त्वा
त्रिरात्रेणैव शुध्यतीति। शशिग्रहे यामत्रयस्यापवादमाह वृद्धवसिष्ठः। ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत्
ग्रस्तास्तमये विशेषमाह वृद्धगर्गः। ग्रस्तावेवास्तमनं तु रवींदू प्राप्नुतो यदि। परेद्युरुदये स्नात्वा शुद्धावभ्यवहरेन्नरः इ
ति। वृद्धगार्ग्योपि। संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ। तदहन्नैव भुंजीत रात्रावपि कदाचनेति। विष्णुध
र्मोत्तरेपि। अहोरात्रं न भोक्तव्यं चंद्रसूर्यग्रहो यदा। मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति। ननु मेघा
घे तथनिवारुषं दर्शनं न संभवतीति चेत्। न। दर्शनशब्देन शास्त्रानस्पदिवक्षितत्वात्। तदाह वृद्धगौतमः। चंद्रसू
र्यग्रहे नाद्यात् तस्मिन्नहनि सर्वतः। राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनमिति। एवं तर्हि परेद्युरुदया १२८
स्तमयविशेषविज्ञानसंभवात्तद्दैवभोजनं प्रसज्येत। तत्रापरेद्युरुदये भ्यवहरेत्। अहोरात्रं न भोक्तव्यमिति व
चनद्वयेन तत्प्रसक्तिः। यत्तु स्कंदपुराणे। यदा चंद्रग्रहः स्यात्तन्निशीथात्परतो भवेत्। भोक्तव्यं तावत्पूर्वाह्णेनाप

राह्णे कथंचनेति। यत्र सर्वं निशीथात् ग्रहणं यदा चंद्रस्य वै भवेत्।। तदा दिवा न कर्तव्यं भोजनं शिशिरवि
हेनेति। तदेतद्यामत्रयाभिप्रायं। चंद्रग्रहे तु यामांस्त्रीनित्युक्तिविशेषस्य वृद्धगौतमेनाभिधानात्। पापकृ
त्यकामो ग्रहणदिनमुपवसेत्। तदाह वृद्धः। अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः। अहोरात्रोषितः
स्नातः सर्वपापैः प्रमुच्यत इति। पुत्री तु नोपवसेत्। तदाह नारदः। संक्रांत्यामुपवासं च कृष्णैकादशि
वासरे। चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृहीति।। ग्रस्तास्तमये तु पुत्रिणोप्युपवासः। अहो
रात्रं न भोक्तव्यमिति भोजनप्रतिषेधात्।। ।।इति श्रीमाधवीये कालनिर्णये ग्रहणनिर्णयः।।
संवत् १७३२ वर्षे पौषमासे शुक्लपक्षे एकादश्यां शनिवासरे भ० श्रीवासुत भ० नारायण
सुत भ० रघुनाथेन लिखितोयं ग्रंथः।। ।।लेखकपाठकयोः शुभं भवतु।। ।।श्रीरस्तु।।